PURANETIHASA

ACHARYA 1st YEAR
Course/Paper.2

# वराहपुराणे श्रीवेङ्कटाचलक्षेत्रमाहात्म्यम् (प्रथमद्वितीयभागौ)

## *Varāhapurāṇē śrīvēṅkaṭācalakṣētramāhātmyam (Prathamadvitīyabhāgau)*


**CENTER OF DISTANCE & ONLINE EDUCATION**

*(Formerly Directorate of Distance Education)*

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

# वेङ्कटाचलमाहात्म्यम्

**आमुखम्**

वेङ्कटाद्रि समं स्थानं ब्रह्माण्डे नास्ति किञ्चन।
वेङ्कटेशसमो देवो न भूतो न भविष्यति।

ब्रह्माण्डभाण्डेषु वेङ्काटाद्रेः समानं दिव्यस्थलं कुत्रापि नास्ति। तथैव श्रीवेङ्कटेश्वरस्वामिनः तुल्यः देवः अपि भूतकाले नासीत्, भविष्यत्काले न भविष्यति इति सुप्रसिद्धं वेङ्कटाचलमाहात्म्यं वेदव्यासेनानेकपुराणेषु विवृतम्।

श्रीमहाविष्णुः आदिवराहस्वामिरूपेणावतीर्य हिरण्याक्षुनामकं राक्षसं हत्वा भूदेव्याः रक्षणं कृत्वा तत्रैव स्थितः। अत एव आदिवराहक्षेत्रमिति आदौ उक्तं वेङ्कटाचलक्षेत्रम् । तथैव श्रीनिवासरूपेणावतीर्य, आकाशराजस्य पुत्र्या पद्मावत्या विवाहानन्तरम् अस्मिन् क्षेत्रे एव वराहस्वामिनः अनुमत्या अर्चावताररूपेण स्थितः, आश्रितानां भक्तानां पापान् दूरीकृत्य, तेषां वांछाफलसिदिधं कुर्वन् कलौ वेङ्कटनायकः इति प्रसिद्धः।

'वें पापमित्याहुः कट इति दाह उच्यते। ' इत्युक्तत्वात् पापदाहकमिति प्रसिद्धं वेङ्कटाचलक्षेत्रम्। 'वेङ्कारो अमृतबीजस्तु कट इति ऐश्वर्यमुच्यते। अमृतैश्वर्य संघत्वात् वेङ्कटाद्रिरिति स्मृतः। इति च प्रसिद्धम्।

**पुराणेषु वेङ्कटाचलमाहात्म्यम्**

श्रीवराहपुराणे, आदित्यपुराणे, ब्रह्मपुराणे, ब्रह्माण्डपुराणे, पद्मपुराणे, भविष्योत्तरपुराणे स्कन्दपुराणे, वामनपुराणे, मार्कण्डेयपुराणे, ब्रह्मोत्तरखण्डे च वेङ्कटाचलमाहात्म्यं सुष्टु वर्णितम्। तत्र श्रीवराहपुराणे प्रथमभागे, द्वितीयभागे च श्रीवेङ्कटाचलमाहात्म्यं सम्यक् विस्तृतं वर्णितम्। प्रथम भागे त्रयस्त्रिंशे अध्याये श्वेतवराहकल्पवृत्तान्तकथनं, मुनिगणकृत हिरण्याक्षवधवृत्तान्त बीजप्रश्नः, हिरण्याक्षवधप्रसन्नब्रह्मादिवराहस्तुति श्चोक्ताः।

चतुस्त्रिंशे अध्याये श्रीवैकुण्ठात् भगवत्क्रीडाचलानयनम्, क्रीडाचलवर्णनम्, अपि चोक्तम्।

पञ्चत्रिंशे अध्याये देवादिकृतश्वेतवराहप्रार्थना उक्ता। सूतकृतस्वामिपुष्करिणीमाहात्म्यमपि वर्णितम्।

षट्त्रिंशे अध्याये क्रीडाद्रिप्रविष्ट श्रीवराहदिव्यवैभववर्णनं, क्रीडाद्रेः भगवत्सान्निध्येन महिमाधिक्यवर्णनं, क्रीडाद्रेः कारणभेदेनानेकनामानुवर्णनं चोक्तम्।

सप्तत्रिंशे अध्याये महर्षियज्ञवाटं प्रति भगवदागमनं, वृद्धस्य कुमारधारास्नानेन कौमारप्राप्तिश्चोक्ताः।

अष्टात्रिंशे अध्याये भ्रष्टराज्यस्य शंखनृपणस्य राज्यप्राप्तिक्रमः, श्रीनिवासस्योपदेशश्चोक्ताः।

एकोन चत्वारिंशे अध्याये आत्मारामाख्यविप्रस्य सम्पत्प्राप्ति क्रमः, सनत्कुमार-कथितव्यूहलक्ष्मीमन्त्रोद्धारक्रमः, श्रीवेङ्कटेश्वरालयवर्णनं, श्रीवेङ्कटेश्वरस्य शरीरसौन्दर्यवर्णनं , चोक्तानि।

चत्वारिंशे अध्याये कापिलादि सप्तदशतीर्थमाहात्म्यम्, पाण्डवतीर्थमाहात्म्यं, जराहरादितीर्थत्रयमाहात्म्यं च वर्णितानि।

एकचत्वारिंशे अध्याये श्रीवेङ्कटाद्रिं प्रति श्रीरामागमनम्, अञ्जनाप्रार्थनादिवर्णनं चोक्तानि।

द्विचत्वारिंशे अध्याये वैकुण्ठाख्यगुहाप्रविष्टवानरवृत्तान्तः, वैकुण्ठगुहाप्रभाववर्णनं चोक्तानि।

त्रिचत्वारिंशे अध्याये ब्रह्मादीनां श्रीवेङ्कटाचलागमनम्, पुत्रार्थिनो दशरथश्य श्रीवेङ्कटाचलागमनं च वर्णितम्।

पञ्चचत्वारिंशे अध्याये दशरथेन श्रीवेङ्कटाचलवासिनां महार्षिणां चरितं वर्णतम्।

षट्चत्वारिंशे अध्याये श्रीभगवदाविर्भावघट्टः वर्णितः। सप्तचत्वारिंशे अध्याये ब्रह्मादीनां भगवन्मान्दिरप्रवेशादिवर्णनं कृतम्।

अष्टचत्वारिंशे अध्याये अगस्त्यादिकृत भगवत्स्तुतिः, सनकादिकृत भगवत्स्तुतिः, दशरथकृतभगवत्स्तुतिः, ब्रह्मकृत भगवत्स्तुतिश्चोक्ताः।

एकोनपञ्चाशदध्याये ब्रह्मादीन् प्रति भगवत्कृत कुशलनुयोगादयः, भगवते ब्रह्मादिभिः रावणोपद्रवनि वेदनं, भगवता अभयप्रदानं, भगवन्तमुद्दिश्य दशरथकृतपुत्रप्रार्थना चोक्ताः।

पञ्चाशदध्याये भगवन्तं प्रति चतुर्मुखकृतप्रार्थना, भगवता अभयप्रदानं, श्रीवेङ्कटाद्रिनिकटस्थासुरवधार्थं चक्रप्रेषणम्, श्रीवेङ्कटेश्वरमहोत्सवघट्टश्चोक्ताः।

एकपञ्चाशदध्याये श्रीवेङ्कटेशमहोत्सववैभववर्णनं, महोत्सवसेवाफलदानफलप्रशंसादिकं चोक्तानि।

द्विपञ्चशदध्याये वेङ्कटाद्रौ पुष्पोद्याननिर्माणादि प्रशंसा, महोत्सवावभृथस्नानप्रशंसा, ब्रह्मादीनां स्वावासगमनार्थं भगवदभ्यनुज्ञा चोक्ताः।

त्रिपञ्चाशदध्याये श्रीवेङ्कटाद्रीशवैभवप्रशंसा, ब्रह्मादीनां स्वावासगमनं, फल्गुणीतीर्थमाहात्म्यं, जाबालितीर्थमाहात्म्यं, पूर्वस्यां दिशि सुदर्शनकृतासुरवधप्रकारश्चोक्ताः।

चतुः पञ्चाशदध्याये सुदर्शनसैन्यासुरसैन्ययोः युद्धप्रशंसा, आग्नेयदिशि सुदर्शनकृतासुरवधप्रकार श्चोक्ताः।

पञ्चपञ्चाशदध्याये सुदर्शनस्यासुरवधार्थं दक्षिणदिग्गमनं वर्णितम्।

षट्पञ्चाशदध्याये वरुणदिशि असुरसुदर्शनसेनायुद्धप्रशंसा वर्णिता।

सप्तपञ्चाशदध्याये सुदर्शनस्यासुरवधार्थम् उत्तरदिग्गमनं, वर्णितम्।

अष्टपञ्चाशदध्याये श्रीवेङ्कटेशस्य कलिदोषोपहतेषु विशेषतः कृपाधिक्यवर्णनं कृतम्।

एकोनषष्ठितमे अध्याये चेतनस्य आचार्याश्रयणात् पुरुषार्थप्राप्तिनिरूपणं कृतम्।

षष्ठितमे अध्याये अष्टाङ्गयोगस्वरूपनिरूपणं कृतम्। सनकसनन्दनतीर्थमाहात्म्यमुक्तम्। कायरसाय नतीर्थमाहात्म्यमुक्तम्।एकषष्ठितमे अध्याये श्रीवेङ्कटेशाष्टोत्तरशतनामावलिः उक्ता।

द्विषष्ठितमे अध्याये महर्षीणां श्रीवेङ्कटेशसेवार्थं श्रीवेङ्कटाचलागमनं, महर्षिकृतभगवत्स्तुतिः, सूतं प्रति शौनकादिस्तुतिश्च उक्ताः।

**वराहपुराणे श्रीवेङ्कटाचलमाहात्म्ये द्वितीयभागः**

श्रीवराहपुराणान्तर्गते श्रीवेङ्कटाचलमाहात्म्ये द्वितीयभागे प्रथमे अध्याये नारदस्य सुमेरुशिखरस्थयज्ञवराहदर्शनं, वराहसन्निधिं प्रति धरण्यागमनं, धरणीवराहसंवादः शेषाचलस्य सर्वपर्वतातिशायित्ववर्णनं, स्वामिपुष्करिण्याः सर्वतीर्थातिशायित्ववर्णनं, कुमारधारामाहात्म्यं, तुम्बतीर्थ माहात्म्यं, आकाशगङ्गामाहात्म्यं, पाण्डवतीर्थमाहात्म्यं, पापनाशनतीर्थमाहात्म्यं, देवतीर्थमाहात्म्यं, धरणीकृतवराहस्तुतिः, वराहस्य भगवतो धरण्या साकं शेषाचलागमनं, अध्यायफलश्रुतिश्चोक्ताः।

द्वितीये अध्याये श्रीवराहमन्त्राराधनविधिः, श्रीवराहमन्त्रेण धर्मादीनां स्वाभीष्टसिद्धेः वर्णनं च कृतम्।

तृतीये अध्याये अगस्त्यप्रार्थनया भगवतः सर्वजनदृग्गोचरत्ववर्णनं मित्रवर्मणः आकाशराजाख्यसुतोत्पत्तिवर्णनं, धरणीतलात् पद्मावत्युत्पत्तिक्रमः, आकाशराजस्य धरण्याख्यपत्न्यां वसुदासाख्यसुतोत्पत्तिश्च उक्ताः।

चतुर्थे अध्याये उद्यानवासिन्याः पद्मावत्याः समीपे नारदागमनं, नारदोदीरितपद्मावती-शरीरलक्षणानि, पद्मावत्याः स्वसखीभिः साकं पुष्पाटवीगमनं, मृगयार्थं पुष्पाटवीं प्रति श्रीनिवासगमनं, भगवतः कन्यकानां चान्योन्यसंवादश्चोक्ताः।

पञ्चमे अध्याये पद्मावतीदर्शनेन श्रीनिवासस्य मोहप्राप्तिः, मुह्यमानं श्रीनवासं प्रति वकुलमालिकोक्तिः श्रीनिवासोक्तपद्मावतीपरिणयकारणानि, वियद्राजपुरं प्रति वकुलमालिकागमनं, दिव्योद्यानस्थपद्मावतिसखीः प्रति वकुलमालिकोक्तिश्चोक्ताः।

षष्ठे अध्याये वकुलमालिकां प्रति सखीविनिवेदित पद्मावत्युदन्तः, पद्मावतीमुद्दिश्य दैवज्ञं प्रति वियद्राजकृतप्रश्नादिः, दैवज्ञोक्त्या अगस्त्यलिङ्गार्चनाय विप्रादिप्रेषणं, धरणीकृतप्रश्नस्य पुलिन्दिनीप्रतिवचनं पद्मावतीनिवेदित भगवद्भागवतलक्षणानि, वकुलमालिकया सार्थं सखीनां धरणीसमीपे आगमनं चोक्तम्।

सप्तमे अध्याये धरणीदेव्यै वकुलमालिकानिवेदितश्रीनिवासोदन्तः, श्रीनिवासोक्त्या शङ्खनृपस्य स्वामितीर्थे तपः करणं, वकुलमालिकोक्त्या धरण्यादि कृतविवाहनिश्चयः, बृहस्पत्युक्त्या विवाहलग्नस्थिरीकरणं, विश्वकर्मादिकृत पुरालङ्कारादिक्रमः, पद्मावती शुकेन सह वकुलायाः श्रीनिवाससमीपे गमनं, श्रीनिवासाय शुकावेदितपद्मावतीपरिणयवृत्तान्तः, पद्मावत्या शुकदत्तश्रीनिवासमालाधारणं चोक्तानि।

अष्टमे अध्याये श्रीनिवासस्य लक्ष्म्यादिकृतपरिणयालङ्कारः,ब्रह्मादिभिस्साकं श्रीनिवासस्य वियद्राजपुरागमनं, पद्मावतीपरिणयघट्टः, वधूवरयोः वियद्राजवितीर्ण प्राभृतादिकं , श्रीनिवासकृपया वियद्राजस्य भक्तिप्राप्तिरूपवरप्राप्तिः, विवाहार्थमागतानां ब्रह्मादीनां स्वावासगमनं चोक्तानि।

नवमे अध्याये वसुनामकनिषादवृत्तान्तः, सुतहननोद्युक्तं वसुं प्रति भगवदुक्तिः, रङ्गदासस्य श्रीनिवाससेवार्थं श्रीशेषाचलागमनं, श्रीनिवासार्थं रङ्गदासकृतदिव्योद्यानमण्डपनिर्माणानि, रङ्गदासस्य गन्धर्वक्रीडादर्शनेन भगवत्कैङ्कर्यविस्मृतिः, स्वानुष्ठितानुसन्धानेन लज्जितं रङ्गदासं प्रति श्रीनिवासवचनं, तोण्डमान्नामनृपवृत्तान्तः, तोण्डमान्नृपस्य मृगयार्थं श्रीशेषाचलागमनं, श्रीनिवाससमीपस्थं पञ्चवर्णशुकवृत्तान्तः, तोण्डमान्नृपस्य निषादेन सह श्रीनिवाससेवागमनं, तोण्डमान्नृपं प्रति रेणुकोक्तिः, शुकवर्णित पद्मसरोवरमाहात्म्यं, देवादिकृतश्रीलक्ष्मीस्तुतिः, इन्द्रादीन् प्रति स्तुतिप्रसन्नलक्ष्मीवचनं चोक्तानि।

दशमे अध्याये तोण्डमान्नृपस्य स्वपितुः सकाशात् राज्यप्राप्तिः, वसोः वल्मीके श्रीवराहसन्दर्शनं, तोण्डमान्नृपाय वसुनिवेदितवराहोदन्तः, नृपस्य निषादवाक्यस्वप्नाभ्यां बिलमार्गेण शेषाचलागमनं, भगवदुक्त्या तोण्डमान्नृपकृतक्षीराभिषेकप्राकारनिर्माणादिकं, गङ्गास्नानागतवीरशर्माख्यविप्रचरितम्, अस्थिसरोवरमाहात्म्यं, कुर्वग्रामस्थकुलालवंशजभीमाख्यभक्तोदन्तः, श्रीनिवासकृपया तोण्डमान् नृपस्य सारूप्यप्राप्तिः, एतन्माहात्म्यश्रवणपठनफलश्रुतिश्चोक्ताः। इति।

# Unit- I
# प्रथमाध्यायात् षष्ठाध्यायं यावत्

## १.१. प्रस्तावना

भारतीयसंस्कृतेः शिखरायमाना भवति देवालयसंस्कृतिः। देवालये अर्चामूर्तिः स्वयंभू, दिव्या, आर्षेया मानुषा इति चतुर्विधाः। परमात्मा स्वीयसङ्कल्पेन यत्र स्वयमवततार सा मूर्तिः स्वयंभू इत्युच्यते। देवताभिः प्रतिष्ठिता चेत् दिव्यमित्युच्यते। ऋषिभिः प्रतिष्ठिता चेत्, आर्षेयमित्युच्यते। मनुष्यैः प्रतिष्ठिता चेत् मानुषा इत्युच्यते। श्रीवैकुण्ठविरक्ताय स्वामिपुष्करिणीतटे स्वयमवततार श्रीनिवासः वेङ्कटाचले। तस्य वेङ्कटाचलस्य माहात्म्यं बहुपुराणेषु वर्णितम्। तत्र श्रीवराहपुराणे वेङ्कटाचलमाहात्म्ये प्रथमभागे त्रयस्त्रिंश अध्यायादारभ्य द्विषष्ठितमअध्यायासन्ति। वधि त्रिंशति अध्यायाः द्वितीयभागे दशअध्यायाः सन्ति। आहत्य चत्वारिंशाध्यायेषु वेङ्कटाचलमाहात्म्यं वर्णितम्।

## उद्देश्यम् १-२

प्रियपाठकाः। अस्मिन् खण्डे भवन्तः अधोलिखितान् विषयान् आलोचयिष्यन्ति।

- श्वेतवराहकल्पवृत्तान्तकथनम्
- मुनिगणकृतहिरण्याक्षवधवृत्तान्तबीजप्रश्नः, उत्तरकथनम्
- हिरण्याक्षवधप्रसन्नब्रह्मादिवराहस्तुतिः
- श्रीवैकुण्ठात् भगवत्क्रीडाचलानयनम्
- क्रीडाचलवर्णनम्
- देवादिकृत श्वेतवराहप्रार्थना
- सूतकृतस्वामिपुष्करिणीमाहात्म्यवर्णनम्
- क्रीडाद्रिप्रविष्ट श्रीवराहदिव्यवैभवर्णनम्
- क्रीडाद्रेः भगवत्सान्निध्येन महिमाधिक्यवर्णनम्
- क्रीडाद्रेः कारणभेदेनानेकनामानुवर्णनम्
- महर्षियज्ञवाटं प्रति भगवदागमनम्
- वृद्धस्य कुमारधारास्नानेन कौमारप्राप्तिः
- भ्रष्टराज्यस्य शङ्खणनृपस्य राज्यप्राप्तिक्रमः

## श्वेतवराहकल्पवृत्तान्तकथनम् १-३

सर्वदेहिनां वासार्थं पातालात् वसुन्धरा येन उद्धृता तस्मै श्रीमते भूवराहाय नमः। शतबाहवे वेदवेदान्तवपुषे विश्वरूपिणे यज्ञवराहाय श्रीकृष्णाय नमः। पुरा कल्पान्ते सागरैः सर्वैः एकीभूते महीजले भगवान् विष्णुः वटपत्रसमाश्रयः जलसंप्लवं महर्लोकं समाश्रित्य स्थितं युगसाहस्रं जलावस्थानमद्भुतं विचिन्त्य, यथापूर्वं जगत्स्रष्टुमुद्युक्तः सर्वशक्तिमान् सर्वस्यधाता प्रवरः महात्मा सर्वात्मगः सर्वजगत्स्वरूपः सर्वेश्वरः सद्योविकसितपुण्डरीकदलामलायतेक्षणः श्रीमहाविष्णुः ऐक्षत।

इति सूतमहर्षेः वचनं श्रुत्वा मुनयः सविस्मयोत्फुल्लहृदयाम्बुजाः वेदविदां वरिष्ठं मुनिसङ्घसेव्यं महान्तं सूतं एवमब्रुवन् - हे अतीतानागतज्ञानप्रकाशितहृदयाम्बुज ! सङ्कल्यानन्तरं रमापतिः विष्णुः किं कृतवान् ? कीदृशः फलयः ? कल्पः सर्गो वा कीदृशः ? एतावद्वा जलं कस्मादागतं ? वद ! स्वामिन् ! धरणी, महोन्नताः गिरयो वा कुत्र याताः ? तत्सर्वमुच्यताम् । श्रोतुमस्माकं कौतूहलमिति पृष्टः पुनः तान् मुनिपुङ्गवान् प्राह सूतः।

हे मुनयः ! श्रूयतां सङ्ग्रहेण पूर्वं जलागमः। ब्रह्मणः चतुर्मुगसहस्राणि दिवसस्य प्रमाणम्। निशायाः तावत् निर्दिष्टः समयः। दिवसावसानसमये भगवान् रविः सहस्ररश्मिः त्रिमूर्त्यात्मा त्रिलोचनः प्रचण्डकिरणैः महाघोरमग्निं वमति। कतिचिद्वत्सारानेवं वृष्टिः नैव भवेत्। तदा भूलोकवासिनः सर्वे, मुनयः तपोधनाश्च यावत् ब्रह्म निशा तावत् जनलोके वसेयुः। तदा कालाग्निना वनानि पर्वताश्चापि दग्धाः स्युः। अनन्तरं सर्वात्मकः वायुः
कतिचिद्वाति। पश्चात् मेघाः महाबलाः स्थूणाकाराः तोयधाराः समन्ततः सन्ततं कतिचित् वत्सरान् सृजन्ति। द्रवीभूता महाभूमिः पातालतलगामिनी। तदा सप्तसागराः अन्योन्यं संयुताः भवेयुः। तदा उदकाः महर्लोकं समाक्रम्य तिष्ठन्ति। तथैव युगसाहस्रं ब्रह्मणः शर्वरी भवेत्। निशावसाने गोविन्दः सृष्टिस्थित्यन्तकारकः चतुर्मुखशिवाशक्यं भूमेः उद्धरणं कर्तुकामः वटपत्रतले स्थितः विष्णुः सर्वयज्ञमयं मङ्गलम् अतिभीमं महारौद्रं श्वेतवराहदेहमासाद्य तरसा जलमध्यं प्रविश्य क्षोभयामास। संवर्तमेघनिर्घोतबृंहितं मुहुः वहन् महापोत्री जलपूरितं पातालं प्रविवेश। तदा अशेषतः रसातलमन्वेषयामास। तत्र महाघोरं हिरण्याक्षसमाश्रयं महाघोरं युद्धम भूत् अभूतपूर्वं तुमुलं रोमहर्षणं बाहुभ्यां मल्लयुद्धमवर्तत चिरकालम्। ततः कृद्धः महापोत्री दंष्ट्राग्रेण महासुरं मेरुतुल्यमहोन्नतिं तं द्विधा पाटयामास। तद्रक्तसंप्लवेनैव तज्जलं रक्तमाबभौ। तद्दृष्ट्वा मुनयः सर्वे जनलोकनिवासिनः महज्जलमिदं रक्तमद्भुतं किमिदं भवेत् ?.इत्याश्चर्यविलोलाक्षाः समाधिध्यानयोगतः श्वेतवराहस्य प्रभावं ज्ञात्वा मुनयः अस्तुवन्। ततः श्वेतवराहस्य प्रभावं ज्ञात्वा मुनयः अस्तुवन्।

ततः श्वेतवराहः सर्वसत्त्वसमाश्रयां तां भूमिं दंष्ट्राग्रेणैव तरसा उद्धृत्य महज्जलं विक्षोभ्य शेषस्य भोगोपरि पादं निधाय महाप्रभुः जनलोकं समाश्रित्य पर्वतसन्निभः तस्थौ।

**बोधप्रश्नाः**

१. प्रलयः, कल्पश्च कीदृशौ?

२. श्वेतवराहस्य महत्वं कीदृशम् ?

**ब्रह्मादिभिः वराहस्तुतिः १- ४**

ब्रह्मादयः, देवगणाः, सिद्धाश्च परमर्षयः विविधैः परैः वेदमन्त्रैः स्तोत्रैश्च अस्तुवन्। पुष्पवर्षाणि ववरुः। अप्सरो गणाः ननृतुः। देवदुन्दुभयोः वीणामुरजमर्दलाः नेदुः। विबुधव्रजाः देवतासमूहाः जयदेव, महापोत्रिन् जयभूमिधराच्युत, हिरण्याक्षमहारक्ष, विचारण विचक्षण, त्वमनादिः अनन्तश्च, त्वत्तः परतरो न हि, त्वमेव सृष्टिकालेऽपि विधिर्भूत्वा चतुर्मुखः, एतत् जगत्सर्वं सृजसि, विष्णुः समन्ततः पासि, कल्पान्ते कालाग्निरुद्ररूपी च हे देव सर्वजन्तुषु अन्तर्यामी भवान्, सर्वकर्ता त्वमेवा हि सुराः अपि तव निष्कृष्टं ब्रह्मणो रूपं न जानन्ति। भगवन् विष्णो प्रसीद, भूमिं पूर्ववत् स्थापय, सर्वप्राणिनिवासार्थमिति अस्तुवन्।

**बोधप्रश्नाः**

१. हिरण्याक्षवधप्रसन्नब्रह्मादिवराहस्तुतिः कीदृशी?

२. वराहस्तुतौ विशेषाः के ?

**श्रीवैकुण्ठात् भगवत्क्रीडाचलानयनम् १-५**

श्वेतवराहः धरां पूर्ववत् स्थापयित्वा सप्तसागरान् सप्तलोकान् च विभज्य, चतुर्मुखं समाहूय यथा पूर्वं जगत् सृज इति महाक्रोडः सर्वयज्ञमयः हरिः उवाच ! धाता सूर्याचन्द्रमसौ यथापूर्वमकल्पयत्। धरावराहदेवोऽपि लोकानुग्रहकाम्यया भूमौ स्थातुं दिव्यं स्थलं बुध्या निश्चित्य अद्भुतं गिरिमानेतुं गरुडं प्रेषयामास। वैनतेय ! महासत्त्व ! त्वमतिवेगतः गच्छ ! गत्वा तु परमं

धाम क्रीडाचलमिहानय। सर्वान् सुरान् विष्वक्सेनमुखान् पारिषदांश्चापि इहानय इत्युक्तः गरुडः साक्षात् विहायसं उत्पपात। पर्वतोत्तममानेतुं गरुडे गते पोत्रिरूपी हरिः भूमिं पूर्ववत् स्थापयित्वा, पद्भ्यां भूमिं समाक्रम्य, गोमतीतीरमागतः, तस्यास्तु दक्षिणे भागे षष्ठियोजनदूरतः पूर्वाब्धेः पश्चिमे भागे पञ्चभिः योजनैः युते देशे पुण्यजनाकीर्णे रुक्मनद्याः (सुवर्णनद्याः) उत्तरे आगत्य देवोऽपि गरुडागमनोन्मुखः तस्थौ। वैनतेयोऽपि परमं धाम गत्वा क्रीडचलं ददर्श !

तत्कथमस्तीत्युक्ते -आप्राकृतम्, अमेयं सर्वरत्नमयं, हिरण्मयं, महाशृङ्गं, पञ्चोपनिषदात्मकं पुन्नागचम्पकाशोकतालहिन्तालशोभितं, सुरद्दममुखैः वृक्षैः, अन्यैः काञ्चनरूपकैः शोभितं, शुककोकिलहंसकैः पक्षिसंघैश्चश्रवणानन्दजनकमधुरालापसम्भ्रमैः मल्लिकामालतीभिः नन्द्यावर्तादिभिः लताभिः पुष्पिताग्राभिः दिव्यसौरभशालिभिः, सिंहशार्दूलमातङ्गशरभक्रोडवानरैः शोभितं, गायत्किन्नरपङ्क्तिभिः किन्नरीभिश्च शोभितं अनेकनिर्झराकीर्णं मानसाह्लादकारकं, मुक्तैः नित्यैः कामरपैः नानारूपैश्च सेवितं, नारायणगिरिं नाम्ना परमेष्ठिनः क्रीडाद्रिं योजनत्रयविस्तारं, त्रिंशद्योजनमायतं, शेषाकारं, हरेः शेषं सर्वदेहिनां शेषिणं, दिव्याकारं, महापुण्यं, पश्यतां मोक्षदायकं रूपम् एवं गिरिश्रेष्ठं तं नारायणाद्रिं भगवत्परिचारिकैः परिवारैरूपेतं स्कन्धदेशे निधाय, काञ्चनप्रभः गरुडः महावेगात् आजगाम। ततः ससम्भ्रमो वायुरुदभूत् विहायसि विष्णुवाहनः धुन्वन् वृक्षान् सूर्यकोटिरिव आबभौ। आगतं गरुडं वीक्ष्य हरिः हे खगोश्वर ! पर्वतमिह स्थापयेत्युवाच ! गरुडोऽपि तथा स्थापयामास। ततः गिरं समारुह्य श्वेतपोत्री हरिः स्वामिपुष्करिणीतीरे पश्चिमे पुण्यकानने, स्थितः। कोटिसूर्यसमप्रभे दिव्ये विमले विमाने अनेकरत्नखचितगोपुरायुतशोभिते रत्नस्तम्भसमोपेते श्रीमहामणिमण्डपे वाचामगोचरे सर्वनयनानन्दकारके स्वामिपुष्करिण्याः दक्षिणे तटे विमानमध्ये परात्परः पद्माक्षः श्रीनिवासः देवदेवोऽपि शङ्कचक्रगदाधरः अतिष्ठत् ।

**बोध प्रश्नाः**

१. श्रीवैकुण्ठात् क्रीडाद्रेरानयनं वर्णयत!

२. क्रीडाचलस्य वर्णनं स्पष्टयत।

**देवादिकृतश्वेतवराहप्रार्थना १-६**

क्रीडाचले श्वेतवराहसन्निधिं देवाः सगन्धर्वाः ब्रह्माद्याः मुनयः लोकपालाः पार्वतीप्रभुः शङ्करश्च आजग्मुः। सप्तर्षयः, अष्टवसवः एकादशरुद्राः, द्वादशादित्याः एकोनपञ्चाशत् वायवश्चागत्य हृषीकेशं वासुदेवं जगत्प्रभुं तुष्टुवुः।

हे जयलक्ष्मीश। लोकेश ! भमिधराच्युत! विष्णे। हिरण्याक्षविध्वंसनविचक्षण ! दंष्ट्राकरालवदन ! भ्रुकुटी कुटिलेक्षण ! जय जय! भयङ्करमिदं रूपम् अत्युग्रं घोरदर्शनम्। ज्वलदस्त्र भुजनेकपार्श्वद्वयविराजितं रूपं दृष्ट्वा सर्वे सुराः परमर्षयश्च व्यथताः। लोकान् अनुग्रहीतुं त्वयात्र गिरौ स्थीयताम्। भयङ्करं त्वदीयं रूपमद्भुतदर्शनम्। तत् दृष्ट्वा उद्विग्नहृदयाः अदृढाः भवेयुः नराः। देवतानां मनुष्याणां वासार्थं च धरा उद्धृता भवता। तस्मात् मनुजरक्षार्थं सौम्यरूपं धारय! ध्यानयोगेषु अशक्तानां कर्मसु अशक्तानामस्माकं मनुजानां तथैव स्त्रीशूद्राणां दृश्यकत्वं वरदो भूत्वा नित्यमिहैव वस ! इत्युक्तः, प्रसन्नात्मा सौम्यरूपी चतुर्भुजः श्रीभूमिसहितः पुण्डरीकनिभेक्षणेः शरत्पूर्णेन्दुवदनः सर्वाभरणभूषितः श्रीनिवासः सुरान् सर्वान् समाहूय इदमब्रवीत् -

'वैकुण्ठात्परमो ह्येष वेङ्कटाख्यो नगोत्तमः।
अत्रैव निवसाम्येव श्रूभूमिसहितो ह्यहम्।।

ददामि प्रार्थितानर्थान् मनुजेभ्यः सदा सुराः। इत्युक्त्वा, त्रिदशान् सर्वान् ब्रह्मेन्द्रप्रमुखान् अपि यथार्हं समनुज्ञाप्य, तत्रैवान्तरधीयत। देवाः मुनयः सर्वे स्वस्ववासान् प्रतिजग्मुः।

**बोधप्रश्नाः**

१. भूवराहस्वामिनं देवादयः कथं तुष्टुवुः ?

२. देवादीनुद्दिश्य भगवता किमुक्तम् ?

क्रीडाशैले स्थितं स्वामिपुष्करिणीस्मरणमेव सर्वपापप्रणाशनं, सर्वपुण्यदादयंक च भवति। श्रीभूमिलालिता भगवत्क्रीडावापी अप्राकृतजलौघा, सुगन्धा, सुमनोहरा वैकुण्ठात् क्रीडाचलेन सहागता। गङ्गादिसर्वतीर्थानां जन्मभूमिः, शुभोदका, वैनतेयेनानीता क्रीडार्थं तत्र तिष्ठति। विरजावत् रजोदोषप्रमुखाघविनाशिनी स्वर्णस्तेयसुरापानदोषप्रमुखनाशिनी, ऐहिकार्थप्रदा नित्यं सर्वदास्नानमात्रेण। दर्शनात्, स्पर्शनात् पानात् स्मरणात् सर्वसिद्धिदा। स्नानादिष्टप्रदा। तस्याः माहात्म्यं वक्तुं देवोऽपि न समर्थः। देवेभ्यः अपि स्वामिपुष्करिणीसमीपस्थाः मनुजाः एव भाग्यशालिनः। किन्तु मानुषाः तस्याः वैभवं न जानन्ति। वेङ्कटान्द्रिः प्राकृताचलवद्भाति, तथापि तेषां तद्गिरौ भक्तिस्तु शुद्धा भवति। यस्य यस्य यथा भक्तिः  तस्य तादृशी सिद्धिश्च। स्वामिपुष्करिणीस्नानं सद्गुरोः पादसेवनम् एकादशीव्रतं चापि त्रयमत्यन्त दुर्लभम्। दुर्लभं मानुष जन्म, स्वामिपुष्करिणीतीरे जीवनं दुर्लभम्। स्वामिपुष्करिणीस्नानमत्यन्तदुर्लभम्। अतः तस्याः माहात्म्यं वक्तुं शेषोऽपि न समर्थः। स्वामिसरस्स्नानं महापातकनाशनम् इति तारकासुरसूदने प्रत्यक्षसिद्धमेव खलु। प्रायश्चित्तप्रवृत्तानां नराणां सुलभाद्वितीया च स्वामिपुष्करिणी पुण्या तथा काम्यप्रदायनी। वेङ्कटाद्रेः विशेषेण दर्शनं यच्च वर्तते नित्यं नैमित्तिकं काम्यं प्रायश्चित्तं च तद्भवेत्। विष्णोः कर्माणि पश्य इति सनातनश्रुत्यनुसारेण स्वामिपुष्करिणीतीरनिवासेन, तत्र दृष्टैः सत्कर्मभिश्च अङ्गवैकल्यदोषा नश्यन्ति । वासवादिषु अमोघं च कर्म अत्र दृश्यते। बहुना किमुक्तेन ? धर्मार्थादिफलेषु वाञ्छावतां मनुष्याणां स्त्रीशूद्राणां पापिनां च साङ्गकर्मक्रियाशक्तनराणां च विशेषतः वेङ्कटाद्रेः अन्या गतिः नास्ति। सत्यं सत्यं न संशयः।

**बोधप्रश्नाः**

१.स्वामिपुष्करिणी माहात्म्यं कीदृशम् ?

२. स्वामिपुष्करिणीस्नानफालानि कानि ?

**क्रीडाद्रिप्रविष्ट श्रीवराहदिव्यवैभवम् १-८**

श्वेतवराहरूपेण यदा भूदेवी उद्धरिता तदैव श्वेतवराहरूपमुज्जहार। तदैव गरुडेन वैकुण्ठात्क्रीडाद्रिरानाय्य लीलारसमहोदधिः भगवान् कल्पादावेव दरीनिर्झरसानुषु रमया सार्थं विहरन्, प्रकाशश्चाप्रकाशश्च सदा गिरौ तिष्ठत्येव। कल्पान्तं वसत्येव कदाचित् पुण्यशीलेभ्यो दर्शनं वितरति। कल्पे कल्पे धरणीमुद्धरत्येव। यतः श्वेतवराहरूपेण धरणी उद्धृता। अतः अस्य कल्पस्य श्वेतवराहकल्प इति नाम सिद्धः। साधूनां च यदा बाधाधर्मश्चापि अवसीदति। यदा अधर्मः अधिकः दुष्टाश्च बलिनः तदा कालानुरूपेण नरदेवादिरूपतः श्रीमहाविष्णुः आत्मानं सृष्ट्वा अहितान् संहरति। अधर्मं सर्वमुत्सार्य सुधर्मं पालयति। वेदविद्याश्च वर्धयन् साधून् रक्षत्येव। स्वयं च सर्वभूतानां दृश्यः कुत्रचित् तिष्ठति। सर्वदा शेषशैलेन्द्रे रमया सह विहरन् नित्यैः मुक्तैः देवैः कामरूपैश्च संयुतः सदा तस्मिन् वेङ्कटाख्ये नगोत्तमे तिष्ठत्येव। वैकुण्ठस्वर्गसूरेभ्यः स्वगृहेभ्यः अधिकप्रियः अयं पुण्यकाननः पर्वतः हृद्यः। तथैव मन्त्रसिद्धिः, तपस्सिद्धिः, यज्ञसिद्धिश्च।

काम्यस्य कर्मणः सिद्धिः एवमन्याश्च सिद्धयः भवन्त्यत्र। नराणां न क्वचित् विघ्नादिकं भवन्त्यत्र। वेङ्कटाद्रौ अल्पेन तपसा अभीष्टं सिद्ध्यति। पुण्यानि सर्वतीर्थानि सततमत्रैव सन्ति। श्रद्धाभक्तिसमन्वितः यः एनं सेवते सः ज्ञानार्थी ज्ञानमाप्नोति द्रव्यार्थी बहुकनकमाप्नोति। पुत्रार्थी पुत्रमाप्नोति। नृपः राज्यं विन्दति। व्यङ्गश्च साङ्गसद्रूपं पशून् धान्यानि विन्दति। यः मर्त्यः यं यं कामयते तं तमाप्नोति सर्वदा।

बोधप्रश्नाः

१. क्रीडाद्रिप्रविष्ट श्रीवराहदिव्यवैभवं वर्णयत।

२. क्रीडाद्रेः भगवत्सान्निध्येन महिमाधिक्यं वर्णयत।

**क्रीडाद्रेः कारणभेदेनानेकनामानि १-९**

चिन्तितस्य सिद्ध्या चिन्तामणिमिमं विदुः। ज्ञानप्रदत्वात् ज्ञानाद्रिरिति विदुः। सर्वतीर्थमयत्वात् तीर्थाद्रिरिति प्राहुः उत्तमाः। अस्मिन् गिरौ पुष्कराणां बाहुल्यात् पुष्कराद्रिः इति तत्त्वदर्शिनः मुनयः प्रशंसन्ति। अस्मिन् गिरौ धर्मः स्वाभिवृद्धये तपस्तेपे। तस्मात् वेदपारगाः मुनयः वृषाद्रिः इति आहुः। शातकुम्भस्वरूपत्वात् कनकाद्रिः इति विदुः। पुरा कश्चित् द्विजः नारायणः महत्तपः

कृत्वा मुरारितः स्वनाम्ना व्यपदेशं ऐच्छत। तस्मात् उत्तमपुरुषाः नारायणाद्रिः इति तं विदुः। वैकुण्ठादागतत्वेन वैकुण्ठाद्रिरिति स्मृतः। हिरण्या ख्यविनाशाय प्रह्लादानुग्रहाय च स्वयं हरिः यस्मात् नारसिंहाकृतिः जज्ञे तस्मात् सिंहाचल इति मुनीश्वराः प्राहुः। अञ्जना च तपः कृत्वा हनूमन्तमजीजनत्। तदा देवाः समागत्य देवसाहाय्यकारकं पुत्रमसूता इति इमं गिरिम् अञ्जनाद्रि रिति जगुः। वराहक्षेत्रलक्ष्मतः वराहाद्रिरिति जगुः। यस्मात् वानरेन्द्रस्य नीलस्य नित्यमवस्थितिः तस्मात् महर्षयः नीलगिरिनाम्ना एनं वदन्ति।

वेङ्कारो अमृतबीजस्तु कटमैश्वर्यमुच्यते। अमृतैश्वर्यसंघत्वात् वेङ्कटाद्रिरिति स्मृतः। कदाचित् देवानां श्रीनवासः इह बभौ। अतः दिवौकसः एनं श्रीनिवासगरिं इति प्राहुः। भगवतः क्रीडाप्राचुर्यात् सुराः क्रीडाद्रिरिति प्राहुः। वैकुण्ठपुरवासिनः इमम् आनन्दाद्रिरिति प्राहुः। श्रीप्रदत्वात् श्रीयोवासात् शब्दशक्त्या यो गतः रूढ्या श्रीशैल इत्येवं नाम चास्य गरेरभूत्। कल्पभेदात् बहूनि नामानि भवन्ति। भगवतः कल्याणगुणराशयः यावदुक्ताः तावत् परमपावनाः गुणाः अस्य गिरेः सन्ति। अस्य वेङ्कटशैलस्य माहात्म्यं यावदस्ति तावद्वक्तुं चतुर्मुखः न समर्थः। षण्मुख, सहस्रफणिदेवाः अपि न समर्थाः।

**बोधप्रशनाः**

१. वेङ्कटाद्रेः बहूनि नामानि कानि?

२. क्रीडाद्रेः अनेकनामसिद्धकारणानि कानि ?

**महर्षियज्ञवाटं प्रति भगवदागमनम् १-१०**

मायिना सर्वशक्तेन लीलापरवशेन च भगवता कृतं वक्तुं न शक्यम्। कदाचित् महामायी विटवेषं वहन् मुदा गिरावुत्तरदिग्भागे रमया सह चचार। तत्र केचिन्महाभागाः तत्त्वदर्शिनः मुनयः तपोधनाः अस्य गिरेः माहात्म्यं श्रुतवन्तः अयं गिरिः महापुण्यः सर्वसमाश्रयः निर्बाधः फलमूलाढ्यः सर्ववृक्षसमावृतः नानाप्रस्रवणोपेतः, याज्ञीयैः महीरुहैः अन्यैः तापसयोग्यैश्च पादपैः सङ्कुलः, नयनानन्दजनकः हृदयाह्लादकारकः। अत्र महागरौ अस्माभिः सर्वदा वासः कर्तव्यः इति निश्चित्य, मनसा तत्रागत्य, तपोधनाः यथाशास्त्रं विष्णुमुद्दिश्य कौतुकात् यज्ञं चक्रुः।

सोऽपि महाविष्णुः मायी स्त्रिया सार्थं सुवर्णचित्रं वस्त्रं वसानः शुभदर्शनः सोष्णीषः वामेन करेणैव छुरिकां दधत्। ताम्बूलेन शुचिस्निग्धमन्दस्मितमुखाम्बुजः मृगोत्थमदगन्धेन सुरभीकृतदिङ्मुखः पुण्डरीकविशालाक्षः कम्बुग्रीवः महाभुजः जगन्मोहनसौन्दर्यः साक्षत्कन्दर्पसन्निभः हेमयज्ञोपवीताङ्गः कोमलाङ्गः मनोहरः मध्ये बृन्दं महात्मनां याज्ञीं सभां प्रविवेश। मुनयस्सर्वे पुण्डरीकनिभेक्षणं दृष्ट्वा वेश्या वेषं धारयन्तीं लीलाम्बुजकराम्बुजां तत्पतहाटकसङ्काशां पङ्कजोदरसप्रभां हरिद्रान्तरतुल्याभ्यां दीव्यन्तीं कुटिलालकां शरत्पूर्णेन्दुवदनां ताम्बूलेन मनोहरां कर्णान्तनेत्रयुगलां विडम्बितरविप्रभाम् अभूतपूर्वसौन्दर्यां साक्षाल्लक्ष्मीमिव स्थितां दृष्ट्वा मुनयस्सर्वे विस्मयोत्फुल्लमानसाः कोऽसौ राजसुतः ? एषः पृथिवीं भोक्तुमर्हति। द्वात्रिंशल्लक्षणोपेतः साक्षाद्राम इवापरः किमर्थमागतस्त्वम् इति पृच्छाम इति चाब्रुवन्। हे राजन् ? ते आवासः कुत्र ? माता का ? जनकः कुत्र ? तव नामधेयं च किमित्यशेषतः ब्रूहि इति।

श्रीभगवानुवाच ! नाहं राजा। न वा विप्रः। नैव काचिज्जातिश्च मे। न च माता न च पिता नैवावासः कुत्रचित्। सर्वावासः सर्वभक्षः सर्वगः सर्वरूपधृत्, निर्नामा। निर्गुणश्चाहं युष्मान् द्रष्टुमिहागतः। भवन्तः तपसा श्रेष्ठाः वेदवेदान्तपारगाः वदन्तु-औदुम्बरी सर्वावेष्टिता व्याघ्रवाससा स्पृष्टोद्गानं कथं सम्भवेत् ? यज्ञसंपदि एवमादि क्रियालोपं पृष्टवान् अथ मुनयः सम्भूय ' वपाकलस्तु गच्छति' इति त्वरितास्सर्वे समित्थे जातवेदसि चतुश्शस्त्रोक्तमार्गतः पुण्यगन्धं वपाहोमं चक्रुः। सोऽपि वेगात् तत्र गत्वा शङ्खचक्रगदाधरः श्रीवत्सवक्षा नित्यश्रीः सर्वाभरणभूषितः कोटिसूर्यसमप्रभः पाणिभ्यां वपां जग्राह। तदा तु मुनयस्सर्वे पाणिभ्यां वपां जग्राह। तदा तु मुनयस्सर्वे प्रभयारिति मितेक्षणाः तपोधनाः तत्र क्षणं चित्रार्पिता इव तस्थुः। तदा श्रीमहाविष्णुः प्रीतोऽहमिति सर्वानुकत्वा, अदृश्यो बभूव। मुनयश्च प्रीताः 'साक्षाद्विष्णुस्समागतः। अस्माकं भाग्यमतुलं जीवितं च सुजीवितम् ' इति कौतुकसम्भ्रमात् यागक्रियाशेषं चक्रुः। एतत्सर्वं पुरा जाबालिमुनिना समाख्यातम्

**बोधप्रश्नाः**

१. महर्षियज्ञवाटं प्रति भगवदागमनं वर्णयत।

२.मुनिजनानुद्दिश्य भगवदुक्तिं स्पष्टयत।

## वृद्धस्य कुमारधारास्नानेन कौमारप्राप्तिः १-११

पुरा वेङ्कटाधीशः विशालाक्षः कोमलाङ्गः मनोहरः कुमारस्सन् गिरिमूर्धनि चचार। कश्चित् वृद्धः द्विजः जर्झरिताकृतिः, मग्नदृष्टिः, भग्नजानुः, क्षुत् तुष्णापरिपीडितः तेन दृष्टः। मार्गभ्रष्टः वने तत्र कुत्रचित् शैलमाश्रितः - हे कौण्डिन्य ! शतवृद्धं मां विहाय क्व वा गतोसि ? इति मुहुः जल्पन्, शुष्कः, कण्ठोष्ठपुटतालुकः स्थितः। तत्रस्थेन कुमारेण किमर्थमिहजल्पसि ? न कश्चिदत्र मनुजः कौण्डिन्यः कुत्र तिष्ठति ? इत्युक्तः। वृद्धश्च प्राह - नितरां मृतवानहम्। दूरतः स्थितं तावदाश्रमं कथं गच्छामि ? शौचाचारक्रियाशक्तं रिक्तं बन्धुविवर्जितं दुर्बलं मां विधिः किमर्थम् अस्मिन् लोके स्थापयति ? इत्येवं ब्रुवति सति तस्मिन् निर्हेतुक दयानिधिः कुमारः तं वृद्धं सोपहासमिदं वचः प्राह- 'हे विप्र ! तव शरीरं जरितं तथा वलितम्। पक्ष्मणी त्वक् च लम्बते। न किञ्चन पश्यसि। अतः परं विप्रेन्द्र ! जीवनेच्छा तवास्ति किम् ? पूर्वोक्तवाक्यं सत्यं न वा ? इत्युक्तः। विप्रोऽपि नास्तीच्छा जीवने मम। किन्तु नित्यानि कर्माणि ज्योतिष्ठोममुखानि च नानुष्ठितानि। देवानामृणी अहं पुनः कथं त्यक्ष्यामि ? देहम् ? भो राजन् ! सत्यमेव ब्रवीमि ते इत्युक्तः, तं विप्रं प्राह ' गृहाणेमं करं तु इति। सोऽपि तत्करमालम्ब्य शनैः तेन जगाम ! क्वचित् प्रस्रवमं पुण्यं शुभोदकं दर्शयित्वा, स्नानं कुर्वत्र गच्छावः ततः तवाश्रमपदम् ' इत्युक्तः। विप्रेन्द्रः तेन स्नात्वा पुनः तत्रोत्थितः अभूतपूर्वः षोडशाब्दकः कुमारः अभूत्। कुमारोऽपि सहस्राक्षः सहस्रवदनोऽभूत्।

सहस्रमूर्धा विश्वात्मा, सहस्रभुजमण्डितः। पुनः तत्राकाशे विस्मिताः देवाः समाजग्मुः। पुष्पवृष्टिः महत्याशीत्। तदा देवदुन्दुभयः नेदुः। देवास्सर्वेऽपि स्तोत्रसत्तमैः तं तुष्टुवुः। ततः देवः द्विजं प्राह ' सर्वतः कर्माणि कुरु। कर्मानुष्ठानसिद्ध्यर्थं ते बहुधनं च दत्तम्। इत्युक्त्वा तत्रैवान्तरधीयत। ततः देवाः सर्वेऽपि सम्भूय, वाक्यमिदं प्रोचुः - ' अयं वृद्धः कुमारोऽभूत् यस्मात् तस्मादियं नदी कुमारधारेति सदा लोके ख्यातिं गमिष्यति। त्रिमासं त्रिकालम् अत्र यः स्नाति सः विजितेन्द्रियः वलीपलितनिर्मुक्तः नरः वज्रकायो भवेत्। सर्वपापविनिर्मुक्तः विष्णोः परं पदं याति। इत्युक्त्वा त्रिदशास्सर्वे विस्मितमानसा जग्मुः। इति जाबालिकथितं मया तदुक्तं भवताम्। यः इदं श्रुणुयात् सः मर्त्यः स्नानजं फलं लभते।

**बोधप्रश्नाः**

१. वृद्धस्य कुमारधारास्नानेन कौमारप्राप्तिं विशदयत।

२. वृद्धकुमारयोः भाषणविशेषान् स्पष्टयत।

**भ्रष्टराज्यस्य शङ्खणनृपस्य राज्यप्राप्तिक्रमः १-१२**

साङ्कश्ये सोमवंशीयः शङ्खणः पृथिवीपतिः अनेकदेशसहितं बहुविस्तारसंयुतं परम्परागतं राज्यं चक्रे। अखण्डपराक्रमः सः महाराजः कदाचित् कृतपुण्यविपर्ययात् सामन्तराजभिः सर्वैः हृतराज्यः महीपतिः। तस्मात् सभार्यः सामात्यः दुःखितः देशान्निर्गत्य, दक्षिणां दिशमासाद्य रामसेतुं ददर्श। तत्र स्नात्वा पश्चात् शनैः आजगाम। ततः सुवर्णमुखरीं नदीं गत्वा स्नात्वा च उत्तरतीतः पाद्मं सरस्समागम्य तत्र स्नानं चकार। नित्यं च विधिवत्कृत्वा दुःखपीडितः न्यवसत्। ' राज्याद्भ्रशो वने वासः स्वामित्वं च हृतं परैः। पारतन्त्र्यं महद्दुःखं मरणादतिरच्यते। भविता जीवनं कस्मात् ? क्व वा गच्छामि ? का गतिः ? इति शोकमाविष्टः तस्थौ निद्रामुपागतः। तदानीं तं शोकपीडितम् अशरीरा एनं जगाद- 'हे बुद्धिमान् ! महाबाहो ! मा शुचस्त्वं धैर्यमालम्ब्य, इतः उत्तरदिग्भागे क्रोशमात्रे महागिरिः वेङ्कटाचल इति प्रथितः पृथिवी तले। आपन्नकामधेनुः, शोकार्तानां सुरद्रुमः, अर्तानां चिन्तामणिरिव निर्हेतुकदयापूर्णः सदाश्रितानामिष्टदः कमलापतिः तत्रास्ते। पद्मिनीपुल्लपङ्कजशोभिता ' स्वामिपुष्करिणीत्येव नामतः प्रधिता शुभा काचित् तत्रास्ते तत्पश्चिमतटे श्रीमान् महावल्मीकभूधरः अस्ति। उत्तिष्ठ तत्र गच्छ त्वं तत्तीरे कुटिकां कुरु। तत्र स्थित्वा त्रिसन्ध्यं तत्रैव स्नानमाचरन् तत्र स्थितं वेङ्कटेशं बुद्धितः भावयित्वा, चतुर्भुजं, शङ्खचक्रे दधानं वरदं हरिं मासषट्कं श्रुद्धाभक्तिसमन्वितः अभ्यर्चयन् निवस। हे महाबाहो ! त्वं स्वामित्वं प्राप्स्यसि धृवम् इति। तस्याः अशरीरवाण्याः वचनं श्रुत्वा, गतशोकः प्रसन्नधीः पुण्यं परमपावनं गिरेः शृङ्गमारुरोह।

**वेङ्कटाचलवर्णनम्**

चम्पकाशोकपुन्नागचूतधात्रीसमन्वितं, चन्दनागरुहिन्तालरक्तचन्दनभास्वरं चमरीमृगसाहस्रं, कस्तूरीमृगसेवितं, शुककोकिलसन्नादमयूरस्वनशोभितम् एवं कनकोपमं मनोहरं शृङ्गमारुह्य तत्तीर्थं मृगयामास । तत्र निर्मलस्पाटिकोपमां, तिलकाशोकपुन्नागवकुलैश्च विशोभितां रम्योपवनसंशुद्धां,

रक्तराजीवराजितां, मत्स्यकच्छपसम्बाधां, तीरस्थतरुभास्वरां, पुष्पिताम्रवनोपेतां, केकिकेकारवाकुलां, तिलकैः बीजपूरैः वरैः शुक्लद्रुमैः, पुष्पितैः करवीरैः भाण्डीरैः निचुलैः अशोकैः सप्तपर्णैः केतकैः अतिमुक्तकैः अन्यैश्च विविधैः वृक्षैः पुष्पितैश्च मनोहरां स्वामिपुष्करिणीं दृष्ट्वा प्रमुमोद। तत्र कुटिकां कृत्वा बुधः निवासमकरोत्। त्रिषवणं स्नानं कुर्वन्, वेङ्कटेशं समर्चयन् व्रती च नियताहारः मासषट्कमवर्तत। ततः स्वामिसरो मध्यात् उत्तिष्ठन् महाद्भुतम् अनेकसूर्यसङ्काशं दशदिशो शोभयत् दिव्यं विमानं तत्रैव तस्थौ। देवः श्रियः पतिः शङ्खचक्रगदापाणि श्रीभूमिसहितः परः तत्रैव तस्थौ। तत्र ब्रह्माद्याः मुनयोऽपि देवाः सिद्धाः विद्याधराः किन्नराः दिशाधिपाः, वसवः, सप्तमुनयः, साध्या रुद्राः समाजग्मुः। देवताः सर्वाश्च गीतं नृत्तं वाद्यं च चक्रुः। परमोदारैः वेदमन्त्रैः दिवौकसः तुष्टुवुः। शङ्खणः ससम्भ्रमं समुत्थाय प्रणिपत्य , देवदेवेशं स्तुत्वा इदं व्यजिज्ञपत्।

हे देवदेव ! जगन्नाथ ! जगद्रक्षणतत्पर ! भवद्दत्तं स्वामित्वं मम क्रमायातम्। राजभिः आक्रम्य हृतं राज्यात् भ्रष्टोऽस्मि अभाग्यतः। हे करुणासिन्धो ! महोदार ! जगत्पते ! रक्ष माम्। व्रतशीलं नियमं जपादिकं वा न जाने। दिष्ट्या दृष्टो मया । हे स्वामिन्। तव दर्शनममोघम् इत्युक्तः कालमेघाभः श्रियः पतिः बभाषे !

मा शुचस्त्वं, मया दत्तं स्वामित्वं पूर्वमागतम्। यस्मात् तव महाभक्तिः। स्वामिपुष्करिणीजले ये केचन समागत्य स्नानं कुर्वन्ति संयुताः स्वामिपुष्करिणीतीर्थे ते नराः स्वामित्वं प्राप्नुयुः। तेषां व्रतानुगुण्येन स्वामित्वं भवति धृवम्। तेषां व्रतानुगुण्येन स्वामित्वं भवति धृवम्। तेषां कदापि पराधीनभावलेशः न स्यात्। हे महीपाल ! त्वं राज्यं गत्वा अकण्टकं पालनं कुरु इति देवदेवानां समक्षमुक्त्वा अन्तरदीयत। तस्मिन् सरोवरे स्वामिपुष्करिणीशब्दः रूढः। यतः तस्याः तीर्थानां स्वामिनी व्युत्पत्तिः कथिता। तस्मात्पूर्वं पुरातनैः स्वामिपुष्करिणीत्येव प्रोक्ता भगवता व्युत्पत्तिः इदानीं तस्य सम्मता। स्वामित्वस्य प्रधानात् इयं स्वामिपुष्करिणी। अहो तीर्थस्य महत्त्वं, दर्शनं पापनाशनम्। एतद्विषयवासिनः महाभागाः एते धन्याः इत्युक्त्वा पुल्लहृदम्बुजाः त्रिदशाः सर्वे ययुः।

शङ्खणोऽपि महाराजः सभार्यः हृष्टमानसः गिरेः अवरुह्य, तस्मात् स्वं देशं जगाम। तद्राज्यहारिणस्सर्वे परस्परजिगीषया ' मम राज्यमिदं राज्यं ममैवेत्युद्यतायुधाः अन्योन्यमाहतास्सन्तः परिक्षीणश्च तेऽभवन्। अस्माकं मध्ये न कस्यापि राज्यं, तत् तस्यैव भवेत् '। इति निश्चित्य मनुजाः राजभिः प्रेरिताः तदा गोदावरी तीरदेशे शङ्खणं मुदा ददृशुः।

हे शङ्खणराजन् ! तव राज्यं राजभिः तुभ्यं दत्तम्। आगच्छ ! तद्राज्यं भुङ्क्ष्व इत्युक्तः, महीपतिः स्वकं देश काम्भोजं नाम ययौ। ततः सर्वेऽपि राजानः शङ्खणं स्थापयित्वा, जलैः पूतैः अभिषिच्य, पुरात् ययुः। सोऽपि स्वदेशमासाद्य पूर्ववत् स्वामित्वं प्राप्य वेङ्कटेशप्रसादेन अकण्टकं राज्यं चक्रे। इति स्वामिपुष्करिणीतीर्थस्य महत्त्वम्।

**बोध प्रश्नाः**

१. राज्यभ्रष्टस्य शङ्खणनृपस्य राज्यप्राप्तिक्रमं विशदयत।

२. स्वामिपुष्करिण्याः महत्त्वं वर्णयत।

३. वेङ्कटाचलपरिसरान् वर्णयत।

४. स्वामिपुष्करिणीमुद्दिश्य श्रीनिवासोक्तिं विवृणुत।"

**सारांशः १-१३**

प्रियपाठकाः अस्मिन् खण्डे श्वेतवराहकल्पवृत्तान्तकथनं, ब्रह्मादिभिः वराहस्तुतिः, श्रीवैकुण्ठात् भगवत्क्रीडाद्रेः गरुडेनानयनं, देवादिकृता श्वेतवराहप्रार्थना, स्वामिपुष्करिणीमाहात्म्यं, क्रीडाद्रिप्रविष्टश्रीवराहदिव्यवैभवं, क्रीडाद्रेः कारणभेदेनानेकनामानि महर्षियज्ञवाट् प्रति भगवदागमनं, वृद्धस्य कुमारधारास्नानेन कौमारप्राप्तिः भ्रष्टराज्यस्य शङ्खणनृपस्य राज्यप्राप्तिक्रमः, वेङ्कटाचलवर्णनं, स्वामिपुष्करिणीवैभवं चोक्तनि।

**सहायकग्रन्थाः १-१४**

१.वराहपुराणान्तर्गतं वेङ्कटाचलमाहात्म्यम् - त्र.क्ल गोपालाचार्यैः सम्पादितम्।
२.वराहपुराणान्तर्गतं वेङ्कटाचलमाहात्म्यम् - रोम्पिचर्ल पार्थसारथिभट्टाचार्यैः सम्पादितम्।
३.वराहपुराणान्तर्गतं वेङ्कटाचलमाहात्म्यम् - च.ए. रघुनाथाचार्यैः सम्पादितम्
४.वराहपुराणान्तर्गतं वेङ्कटाचलमाहात्म्यम् - निर्णयसागरुमुद्रणालये प्रकाशितम्।

आचार्यप्रथमयवर्षम्, पुराणेतिहासः -द्वितीयपत्रम्

**निबन्धात्मकप्रश्नाः (प्रत्येकं २० /१५ अङ्काः)**

१. हिरण्याक्षवधप्रसन्नब्रह्मादिवराहस्तुतिं विलिखत।

२.स्वामिपुष्करिणीमाहात्म्यं वर्णयत।

३.कुमाराधारामाहात्म्यं प्रदर्शयत।

४.शङ्खणनृपस्य राज्यप्राप्तिक्रमं विशदयत।

विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२/१० अङ्काः)

१.श्वेतवराहकल्पवृत्तान्तं विशदयत।

२.श्रीवैकुण्ठात् भगवत्क्रीडाचलानयनं वर्णयत।

३.क्रीडाद्रेः अनेकनामानुवर्णनं कुरुत।

४.वृद्धस्य कुमारधारास्नानेन कौमारप्राप्तिं स्पष्टयत।

५.महर्षियज्ञवाटं प्रति भगवदागमनं वर्णयत।

६.क्रीडाद्रिप्रविष्ट श्रीवराहदिव्यवैभवं वर्णयत।

**लघुप्रश्नाः (प्रत्येकं ५ अङ्काः)**

१. क्रीडाचलं वर्णयत।

२. ब्रह्मादिभिः कृतां वराहस्तुतिं लिखत।

३.देवादिभिः कृतां श्वेतवराहप्रार्थनां लिखत।

४.क्रीडाद्रेः महिमाधिक्यं वर्णयत।

५.क्रीडाद्रेः अनेकनामानि लिखत।

६.यज्ञवाटिकायां भगवदुक्तिं स्पष्टयत।

७.वेङ्कटाचलवर्णनं लिखत।

# Unit-2

## प्रथमभागः (३९ to ४४ अध्यायाः)

**प्रस्तावना १-१**

श्रीवाराहपुराणान्तर्गते श्रीवेङ्कटाचलमाहात्म्ये प्रथमभागे प्रथमषडध्यायाः प्रस्ताविताः प्रथमखण्ड (द्वदत्य्य-१) रूपेण। अस्मिन् द्वितीयखण्डे एकोनचत्वारिंश अध्यायादारभ्य चतुश्चत्वारिंश अध्यायावधि षडध्यायेषु प्रस्ताविताः विषयाः उच्यन्ते।

तत्र एकोनचत्वारिंशे अध्याये आत्मारामाख्यविप्रस्य सम्प्रत्प्राप्तिक्रमः सनत्कुमारकथितव्यूहलक्ष्मीमन्त्रोद्धारक्रमः, श्रीवेङ्कटेशस्यालयवर्णनं, श्रीवेङ्कटेश्वरस्यं शरीरसौन्दर्यवर्णनं चोक्तानि।

चत्वारिंशे अध्याये कापिलादिसप्तदशतीर्थमाहात्म्यमुक्तम्। तत्र पाण्डवतीर्थमाहात्म्यम्, जराहरादितीर्थत्रयमाहात्म्यं, चोक्तम्।

एकचत्वारिंशे अध्याये श्रीवेङ्कटाद्रिं प्रति श्रीरामागमनं, ब्रह्मणा निर्लो नाम विप्रास्य वरप्रदानं वानरैः सह श्रीरामचन्द्रेण अञ्जनादेव्याः दर्शनं चोक्तानि।

द्विचत्वारिंशे अध्याये वैकुण्ठाख्यगुहाप्रविष्टवानरवृत्तान्तः, वैकुण्ठगुहाप्रभाववर्णनं चोक्तानि।

त्रिचत्वारिंशे अध्याये रावणादिपीडितदेवर्षीणां क्षीरार्णवब्रह्मलोकादिगमनवर्णनमुक्तम्।

चतुश्चत्वारिंशे अध्याये ब्रह्मादिनां श्रीवेङ्कटाचलागमनं, पुत्रार्थिनो दशरथस्य श्रीवेङ्कटाचलागमनं चोक्तानि।

**उद्देश्यम् १-२**

प्रियपाठकाः ! अस्मिन् खण्डे भवन्तः अधोलिखितान् बिन्दून् आलोचयिष्यन्ति।

- आत्मारामाख्यविप्रस्य सम्पत्प्राप्तिक्रमः
- सनत्कुमारकथितव्यूहलक्ष्मीमन्त्रोद्धारक्रमः
- कापिलादिसप्तदशथीर्थमाहात्म्यम्
- पाण्डवतीर्थमाहात्म्यम्
- जराहरादितीर्थत्रयमाहात्म्यम्
- श्रीवेङ्कटाद्रिं प्रति श्रीरामागमनम्
- वैकुण्ठाख्य गुहाप्रविष्टवानरवृत्तान्तः
- वैकुण्ठगुहाप्रभाववर्णनम्
- रावणादिपीडीतदेवर्षीणां क्षीरार्णवब्रह्मलोकादिगमनम्

• ब्रह्मादीनां श्रीवेङ्कटाचलागमनम्

• पुत्रार्थिनो दशरथस्य श्रीवेङ्कटाचलागमनम्

**आत्मारामाख्यविप्रस्य सम्पत्प्राप्तिक्रमः १-३**

मध्यदेशे आत्माराम इति कश्चित् द्विजः आशीत्। सः महाकुलप्रसूतः, देवब्राह्मणपूजकः। तस्य पिता च पृथिव्यां प्रथितः ब्राह्मणोत्तमः अत्यन्तविष्णुभक्तः , वेदवेदान्तपारगः। आत्मारामोऽपि विनीतः सर्वविद्वात्परिग्रहः। पितुः उपरते तस्य क्रमायातं धनं गतम्। वृत्तिश्च शिथिला जाता। न कुत्रचित् च पूज्यता। ठ महत्कुलप्रसूतस्य ममेयं वृत्तिरीदृशी ? मम पूर्वेषामेषा महत्यपकीर्तिः। किं कुर्मः ? कुत्र गच्छाम ? इति चिन्तामहाम्बुदौ मग्नः। शनैः असौ वेङ्कटाद्रेः समीपगं जगाम। तत्र कपिलेश्वरसन्निधौ कपिलं तीर्थमागत्य, तत्र तदारभ्य दशसप्तमतीर्थेषु स्नात्वा वरं गिरिं समारुह्य स्नानेन गतपापश्च चित्तनैर्मल्यसंयुतः अधित्यकायामासीनः चिन्ताशोकपरायणः तत्समीपगुहामध्ये ध्यानयोगपरायणं ज्वलनोपमं योगीन्द्रं सनत्कुमारं ददर्श। अदृष्टपूर्वो योगीन्द्रोऽयं बुधः सर्वं वेत्ति। किञ्चिद्हितमेनं पृच्छामि इति तं प्रणम्य, निरयाधिकदुःखेन दुःखितः पापकर्मकृत् त्वामहं शरणं प्राप्तः त्वं वेत्थ। मे हितं ब्रूहि इति तस्य सन्निधौ साष्टाङ्गं भूमौ पपात। सोऽपि चिरं कालं ध्यायन् मिताक्षरं व्याजहार। ' वत्स ! उत्तिष्ठ ! पुरा भवे घोरं पापं कृत्वा अस्मिन् भवे पक्वं तस्मिन् वृथा शोचसि किम् ? पुरा दानविघ्नाः प्रत्यूहाश्च प्रतिग्रहे । सुखस्थितानां पीडाश्च त्वया नानाविधाः कृताः। किञ्चित् किञ्चित् वा द्विजेभ्यः वित्तं त्वया न दत्तम्। गृहं क्षेत्रं पशुः धान्यं वस्त्रम् आभरणं वा एकमपि त्वया दानं न कृतम्। त्वया आचाराः न कृताः। अनाचाराः कृताः। प्रणतार्तिहरे विष्णौ प्रणताभीष्टदायिनि भक्तिलेशोऽपि न कृतः। कथं सौख्यं भविष्यति ? तथापि अस्ति उपायः। तव वदामि श्रुणु। इति कर्णामृतं वचः श्रुत्वा, कृताञ्जलिः प्राह ' दुःखसागरमग्नस्य मम पोत इवागतः। आतपकिलन्नसस्यानां यथा वृष्टिः तथा, निर्धनानां निधिः यथा तथा, रोगिणां यथा भिषक् तथा मया भाग्यलेशात् दयानिधिः आप्तस्त्वं लब्धः। घोरं पापिनं मां रक्ष ! दयया चक्षुषा ईक्षस्व इत्युक्तः, कारुण्याब्धितरङ्गितः योगीन्द्रः प्राह! महद्रहस्यं तत्त्वार्थं शृणु वत्स ! ते ब्रवीमि। सनत्कुमारकथित व्यूहलक्ष्मीमन्त्रोद्धारक्रमः श्री सनत्कुमार उवाच।

दयालोलतरङ्गाक्षी पूर्णचन्द्रनिभानना जननी सर्वलोकानां महालक्ष्मीः हरिप्रिया प्रारब्धस्यापि कर्मणः सर्वपापहरा सर्वसम्पत्प्रदायिनी लक्ष्मीः क्रीर्तिः जयेति च तस्याः व्यूहप्रभेदाः। तत्र या व्यूहलक्ष्मीः सा मुग्धा कारुण्यविग्रहा। अनायासेन सा लक्ष्मीः सर्वपापप्रणाशिनी, सर्वैश्वर्यप्रदा नित्यम्। तस्याः मन्त्रमिमं श्रुणु। 'वेदादिमायै मात्रे च लक्ष्म्यै नमः पदं वदेत्। परमेति पदमुक्त्वा लक्ष्म्यै इति पदं ततः विष्णुवक्षः स्थितायै, माया श्रीतारिका वह्निजायै इति मन्त्रोऽयमभीष्टार्थसुरद्रुमः।

(वेदमात्रे लक्ष्म्यै नमः परमलक्ष्म्यै विष्णुवक्षः स्थितायै माया श्रीतारिकावह्निजायै)

व्यूहलक्ष्मीः द्विभुजस्यात्। बद्धपाद्मासनप्रिया । श्रीनिवासाङ्गमध्यस्था। सुतरां केशवप्रिया। सर्वभावेन सत्वरं तामेव शरणं गच्छ इति मन्त्रमुपादिश्य अदृश्योऽभूत्। भीतोऽसौ विस्मितः सन्तोषपुलकाङ्कितः ' अद्य मे रजनी व्युष्टा शुभा जन्म च सत्फलम्। इति मन्त्रं शुचिर्भूत्वा जपन् पर्वतमारूह्य, तत्र तत्र झरान् पर्वतनिर्गतान् गिरौ पश्यन् शनैः दिष्ट्या महाद्भुतां स्वामिपुष्करिणीं आकाशादवरुह्यात्र स्थितां मन्दाकिनीमिव स्थितां विरजामिव पापघ्नीं पुण्यदां पुण्यसेवितां प्राप। तत्रात्मारामः शास्त्रे यथोदितं सस्नौ। स्नाने कृते तस्य देहो भारपाते यथा लघुः, ततः उत्थाय तत्पुण्यं वनमुत्तमं ददर्श।

**वेङ्कटेश्वरालयवर्णनम्**

तत्र सिद्धसेवितं महद्धामविमानं मण्डपानन्त्यसंयुतम् अनेकगोपुरोपेतम् अनेकरत्नखचितं तप्तहाटकनिर्मितं गन्धर्वनगरप्रख्यं दृष्टिचित्तापहारकं नृत्तवादित्ररुचिरं सुरसङ्घनिषेवितं महदद्भुतं किमिदं निर्जने वनेस्मिन् दृष्टम् इति विस्मयसम्फुल्लहृदयाम्भोरुहः तदा फलोदयः तद्दिव्यं विमानं द्रष्टुं ययौ। तत्र पुल्लाब्जनयनं शङ्खचक्रधरं वरावनतहस्तकं किरीटमकुटोपेतं कुण्डलाभ्यां विराजितं सर्वाभरणसम्पूर्णं पीताम्बरधरं विभुं कोटिकन्दर्पलावण्यं श्रीभूमिसहितं परं ' त्वमेव परमं धाम, त्वमेव परमा गतिः, त्वमेव जगतां स्रष्टा धाता हर्ता महेश्वरः इति शिवेनापि विधिनापि सदा स्तुतं वेङ्कटेश्वरं प्रणम्य, उत्थाय सन्तोषात् स्तोतुं गद्गदकण्ठधृत्' सर्वं त्वमेव जानासि, सर्वत्मानं त्वां नमाम्यहम् 'इति प्रणम्य, भूयोऽपि तूष्णीं पश्यन् स्थितोऽग्रतः सर्वज्ञः करुणारूपेः परात्परः श्रीनिवासः मुग्धं च तं ज्ञात्वा प्राह-

' माभैषीः, मा शुचः पुनः, त्वया कृतं सर्वं व्यूहलक्ष्मीं विमृश्य, तत् ज्ञान्तम्। दीर्घकालानुबन्धनम् ऐश्वर्यं सुमहद्दत्तम्। आरोग्यं ज्ञानशीलता दीर्घमायुश्च ते दत्तम्। हे द्विजश्रेष्ठ ! मया दत्तान् भोगान् बहूनपि भुङ्क्ष्व। एवं बृवति देवेशे पुनश्च तं प्रणनाम। भूयः उत्थाय पुण्यकाननं देवं च नापश्यत्। अतिभीतः परिक्रम्य सरस्तीरं विमृश्य च ' स्वप्नो मतिभ्रमो वापि माया वा सत्यमेव वा न जाने। हे देवदेवेश ! सत्यमेव भवेत् । इति ब्रूवन् द्विजः तस्मात् गिरेः अवरुह्य, वेङ्कटाद्रेः पर्यन्ते प्रसन्नधीः वासं चक्रे। सः द्विजः दीर्घकालेन यथेप्सितं सुखं रेमे। इति वाल्मीकिना पूर्वमुक्तं पुनः मया उक्तामिति शौनकादीन् प्रति सूतमहर्षिणा उक्तम्।

**बोधप्रश्नाः**

१.आत्मारामाख्यविप्रस्य सम्पत्प्राप्तिक्रमं विशदयत।

२.सनत्कुमारकथित व्यूहलक्ष्मीमन्त्रोद्धारक्रमं विवृणुत।

३.श्रीवेङ्कटेश्वरस्यालयं, शरीरसौन्दर्यं च वर्णयत।

## कापिलादिसप्तदशथीर्थमाहात्म्यम् १-४

वेङ्कटाद्रौ पुण्यवर्धनं तीर्थानां माहात्म्यं ब्रूहि इति पृष्टः सादरं मुनीनाहूय पुनः प्राह सूतः। तीर्थानां माहात्म्यं वक्तुं कृत्स्नशः वक्तुं न शक्यम्। ततः लेशतः उच्यते।

वेङ्कटाद्रेः अधः प्रदेशे उत्तमं कापिलं लिङ्गम्। पूर्वं महात्मना कपिलेन पाताले पूजितम्। कुतश्चित्कारणात् तत्तु परमपावनं लिङ्गं धरणीं भित्वा, तस्मान्निर्गतं सुरैः पूजितम्। सर्वदैवतैः प्रार्थितं तल्लिङ्गं भूमौ स्थापितम्। तदग्रे पूर्वं भुवमुद्भिद्य कपिला निर्गता। तद्बिलं कापिलं तीर्थं सर्वपापप्रणाशनम्। तदूर्ध्वप्रदेशे परमपावनं शक्रस्य तीर्थम्। अहल्यासङ्गसम्भूत शापमोक्षस्तु यत्र तत् शक्रतीर्थम्। तस्मादूर्ध्वं पुण्यविवर्धनं विष्वक्सेनतीर्थम्। वरुणस्यात्मजः यत्र सुदुस्तरं तपः कृत्वा हरेः सारूप्यं प्राप्य, सैनात्यमवाप तत् स्थलं विष्वक्सेनतीर्थम्। तदूर्ध्वं पञ्चायुधानां तीर्थानि भान्ति। तदूर्ध्वमग्निकुण्डं स्यात्, दुरारोहमुपर्यतः महाहत्यामोचनं पुण्यवर्धनं ब्रह्मतीर्थमस्ति ! ततः मुनीनां सप्तानां पुण्यतीर्थानि सन्ति ! तेषां तीर्थानामुत्तरोत्तरं दशाधिकफलम् एतेषां माहात्म्यं वक्तुं न शक्यते।

पुरा कश्चित् द्विजः तीर्थयात्राकृतोद्यमः अभवत्। तमाह कमलाधीशः ' हे द्विज ! किमर्थं गच्छसि ? अस्मिन् पुष्करशैलेन्द्रे दिव्यानि तीर्थीनि सप्तदश सन्ति। तत्राद्यं उत्तमं कापिलम्। हे विप्र ! एतेषु शास्त्रोक्तज्ञानपूर्वकं स्नात्वा, कृत्स्नतीर्थफलं पुण्यं त्वं प्राप्यसि। न संशयः। इति श्रुत्वा द्विजः, स्वप्ने श्रुतस्य विस्मितः उत्थाय निवृत्ततीर्थयात्रातः श्रीवेङ्कटाचलं प्राप्य, क्रमशः तेषु सप्तदशसु तीर्थेषु गतः स्नात्वा सर्वतीर्थयात्राफलमाप्तवानिति श्रुतम्। भुवनत्रये त्रिस्रः कोट्योऽर्थकोटी च तीर्थानि सन्ति ! तेषां प्रकृतिभूतानि तीर्थानि अस्मिन् हरेर्गेरौ वेङ्कटले सन्ति। हे मुनिसत्तमाः ! भूमिप्रदक्षिणे वाच्छा यद्यस्ति, सर्वतीर्थमयं सर्वपुण्यक्षेत्रमयं गिरिं वेङ्कटाह्वं गत्वा नरः तस्य प्रदक्षिणं कुर्यात्। भूमिप्रदक्षिणे पुण्यं यत् तत्पुण्यमवाप्नुयात्। वेङ्कटाचलशृङ्गाग्रे दृष्टमात्रे हलायुधः बलरामः कृत्स्नं तीर्थयात्राफलं प्राप्तवानिति श्रुतम्।

**पाण्डवतीर्थमाहात्म्यम्**

पाण्डवाः धर्मपुत्राद्याः कृष्णेन क्लिष्टकर्मणा उपदिष्टाः वेङ्कटाख्यनगोत्तमं समागम्य, क्षेत्रपालाभिरक्षिते कस्मिंश्चित्पुण्यतीर्थे अवसब्दमात्रकं स्नानपानादीन् कुर्वन्तः आसन्। तदा कदाचित् धर्मराजः उत्तमं स्वप्नं ददर्श यस्मात् अस्मिन् महातीर्थे वत्सरमात्रकं स्थितमित्यनेन पुण्येन योगेन क्षीणकल्मषाः भवन्तः युद्धे जयं तथा राज्यं क्रमागतं गमिष्यन्ति इति। तदा प्रभृति तत्तीर्थं पाण्डवतीर्थमिति बुधाः विदुः।

**जराहरादितीर्थयात्रामाहात्म्यम्**

जराहरतीर्थं, वलिघ्नं तीर्थं, रसायनतीर्थमिति त्रीणि तीर्थानि चिन्तामणिगिरौ वर्तन्ते। स्वामिपुष्करिणीपूर्वदेशे पर्वतगह्वरे द्वाविंशच्छरपाते किन्तु माया तिरोहितम्। विस्मयं कारकं तत् तीर्थं बुधाः अपि न जानन्त। कनकाचले अष्टानां लोहानां खनयः सन्ति। पुण्यकर्मणां नराणां युगभेदे न दृश्यन्ते। वेङ्कटाद्रौ परां भक्तिं वहन् गरिं गच्छति चेत् पङ्गुः जङ्घाल एव स्यात्। अचक्षुः पद्मलोचनः स्यात्। मूको वाचस्पतिः स्यात्। बधिरो श्रावी भवेत्। वन्ध्या बहुपुत्रा भवेत्। निर्धनः सधनो भवेत्। एतत्सर्वं गिरौ भक्तिमात्रेणैव भवेत् धृवम्। तत्त्वतः वेङ्कटाद्रेः स्वरूपं कः वेत्ति ? अयं श्रीनिवासगिरिः कदाचित्कनकाचलः, कदाचित् ज्ञानरूपः, कदाचिद्रत्नरूपकः कदाचित् भूषणोज्ज्वलः श्रीनिवास इव आभाति। कालभेदेन केषाञ्चित् प्राकृताचलरूपधृत्। तस्मात् अस्य गिरेः पुण्यं माहात्म्यं कः वेत्ति ? श्रुतेषु दृष्टेषु किञ्चिदुक्तम्।

**बोधप्रश्नाः**

१.कपिलतीर्थश्य माहात्म्यं वर्णयत।

२. कपिलादिसप्तदशतीर्थानि स्पष्टयत।

३. पाण्डवतीर्थमाहात्म्यं वर्णयत।

४. जराहरादितीर्थत्रयमाहात्म्यं वर्णयत।

## श्रीवेङ्कटाद्रिं प्रति श्रीरामस्यागमनम् १-५

वेङ्कटाद्रेः माहात्म्यं जनकर्णरसायनम्। सर्वलक्षणोपेतः सर्वशास्त्रविशारदः राजीवलोचनः दाशरधिः श्रीरामचन्द्रः पुरा रावणवधाय गमनसमये लक्ष्मणेन हनुमता, महता सुग्रीवेण श्रीवेङ्कटाचलं निर्जगाम। स्वामिपुष्करिणीतीर्थे स्नात्वा पश्चात् रणे रिपुं रावणं सगणं हत्वा जयमापेति श्रुतम्। तस्मात् ऋण्यमूकाचलात् बहुभिः वानरैः वृतः रावणस्य वधार्थाय सकार्मुकः कृतोद्योगः शेषाचलसमीपे तु यदा रामः समागतः तदा सति अञ्जनादेवी महात्मनः वायुसूनोः जननी रक्तान्तलोचनं रामं पुरतः गत्वा नमस्कृत्वा वचनमिदमब्रीवीत् ' हे महाबाहो त्वदागमनाय प्रतीक्षन्ती तिष्ठाम्यस्मिन् गिरौ। मुनयोऽपि कानने त्वदागमनकाङ्क्षया सततं तपः कुर्वन्ति। हे सुव्रत ! तान् सर्वान् समनुज्ञाप्य गन्तुमर्हसि ' इत्युक्तः रामोऽपि हनुमन्मातरं प्रति प्रह -

' मयि तत्र समागते कालात्ययो भवेत्। ममेदानीं कार्यस्य महती त्वरा। पुनरागमने तथा भवतु' इति राघवेण एतद्वाक्यं श्रुत्वा महामतिः हनुमान् प्रणतो भूत्वा, एतद्वाक्यमुवाच - सर्वदा यत्र कुत्रापि स्थातव्यं भवता, अतः अत्र स्थातव्यम्। यस्मात् तपस्विनां वानराणां महासेना श्रान्ता। सदा पुष्पफलद्रुमः अयं (वेङ्कटाद्रिः) मार्ग एव ! बहुकन्दरसानुमान् बहुप्रस्रवणोपेतः सुस्वादुकन्दमूलः अयमञ्जनाख्यः महागिरिः । गिरीकन्दरे वृक्षेषु बहूनि मधूनि सन्ति। हे महाबाहो ! सर्वं वेत्थ ! यथेच्छसि तथा कुरु ' इत्युक्तः श्रीरामः प्रहसन् ' हे अञ्जनासूनो ! जानेऽहम्। तथापि तव वचनं श्रोतव्यं, हे महाबाहो ! हरीश्वर ! त्वमग्रे गच्छ ! इत्युक्त्वा, तां वाहिनीं च कर्षन् पर्वतमाययौ।

## ब्रह्मणा निर्लोमाय वरप्रदानम्

नागकेसर, मालूर, पुन्नाग, तरुशोभितं, चम्पकाशोकवकुळचूतकिंशुकराजतं, मयूरशारिकालापैः कोकिलानां स्वनैरपि शुकमञ्जुलनादैश्च कपोतस्वनहङ्कृतैः फलपुष्पैश्च शोभितं वेङ्कटाख्यं नगोत्तमम्। तत्र निर्लोमा नामतः वेवविदां वरः कश्चिद्विप्रः स्वयम्भुवं समुद्दिश्य, ब्रह्मलोकजिगीषया धर्मात्मा पर्वतोत्तरदेशतः तपश्चकार। भगवान् ब्रह्मा तं द्विजसत्तममागत्य, ससौमित्रं रामं दृष्ट्वा ब्रह्मलोकमवाप्स्यसि। इत्युक्तः। ब्रह्मणोक्तरीत्या, परात्परं रामं दृष्ट्वा फलमूलाशनैः सम्यक् पूजयित्वा, तमब्रवीत् 'अद्य मे साफलं जन्म त्वन्मुखाम्भोजदर्शनात्। हे स्वामिन् ! चिरकालार्जितम् उत्तमं तपः फलितम्। ब्रह्मलोकगमनाय मामनुज्ञापय । इत्युक्तः। धर्मात्मा स तु ' भो द्विज ! तथैवाचर ।' इत्युक्त्वा, तं नगोत्तममारुरोह।

**प्रमुखवानरैः श्रीरामचन्द्रेण अञ्जनादेव्याः दर्शनम् -**

तस्मिन् वेङ्कटनगोत्तमे केषाञ्चित् यक्षाणां शापमोक्षं च दत्वा, श्रीरामः पुण्यवर्धनम् अञ्जनादेव्याः आश्रमम् आकाशगङ्गानिकटे प्रतिपेदे महामनाः। तथा सम्यक् पूजितः, तस्यै वरोत्तमं दत्वा, तां महाभागामपृच्छ्या, स्वामिपुष्करिणीं ययौ। तत्र रामः महातेजाः सौमित्रिः मारुतात्मजः सुग्रीवः अङ्गदः जाम्बवान् नीलश्च सर्वत्र विजयप्रदे महातीर्थे स्नानं चक्रुः।

श्रीरामः फलमूलानिचानीय धर्मभृतां मुनिभ्यः शास्त्रवर्त्मना तत्रैव दानं चकार। स्वामिपुष्करिण्याः नैर्ऋतिदिग्भागे पृथक् पृथक् कुटीं कृत्वा सुस्वादुफलमूलानि मधूनि सुबहूनि चानीय वायुपुत्रः तं राघवं पूजयामास। ततः श्रीरामः संप्रहृष्टः, सुग्रीवप्रमुखैः सह सर्वगेहे इव तत्र सुखं न्यवसत्।

वानराः महात्मानः गोलाङ्गूला महाबलाः तत्र सर्वतः पुष्पाणि मूलानि फलानि च मधूनि स्वाधुतीर्थानि अनेकशः भक्ष्यजातानि भक्षयित्वा मदोन्मत्ताः सहस्रशः तत्र चेरुः। आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः गिरेः शृङ्गाच्च तत्र वृक्षात् वृक्षं वनाद्वनं चेरुः ते वानराः सर्वे मुदिताः बलगर्विताः केचिद्वानराः वानरान् रुरुहुः।

काश्चित्प्रदेशे वानरोत्तमाः अन्यान् वानरान् गृहीत्वा कर्षन्तिस्म। केचित कर्णं कर्णं चुचुम्बिरे। रावणं दृष्ट्वैव ससुहृद्गणं हन्याम इति, लङ्कां समूलमुत्पाट्य त्रिकूटं महागिरिं आनेष्यामो वयं बहुनक्रसमाकुलं सिन्धुं तरामः। बाहुवेगेन चन्द्रभास्करौ गृह्णीमः। रामार्थे भूरुहान् गिरीन् सर्वानपि पाटयामः। पातालं वा महर्लोकं वा रसातलं वा अविनयान्वितः रावणः यत्र तिष्ठति तत्र गच्छामः। लोककण्टकं सगणं तं शूरं हन्मः। परमधार्मिकः रामः रावणस्य शिरच्छेदे चिरायते इति ब्रूवन्तः सर्वे वानराः पर्वतोपमाः दिव्ये तस्मिन् महापुण्ये वेङ्कटाद्रौ वनेचराः कोटिकोट्युर्बुदाः परार्धाः बलशालिनः परस्परमसम्बाधं सुसुखं गिरौ न्यवसन्। अहो गिरिप्रभावोऽयं बुधैः कथं वर्णनीयः ?

**बोधप्रश्नाः**

१.श्रीवेङ्कटाद्रिं प्रति श्रीरामागमनं वर्णयत।

२. ब्रह्मणा निर्लोमस्य वरप्रदानं विशदयत।

३. वानरैः सह श्रीरामचन्द्रस्य अञ्जनादेव्याः दर्शनं स्पष्टयत।

४.वेङ्कटाद्रौ वानराणां चेष्टाः वर्णयत।

## वैकुण्ठगुहाप्रविष्टवानरवृत्तान्तादि वर्णनं १-६

स्वामिपुष्करिण्याः ईशान्यभागतः गजः, गवाक्षः, गवयः, शरभः, गन्धमादनः , मैन्दः, द्विविदः, महामतिः सुषेणश्च वानराः तमोरुद्धां काञ्चिद्गुहां प्रविष्टाः। सिंहतुल्यपराक्रमाः उन्निद्रनेत्राः सर्वेऽपि तमसाविष्टां तां गुहां सुदूरं जग्मुः। तत्र सूर्यकोटिरिवोदिता महाज्योतिः ददृशे। ज्योतिर्गणानां तटितां मिलितानामिवाबभौ। तत्र काचित्पुरा रम्या तप्तहाटकनिर्मिता कवाटतोरणवती रम्योद्यानशतैर्युता स्फटिकोपलवत् शुद्धजलनद्या समावृता, रत्नमाणिक्यवैडूर्यमुक्तानिर्मितगोपुरा अनेकमण्डपैः युक्ता, प्रासाद शतसङ्कुला महावीथीशतोपेता रथमातङ्ग संयुता, वरनारी गणोपेता, सर्वमङ्गलशोभिता दृष्टा। तत्र सर्वे शङ्खचक्रधराः चतुर्भुजाः, सशुक्लमाल्यवसनाः सर्वाभरण भूषिताः, दिव्यचन्दनलिप्ताङ्गाः परमानन्दपूरिताः स्थिताः। तन्मध्ये सुमहद्दिव्यं विमानं सूर्यसन्निभम् अत्युन्नतमहामेरुशृङ्गतुल्यं मनोहरं, बहुप्रकाशसम्पन्नं मणिमण्डपसंयुतं भेरीमृदङ्गपणवमर्दलध्वनिशोभितं, नृत्तवादित्रसम्पन्नं किन्नरस्वनसंयुतं पूर्णचन्द्रनिभाननं पुरुषं तत्र ददृशुः। सः चतुर्बाहुः, उदाराङ्गः, शङ्खचक्रधरः, परः पीताम्बरधरः, सौम्यासीनः काञ्चनासनः पणामणिमहाकान्तिविराजितकिरीटी, भोगिभोगेसमासीनः, सर्वाभरणभूषितः, आसनोपरि विन्यस्तवामेतरकराम्बुजः, दक्षिणं पादमुद्धृते वामजानुनि प्रसार्य वामहस्ताब्जं प्रसार्य, श्रीभूमिभ्यां निषेवितः, नीलया देव्या सेवितं, वैजयन्त्या विराजितः, श्रीवत्सकौस्तुभोरस्कः, वनमालविभूषितः, कृपारसतरङ्गौघपूर्णनेत्राम्बुजद्वयः,शशिप्रभासमच्छत्रः, चामरव्यजने शुभे हस्ताभ्यां धारयन्तीभिः नारीभिः मुदा सेवितः।

तं महापुरुषं दृष्ट्वा ते वानराः सर्वे विस्मिताः शुभलोचनाः। अत्रान्तरे महाभागः परमद्भुतः पुरुषः चतुर्भुजः दण्डहस्तः त्वरितविक्रमः दण्डमुद्यम्य तान् सर्वान् भर्त्सयामास। तदा ते सर्वे वानराः भीताः गिरिगह्वरात् नर्जग्मुः। सहसा निर्गत्य तेभ्यः वानरेभ्यः यथातथा दृष्टं प्रोचुः। ततः वानराः सर्वे ' रावणस्तु महामायी, कामरूपी च वञ्चकः। रावणो वा अन्यो वा प्रयत्नतः शोधनीयः।' इत्युक्त्वा ते वानराः सर्वे सम्भ्रमात् सम्भूय यत्र पूर्वं गुहादृष्टा तत्रागच्छन्। तत्र नगरीं चिह्नं वादृष्टपूर्वकं नापश्यन्। भ्रमात् तमञ्जसाशैलं सर्वतः विचिन्वन्तः। भ्रम इत्येव निश्चित्य वनौकसः तूष्णीमासन्।

ततः प्रभाते विरते राजीवलोचनः रामः लक्ष्मणेन सह धीमता वानरेन्द्रेण सहसैन्यैः महातेजाः अरिजिगीषया प्रतस्थे। महाबलः श्रीरामचन्द्रः रावणं युद्धे जित्वा, सीतां प्राप्य, पुनः अयोध्यामभ्येत्य भ्रातृभि सहितः सुखेन स्थितः। स्वामिपुष्करिणीतीर्थमाहात्म्येन रामः राज्यं स्वयं प्राप।

**बोधप्रश्नाः**

१.वानरैः वैकुण्ठगुहायां दृष्टं वर्णयत।

२. वैकुण्ठगुहाप्रविष्टवानरवृत्तान्तं विशदयत।

**वैकुण्ठगुहाप्रभाववर्णनम् १-७**

वैकुण्ठाद्रौ वानरोत्तमैः दृष्टा सर्वा देवमाया। सा गुहा मुनियोगिभिः अपि दुर्ज्ञेया। विष्णुना पूर्वं लीलया वानराणां प्रकाशिता। तस्यां गुहायां दृष्टाः शङ्खचक्रधरा मुक्ताः नित्याः परमानन्दरूपिणः। ते अविर्भूतगुणाः ब्राह्ममानन्दं भुञ्जते। ते कामरूपाः लोकान् भगवता सह सञ्चरन्तः आनन्दरूपाः ब्रह्मणः कैङ्कर्यं कुर्वन्तः ब्रह्मणा परमेष्ठिना सततं तत्र वसन्ति। यदा यदा कलिः कालः यदा वा जनता गिरौ तदा गुहायां वसिष्यन्तीति श्रुतम्। एवं प्रभावः शेषाद्रिः जगन्मयः वसत्यस्मिन्। नित्यैः मुक्तैश्च सूरिभिः लीलया युक्तः क्रीडते।

नीलमेघनिभं श्यामं नीलोत्पलविलोचनं नीलाद्रिशिखरस्थं सुस्थितं तं भजामि इति सूतमहर्षिः उक्तवान् यत् वीतकल्मषैः वैकुण्ठगुहाख्यानं श्रुतं चेत् कीर्तिकरम्, आयुः प्रदं, पुत्रपौत्राभिवृद्धिकरं च भवति। सकलचेतनसमष्टिस्वरूपस्य गजेन्द्ररक्षकस्य वेङ्कटाचलपतेः प्रभावः दधाभक्तिभिः ज्ञातव्यः, ससेवनीयः इति शम्।

**बोधप्रश्नाः**

१.वैकुण्ठगुहाप्रभावं वर्णयत।

२. वैकुण्ठगुहाप्रभावज्ञानफलं स्पष्टयत।

**रावणादिपीडितदेवर्षीणां क्षीरार्णवब्रह्मलोकादिगमनम् १-८**

विश्वविश्रुतविश्वार्थविबोधनविचक्षणः सूतमहर्षिः वेङ्कटाद्रौ प्रत्यक्षगोचरस्य अञ्जनाद्रेः सर्वाभीष्टफलप्रदत्वं प्राह मुनीन् प्रति। पुरा कदाचित् जाबालिः, काश्यपः गौतमः, अगस्त्यः, वामदेवः, शतानन्दः, सनकसनन्दनमहायोगिनः देवेन्द्रादयः देवताश्च हिरण्यकशिपोः वंशसम्भवैः दुरात्मभिः दैत्यैश्च पीडिताः विष्णवे तन्निवेदितुं सम्भूय अव्ययं विष्णुं निर्जग्मुः। क्षीराब्धेः उत्तरं तीरं गत्वा देवं जनार्दनं ते सराश्च अगस्त्याद्यः विविधैः स्तोत्रैः तुष्टुवुः।

हे क्षीरोदशायिन्। भगवन् ! सर्वकारणकारण ! सूक्ष्मप्रकृतिसंलीनजीवतत्त्वैर्युत। प्रभो। सृष्टिकाले भवानेव, त्वत्तः अन्यन्न विद्यते। स्रष्टा त्वमेव। सर्वस्य जङ्गमस्थावरात्मनः स्रष्टा त्वमेव। जगत्पालनकर्म च अङ्गीकृत्य जगद्रूपविष्णो ! त्वमेव दृश्यसे। नमोऽस्तु ते। हे मधुसूदन ! निश्चितं श्रियासार्थं शेषे शेते। जगत्पालनकर्मणि सदा जागरूकः त्वम् अस्मान् किमर्थं विचारयसि ! षड्गुणाढ्य ! परमपूज्य ! दयामय ! भगवन् विष्णो ! प्रसीद ! प्रसीदत्वम्। एतस्मिन्नन्तरे कश्चित् शङ्खचक्रगदाधरः व्योम्निचागत्य मुनीन् एवं श्रूयतामिति अब्रवीत्। ' मायावी कमलापतिः भूमौ गिरौ क्वापि आस्ते । सद्भिरुष्माभिः सनकादिभिः किमर्थमातम् ? तत्रैव यूयं गच्छध्वमिति चोक्त्वा पुनः ययौ। सुरसत्तमाः तरसा तस्मात् देशात् निवृत्य, सम्भूय, ते विचार्य अय ' किमर्थं कमलापतिः सनातनः क्षीराब्धिमध्यं त्यक्त्वा भूमौ वसेत् ? इति सञ्चित्य, मुनयस्सर्वे योगिनः त्रिदशाः अपि उत्तमं लोकं वैकुण्ठं ययुः। गच्छन्तः मार्गमध्ये नारदं मुनिं महतीं वादयन्तं (स्फटिकसन्निभं वीणां) ददृशुः। कर्पूरधूलिसदृशपुण्ड्रोद्भासितविग्रहं वैकुण्ठलोकादायान्तं तं नारदमुनिं दृष्ट्वा मुनयः अब्रुवन्। 'पुण्यात्मन् ! नारदा क्वासि ? तव त्रैलोक्यं विदितम्। त्रिषु लोकेषु तवाविदितं न किञ्चित् विद्यते। लक्ष्मीशः क्व वा वसति ? हे विद्वन् ! महामुने ! शंस ! मायिनः केचन दैत्याः श्रीशैलस्य समीपे योगिनः मुनीन् तापसान् मनुजान् तीव्रं ब्राधन्ते। रावणः सगणः बलगर्वितः नित्यं बाधते। एतेषां निग्रहे शक्तः महाबलः

विष्णुरेव। तमेव शरणं यामः। स तु कुत्र वसेत् ? इति पृष्टः मुनीन्द्रः नारदोऽपि तान्मुनीन् प्रतिपूज्य, दिव्यकल्याणविग्रहं नारायणं द्रष्टुमहं परमानन्दकारणं परमं धाम आगमम। तदा तत्र कश्चित्समभ्येत्य मामुक्तवानिदं - ' भूमौ क्वापि गिरौ विष्णुः लक्ष्म्या सह विमोदते ' इति वचः श्रुत्वा सम्यक् इहागच्छामि। अतः वयं सर्वे परं ब्रह्मलोकं गमिष्यामः। सर्वलोकपितामहः स एव सर्वं वेत्ति। इत्युक्त्वा, नारदेन सह मुनयः योगिनः सुराः सर्वेऽपि शीघ्रं ब्रह्मलोकं ययुः। ब्रह्मलोकं समागम्य ते अमितौजसः चतुर्मुखं चतुर्बाहुं ज्वलन्तमिव पावकं ददृशुः। वेदशास्त्रौघं सम्भूय मूर्तिमन्तमिव स्थितं गायत्र्या सावित्र्या सरस्वत्या च सेवितं किन्नरोरगगन्धर्वसिद्धसङ्घनिषेवितं वेदैः सविग्रहैश्चैव शास्त्रैरपि च सेवितं, दिशपालैः सेवितं च परमासने आसीनं तं चतुर्मुखमुपसृत्य देवाः मुनयोऽपि च प्रणेमुः। आसनेषूपविष्टाः ते सुराः मुनयोऽपि च स्वागतप्रश्नैः पृष्टाः इदं वचनमब्रूवन्। हे स्वामिन्। तवैव कृपया अस्माकं न कुत्रापि दुरत्ययः। सर्वलोकपितामह ! सर्वथा मङ्गलम्। किन्तु बाध च महती रावणस्य दुरात्मनः। दैत्याः केचन सम्भूताः श्रीशैलस्य समीपतः कर्मनुष्ठानतत्परान् सर्वमनुजान् बाधान्ते। अमलाः मुनयः सर्वे तपो व्ययभयात् सहन्ते। रावणचेष्टितं तं सोढुमितः परमशक्यम्। मायावी भगवान् विष्णुः सर्वोपायविशारदः सर्वशक्तिधरश्च सः एतेषां हनने शक्तः। भुवनत्रये कुत्रापि तं विष्णुं न पश्यामः। त्वमेव गतिरस्माकम्। महाभयात् अस्मात् त्राहि इति योगिवरैः तापसैः बुधोत्तमैः शक्रपुरोगमैश्च ईरितः ध्यात्वाथ देवः कमलासनोऽपि देवान् मुनिपुङ्गवान् च प्रोवाच।

**बोधप्रश्नाः**

१.रावणादिपीडितदेवर्षीणां क्षीरार्णवब्रह्मलोकादिगमनं वर्णयत।

२.देवमुनिगणं प्रति नारदस्य वचनानि स्पष्टयत।

**ब्रह्मदीनां श्रीवेङ्कटाचलागमनं १-९**

ब्रह्मा उवाच !

हे सुराः ! पुरा रावणेन अततीव्रं तपस्तप्तम्। तदा तेन घोरेण तपसा अवध्यत्वं लब्धम्। मानुषेभ्यः वधः निश्चितः। तस्योपयमहं वक्ष्ये। विष्णुरेव परागतिः। स चेदानीं भूमौ श्रीवेङ्कटाभिधे गिरावस्ते। दैत्यौघानां निबर्हणे सर्वैश्च सः प्रार्थनीयः। अहमप्यागमिष्यामि। गम्यतामविलम्बतः। अचिराद्द्रष्टुमशक्यम्। इतस्ततः विचेतव्यम्। सानवः सरितश्चापि निर्झराश्च गुहा अपि सदा सर्वैः युष्माभिः विशेषतः विचेतव्याः। तस्यात्यन्तप्रियतमो भूधरः वेङ्कटाभिधः। शुकपक्षिमृगादीनां रूपं धृत्वा परात्परः तत्र पर्वते सूरिभिः रमया सार्थं क्रीडते। गिरिप्रदक्षिणे तस्य महती प्रीतिः वर्तते। स भूधरः प्रदक्षिणविधानेन विचेतव्यः। इक्ष्वाकुवंशप्रभवः महान् राजा दशरथः वेङ्कटाद्रिं समागत्य पुत्रार्थी स्वामिपुष्करिणीतटे उत्तमं तपमाचरिष्यति। तस्य राज्ञः श्रियः पतिः स्वं रूपं दर्शयिष्यति। ब्रह्मणा इत्युक्ता, मुनयश्च दिवौकसः योगिनोऽपि महात्मानः तस्मात् लोकाद्विनिर्ययुः। निर्गत्य सहसा शेषभूधरेन्द्रं समाश्रिताः।

नानामृगगणाकीर्णम् अनेकझषसङ्कुलं तालहिन्तालपुन्नागचम्पकाशोकशोभितं कुन्दमन्दारपनसपूगकैतकसंयुतं, तिमिशैः चिरिबिल्लैश्च नक्तमालैश्च पुष्पितैः चम्पकैः पनसैः आम्रैः नारिकेलैश्च शोभितं, कोविदारकरञ्जैश्च पाटलाश्वत्थपादपैः प्लक्षओदुम्बरजम्बूभिः, कपित्थकलिभूरुहैः चम्पकैः सिन्धुवारैश्च रक्तचन्दनैः शोभितं भूलोकदुर्लभैः द्वीपसम्भवैः पादपैरपि, खर्जूरैः किंशुकैश्चैव तथा स्यन्दनैः पद्मकैः अञ्जोलैः मुचुकुन्दैः शिंशुपाभूरुहैः , तथा मधूकशाल्मलीभिश्च, पुष्पिताभिः शोभितं, सर्वकालफलैः वृक्षैः स्रवन्मधुसुशोभितैः, मत्तकोकिलसन्नादैः, षट्पदस्वनसम्भ्रमैः शुकमञ्जुलसन्नादैः शारिकालापविभ्रमैः, मयूराणां निनादैश्च शोभितप्रस्थसानुकम्, अन्येषामपि दिव्यानां पक्षिणां मञ्जुलस्वनैः शोभितानन्दजनकं मनोहरं गिरिशृङ्गं, मत्तमातङ्गशरभसिंहव्याघ्रनिषेवितं, महाक्रोडशतैश्चैव महिषैः वनवासिभिः वृकैः भल्लूकमुख्यैश्च वानरैश्चापि सङ्कुलं कस्तूरीमृगसंघैश्च कृष्णसारैश्च शोभितं, चमरीमृगसंघैश्च महामृगैः गवयैश्च शोभितं पर्वतश्रेष्ठं वनमार्जारसङ्कुलं, गुहाशतसमाकीर्णं सिद्धगन्धर्वसेवितं, गन्धर्वाणां नारीणां किन्नराणां च अप्सरस्सु मुख्यानां मनोहरैः वीणानादैः ह्लादयन्तं हृदयाम्बोजं पश्यतां हर्षवर्धनं, वेगवता गरुत्मता आनीतं पर्वतोत्तमं शुद्धचेतसः मुनयः योगिनः देवाः ददृशुः।

श्रीवेङ्कटेशं शैलं दृष्ट्वा बुधाः श्रमंमपनिन्युः। शृङ्गाच्च शृङ्गं समारुह्य, वनाद्वनमितस्ततः नदीषु पुण्यतोयासु ह्रदेषु सरसीषु च वापिकासु प्रवाहेषु तथा पुष्करिणीषु च स्नात्वा स्नात्वा, सादरं श्रीनिवासं पुष्पैः समभ्यर्च्य, सुसमाहिताः फलान्यमृतकल्पानि निवेद्य, तत्र न देवं कञ्चित्, नालयं

न च गोपुरं ददृशुः योगिनः तत्र योगनिष्ठान् मुनीनपि। तत्र महौजसः स्थितान् मुनीन् दृष्ट्वा तत्र चेरुः। लोकोत्तरातिलावण्यं, नानावर्णं मनोहरं मृगं पक्षिणं वा दृष्ट्वा गन्धर्वं वा दिवौकसः दृष्ट्वा असावेव हरिश्चेति विस्मयोत्फुल्लमानसाः तस्मिन् गिरौ दिदृक्षासक्तचेतसः अनुजग्मुः।

**बोधप्रश्नाः**

१.ब्रह्मादीनां श्रीवेङ्कटाचलागमनं वर्णयत।

२. वेङ्कटाद्रौ वृक्षमृगपक्षिविशेषान् स्पष्टयत।

## पुत्रार्थिनो दशरथस्य श्रीवेङ्कटाचलागमनम् १-१०

तस्मिन् काले धर्मात्मा प्रभुः राजा दशरथः अयोध्यायां महायशाः मेदिनीं कृत्स्नां शशास वर्णाश्रमाचारयुताः धर्मेण प्रजाः पालयन् राजा भूरिविक्रमः चिरकालं महीं बुभुजे। शुचिस्मेरमुश्वाम्भुजं कुमारस्य न चाद्राक्षीत्। दुःखात् महातेजसं ब्रह्मर्षिं वशिष्ठमब्रवीत् ' हे मुने ! अस्य वंशस्य पुरोहितस्य विशेषेण भवान् चिरं लालस्य मानस्य वंशकरः सुतः नासीत्। हे ब्रह्मन् ! पापिनो मम तु मया कृतं पापं बहु। कस्मात् पापस्य निष्कृतिः ? कथं पुत्रो भविष्यति ? इति प्रोक्तः वसिष्टस्तु क्षणं ध्यात्वा, प्रसन्नधीः भगवान् ऋषिः वसिष्ठः नृपं धीरम् एनं प्राह-पुण्यश्लोकस्य भवतः कथं पापं भविष्यति ? तथापि ! हे राजेन्द्र ! पुत्रप्राप्तिविरोधकृत् दुष्कृतं किञ्चिदस्तीति ध्यानेन प्रतिभाति मे । तस्य पापस्य शान्त्यर्थं तथा पुत्राणां प्राप्तये क्षीराब्धितनयापतिः श्रीवेङ्कटाधीशः सेव्यः इत्युक्तः, राजापि प्राह - हे ब्रह्मन् ! श्रियः पतिः विष्णुः इदानीं कुत्र वर्तते ? प्रभुः मया कथं दृश्यः ? इति पृष्टः महामुनिः वसिष्ठोऽपि पुनः प्राह- ' हे राजन् महाभाग ! श्रुणु ! भागीरथ्याश्च दक्षिणे शतद्वयेयोजनानां शैलो वेङ्कटः वर्तते। सुवर्णमुखरीतीरात् उत्तरे क्रोशमात्रके अनेकपुण्यतोयैश्च पुण्यैश्चैव महाह्लदैः अनेककिन्नरीभिश्च शोभितः पर्वतोत्तमः। अयं पर्वतेन्द्रस्तु दिव्यः। पुनः प्राकृतो गिरिः। तस्य शैलस्य स्वरूपं न जानन्ति मानुषाः। वैकुण्ठपुरवासिनः देवस्य नारायणस्य सूर्यवैकुण्ठनाकेभ्यः प्रियोऽयं वेङ्कटाचलः। श्रीनिवासः श्रियासह नित्यं तस्मिन् रमते। तत्र हरेः दर्शनार्थं अमलाः मुनयः यजन्ते। योगिनः त्रिदशाश्चापि सन्ततं तपः कुर्वन्ति। स्वयम्भूः भगवानु ब्रह्मा तस्मिन् गिरिवरोत्तमे लोकानुग्रहसिद्ध्यर्थं महत् तपः करिष्यति। महद्धरिः तस्मै स्वस्वरूपं दर्सयिष्यति माधवः दर्शनादेव सर्वेभ्यो अभीष्टं दास्यति। कूलङ्कषः महौदार्यः

गुणसिन्धुः श्रियः पतिः गोविन्दः तवापि अभीष्टं दास्यत्येव। न संशयः।

वशिष्ठेन एवमुक्तः चक्रवर्ती गुणाकरः राजा दशरथः दृष्टः प्रसन्नमुखपङ्कजः वेङ्कटाख्यं गिरिं प्रति वसिष्ठेन प्रययौ। गङ्गां रम्यां गोदावरीम् अनन्तरं कृष्णां वेणीं मलापहारिणीं भद्रां तुङ्गां पम्पां मनोहरां भवनाशीं च सम्प्राप्य स्नात्वा, स्नात्वा महाभ्यः तुङ्गशृङ्गसमन्वितं वेङ्कटाद्रिं ददर्श। ' उद्यानां नन्दनं चैत्ररथं सम्भूय तिष्ठति । इत्युत्प्रेक्ष्य, मनोहारिवृक्षगुल्मलतायुतं युवानञ्च महामेरुमिव चक्षुष्पदं गिरिम् आरुह्य, नयनानन्दकं हृदयाह्लादकारकम् आरुह्य, निर्झरेषु तटाकेषु सरस्सु सरसीषु च नदीषु देवखातेषु तथा पुष्करिणीषु च स्नात्वा, निर्मलसर्वाङ्गः क्षालिताघो महाबलः चित्तस्य संशुद्धिं लब्ध्वा पीतामृत इव प्रभुः सुतोत्सवं भोक्तुकामः णहाराजा मुमुदे।

**बोधप्रश्नाः**

१.पुत्रार्थिनो दशरथस्य श्रीवेङ्कटाचलागमनं विशदयत।

२. दशरथेन दृष्टं वेङ्कटाद्रिं वर्णयत।

**सारांशः १-११**

प्रियपाठकाः अस्मिन् खण्डे आत्मारामाख्यविप्रस्य सम्पप्राप्तिक्रमः, सनत्कुमारकथित व्यूहलक्ष्मीतन्त्रोद्धारक्रमः, वेङ्कटेश्वरालयवर्णनं, कपिलादिसप्तदशतीर्थमाहात्म्यम्, पाण्डवतीर्थमाहात्म्यं, जराहरादितीर्थयात्रामाहात्म्यं, श्रीवेङ्कटाद्रिं प्रति श्रीरामागमनं, ब्रह्मणा निर्लोमाय वरप्रदानं, प्रमुखवानरैः श्रीरामचन्द्रेण अञ्जनादेव्याः दर्शनं, वैकुण्ठगुहाप्रविष्टवानरवृत्तान्तादिवर्णनं, वैकुण्ठगुहाप्रभाववर्णनं, रावणादिपीडितदेवर्षीणां क्षीरार्णवब्रह्मलोकादिगमनं, ब्रह्मादीनां श्रीवेङ्कटाचलागमनं, पुत्रार्थिनो दशरथस्य श्रीवेङ्कटाचलागमनं इत्यादयः विषयाः विवृताः।

**आदर्शप्रश्नाः  १-१३**

निबन्धात्मकप्रश्नाः (प्रत्येकं २०/ १५ अङ्काः)

१.वेङ्कटाद्रौ सप्तदशतीर्थमाहात्म्यं वर्णयत।

२. वेङ्कटाद्रिं प्रति श्रीरामगमनं विशदयत।

३. ब्रह्मादीनां श्रीवेङ्कटाचलागमनं स्पष्टयत।

४. दशरथश्य श्रीवेङ्कटाचलागमनं वर्णयत।

**विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२/ १० अङ्काः)**

१. आत्मारामाख्यविप्रस्य सम्पत्प्राप्तिक्रमं विशदयत।

२. व्यूहलक्ष्मीमन्त्रोद्धारक्रमं स्पष्टयत।

३. श्रीरामचन्द्रेण अञ्जनादेव्याः दर्शनं विवृणुत।

४. वैकुण्ठगुहाप्रविष्टवानरवृत्तान्तं विशदयत।

५. वैकुण्ठगुहाप्रभाववर्णनं लिखत।

६. देवर्षीणां ब्रह्मलोकादिगमनं वर्णयत।

**लघुप्रश्नाः (प्रत्येकं ५ अङ्काः)**

१. श्रीवेङ्कटेशस्यालयवर्णनं लिखत।

२.श्रीवेङ्कटेश्वरस्य शरीरसौन्दर्यं वर्णयत।

३. पाण्डवतीर्थमाहात्म्यं स्पष्टयत।

४. जराहरादितीर्थत्रयमाहात्म्यं वर्णयत।

५. ब्रह्मादीनां वेङ्कटाचलगमनं विशदयत।

६. ब्रह्मणा निर्लोमनामविप्राय वरप्रदानं स्पष्टयत।

७. वेङ्कटाद्रौ वानरचेष्टाः वर्णयत।

८. तिरुमलक्षेत्रे तीर्थानां नामानि लिखत।

# Unit-3

## पञ्चचत्वारिंश अध्यायात् पञ्चाशत् अध्यायावधि।

**प्रस्तावना १-१**

श्रीवराहपुराणान्तर्गते श्रीवेङ्कटाचलमाहात्म्ये प्रथमभागे प्रथमषडध्यायाः प्रथणखण्डे प्रस्ताविताः। द्वितीयखण्डे द्वितीयषडध्यायाः प्रस्ताविताः। अस्मिन् तृतीये खण्डे पञ्चचत्वारिंश अध्यायायादारभ्य पञ्चाशत् अध्यायावधि षडध्यायेयेषु प्रस्ताविताः विषयाः उच्यन्ते।

तत्र पञ्चचत्वारिंशे अध्याये दशरथेन श्रीवेङ्कटाचलनिवासिनां महर्षिणां दर्शनं वर्णितम्। षट्चत्वारिंशे अध्याये श्रीभगवदाविर्भावघट्टः वर्णितः।

सप्तचत्वारिंशे अध्याये ब्रह्मादीनां भगवन्मन्दिरप्रवेशादिवर्णनं कृतम्।

अष्टचत्वारिंशे अध्याये अगस्त्यादिभिः कृता भगवत्स्तुतिः, इन्द्रादिभिः कृता भगवत्स्तुतिः, सनकादिभिः कृता भगवत् स्तुतिः, दशरथेन कृता भगवत्स्तुतिः, ब्रह्मणा कृता भगवत्स्तुतिश्च वर्णिताः।

एकोनपञ्चाशत् अध्याये ब्रह्मादीन् प्रति भगवत्कृतकुशलानुयोगादयः, भगवते ब्रह्मादिभिः रावणोपद्रवनिवेदनं, भगवता अभयप्रदानं, शङ्करस्य शेषाचलस्य आग्नेयदिगवस्थानप्राप्तिः, भगवन्तमुद्दिश्य दशरथेन कृता पुत्रप्रार्थना, चोक्ताः।

पञ्चाशत् अध्याये भगवन्तं प्रति चतुर्मुखेण कृता प्रार्थाना, श्रीवेङ्कटाद्रिनिकटस्थासुरवधार्थं चक्रप्रेषणं , श्रीवेङ्कटेश्वरमहोत्सवघट्टश्च वर्णिताः।

**उद्देश्यम् १-२**

प्रियपाठकाः अस्मिन् खण्डे भवन्तः अधो लिखितान् बिन्दून् आलोचयिष्यन्ति।

- दशरथेन श्रीवेङ्कटाचलनिवासिनां दर्शनम्
- श्रीभगवदाविर्भावघट्टः
- ब्रह्मादीनां भगवन्मन्दिरप्रवेशादिवर्णनम्
- अगस्त्यादिभिः कृता भगवत्स्तुतिः
- ब्रह्मणा कृता भगवत्स्तुतिः
- इन्द्रादिभिः कृता भगवत्स्तुतिः
- सनादिभिः कृता भगवत्स्तुतिः
- दशरथेन कृता भगवत्स्तुतिः

- ब्रह्मादीन् प्रति भगवत्कृतकुशलानुयोगादयः
- भगवते ब्रह्मादिभिः रावणोपद्रवनिवेदनं
- भगवते अभयप्रदानं
- शङ्करस्य शेषाचलस्य आग्नेयदिगवस्थानप्राप्तिः
- भगवन्तमुद्दिश्य दशरथेन कृता पुत्रप्रार्थना
- भगवन्तं प्रति चतुर्मुखेण कृता प्रार्थना
- श्रीवेङ्कटाद्रिनिकटस्थासुरवधार्थं चक्रप्रेषणम्
- श्रीवेङ्कटेश्वरमहोत्सवघट्टः

**दशरथेन श्रीवेङ्कटाचलनिवासिनां दर्शनम् १-३**

राजा दशरथः प्रभुः वशिष्ठेन सह रम्यं वनं पश्यन् सानूनि शिखराणि च पश्यन् तत्र गिरौ पुल्लकल्हारकुमुदपुण्डरीकमहोत्पलां, शुभां स्वामिपुष्करिणीं ददर्श। नीलोत्पलगणेपेतां रक्तोत्पलसुशोभितां, वञ्जुलैः वकुलैः अन्यैः काननोद्भवैः हंसकारण्डवाकीर्णां, बकभेकविघूर्षितां, सारवसम्पूर्णां भ्रमरारवनादितां, मत्स्यकच्छपसम्बाधां शिंशुमारनिषेवितां, नक्रैः कर्कटकैश्चान्यैः जलजैः वनजैरपि संसेवितां, तीरजैः वृक्षैः, नारिकेलरसालकैः पूगचम्पकपुन्नागकेतकैः स्वर्णकेतकैः अशोककदलीभिश्च, मातुलुङ्गैश्च शोभितां, निरन्तरतटद्रुमैः लिकुचैः बीजपूरैश्च शोभितां सरसीं दृष्ट्वा स महाद्युतिः मुमोद। तत्रैव तपतः अमलान् योगिनः मुनीन् ददर्श।

वीरासने समासीनान् बद्धपद्मासने स्थितान् भद्रासनगतान् सिंहासनगतान् परान् कांश्चित् ददर्श। सिद्धासनगतान्, स्वस्तिकासनमाश्रितान् पर्णाशनान् वायुभक्षान् गोमुखासनसंस्थितान् कांश्चित् अङ्गुष्ठाग्रस्थितान्, एकपादेन विष्ठितान् सूर्योन्मुखान् मुनीन्यन्यान् कांश्चित् पञ्चाग्निमध्यगान् भूशय्यान् जलशय्यांश्च फलमूलजलाशनान् केवलकुम्भकेसक्तान्, केवलं रेचकेरतान्, केवलं पूरके सक्तान्, केवलं प्राणरोधकान् शुद्धनाडीगणान्, नाडीशुद्धौ महाव्यग्रान्, सुषुम्नासङ्गतप्राणान् षट्कर्मनिरतानपि दशधानुष्ठिते योगकरणे सुसमाहितान् ददर्श।

व्याघ्राजिन धरानन्यान् कृष्णाजिनवराम्बरान् वल्कलावसनानन्यान् काषायवसनानपि, जलतर्पणसंसक्तन् होमकर्मसु निष्ठितान्, बिल्वहोमरतानन्यान्, शमीहोमरतानपि तथा आमलकहोमेषु निष्ठितान् निर्मलान् मुनीन्, तिलाक्षतैः पुण्डरीकैः पायसैः घृतैः पुष्पैः मधुयुतैः फलैः कदलीगतैः, मुद्गान्नैः, तिलान्नैः, गुडान्नैः, माषसंयुतैः, आपूपैः मण्डकैश्चापि तथैव तिलपिष्ठैश्च होमञ्च कुर्वतः कांश्चित् तत्र तत्र सुनिष्ठितान् हृदम्बुजगतं श्रीशं विष्णुम् अर्चयतो अपरान् पुनः तत्रैव ददर्श। केचन सूर्यमण्डलवर्तिनं जगन्नाथमर्चयन्ति। तथा केचित् जलमध्यगतं हरिं श्रीनिवासं,

केचित् हरेः बिम्बं सौम्यं च सर्वदा अर्चयन्ति। तथा चान्ये त्रिविक्रमं नृसिंहं भीषणं हरिं तिलैः पुष्पैः अक्षतैः फलैरपि अर्चयन्ति।

तथा केचित् नारायणमनुं परम् अष्टाक्षरं मुक्तिबीजं भुक्तेरपि च साधनं जपन्ति। कुशग्रन्थिकृतां मालां तथा पद्मबीजभवां तुलसीकाष्ठसम्भूतां प्रवाळमणिसम्भवां, स्फटिकीं स्वर्णविकृतां तथा पुत्रजीवभवां विविधामक्षमालां मन्त्रसिध्यर्थमेव कृत्वा ध्यात्वा जपतः मुनीन् परमभास्वरान् ददर्श। तेषां मध्ये महात्मानं ब्रह्माणं कमलासनं चतुर्मुखं चतुर्बाहुं ददर्श। जपन्तं ज्वलनोपमं स्फाटिकीमक्षमालां च धारयन्तं महौजसं, मनसा श्रीशं ध्यायन्तं नासाग्रन्यस्तलोचनं व्याघ्रत्वचि समासीनं ध्यानयोगतः निश्चलं निवातस्थं महादीपमिव निष्कलं स्थितं संहृष्टो राजा महात्मना वसिष्ठेन ददर्श। तत्र सर्वान् योगिमुनीन् देवान् यथाविधि नत्वा विस्मयोत्फुल्ललोचनः महाराजः अतिष्ठत् ।

**बोधप्रश्नाः**

१. दशरथेनं दृष्टं श्रीवेङ्कटाचलं वर्णयत।

२.श्रीवेङ्कटाचलवासिनां महर्षीणां वर्णनं कुरुत।

## श्रीभगवदाविर्भावघट्टः १-४

महातेजा वसिष्ठोऽपि राजानं दशरथमिदमब्रवीत्। हे राजशार्दूल ! श्रूयताम्। लोकपितामहः ब्रह्मा मुनिभिः सहात्र वैङ्कटाद्रौ तीव्रं तपमाचरति। अचिरादेव श्रीपतिः विष्णुः आविर्भूतो भविष्यति। त्वमप्यत्र स्वामिपुष्करिणी जले स्नात्वा, शुचिर्भूत्वा, जपं कुर्वन् त्वमिहैव निवस। इत्युक्तः, राजा दशरथोऽपि 'प्राह मन्त्रं कञ्चित् प्रयच्छ भोः' इति पृष्ठः वसिष्ठश्च उत्तममन्त्रराजमष्टाक्षरीमन्त्रं प्रादात। योऽसावष्टाक्षरीमन्त्रो वेङ्कटेशपरायणः यन्त्रसंयुतमतुलं मन्त्रं लब्ध्वा पार्थिवः स्वामिपुष्करिणीतीरे विधिवदादरात् क्वचित्तत्र समे देशे उत्तमं मन्त्रं लिखित्वा, तत्र जगत्पतिं श्रीनिवासं विष्णुं समभ्यर्च्य, तदग्रतः परमासने जपं कुर्वनतिष्ठत्। वसिष्ठोऽपि कुशविस्त्रुते आसने मन्त्रं जपन् अतिष्ठत्। अत्रान्तरे कश्चित् महान् शब्दः समुदपद्यत। सर्वैः मुनिसत्तमैः किमित्येवाकुलैः वीक्षितम्। दुर्निरीक्ष्यं महत्तेजो सुरसत्तमैः दृष्टम्। समस्तविद्युतां कूटमाविर्भूतमिवाभवत्।ज्योतिर्गणानां सङ्घातविद्युतां कूटमाविर्भूतमिव भवात्। ज्योतिर्गणानां

सङ्घात इव तेजः समुद्यतम्। अनेककोटिसूर्याश्च पूर्णचन्द्राश्च कोट्यः एकीभूय समुद्भूता इव तेजः समुत्थितम्। किमिदमिति तद्द्रष्टुमशक्ताः सहसैव ते सुराः नेत्रानि न्यमीलयन्तः समुत्थस्थुः। अमलाः ओगिनः सर्वे सम्भ्रान्तमनसः सादरं समूहीभूय विविधान् मन्त्रान् जपन्तः अतिष्ठन्। जगत्सर्वं तत्तेजसा प्रदीप्तमिव स्थितम्। तेजो मध्ये समुद्भूतं विमानं सूर्यभास्वरम् अनेकगोपुरैः युक्तम अनेकावरणैः युतं, तप्तहाटकनिर्वृत्तकवाटगणशोभितं, नीलैः मरकतैश्चैव कृततोरणसञ्चयं समुच्छितपताकाभिः शोभितं, विविधध्वजैः शातकुम्भमयैः, कुम्भैः शोभिताग्रैः गोपुरैः वितानैः विचित्रैः वर्णभेदतः अलङ्कृतं, तत्र लम्बमानैः मुक्तादामभिः सम्भवैः मल्लिकामालतीजातिपुष्पाणां सरैः,तथा स्वर्णचित्रितवस्त्रैः लम्बमानैः अलङ्कृतम्, अनेकमणिरत्नाद्यं क्रीडामण्टपसंयुतम्, आस्थानमण्डपान्तःस्थमणिस्तम्भसुशोभितं, चतुर्दिक्षु चतुद्वारं द्वारपालैश्च सेवितं, सहस्ररत्नसुस्तम्भमणिमण्डपशोभितं, रथाश्वगजमुख्यैश्च दिव्ययानैः अलङ्कृतं, शारिकाशुकहंसानां मयूराणां स्वनैर्युतं, विचित्रमृगपक्षिभिः कपोतमधुरालापैः शोभितं, धूपदीपैः सुगन्धैः विराजितं, भेरीमृदङ्गपणवमुरजस्वनसम्भृतं, रूपयौवनसम्पन्नदिव्यस्त्रीलास्यलालितं, श्रवणानन्दजननं, हृदयाह्लादकारकं, गृहीतव्यजनाभिश्च रूपयौवनचारुभिः, नीराजनकराग्राभिः श्यामाभिश्च निषेवितं, छत्रध्वजधराभिश्च स्त्रीभिः सेवितमादरात् एवमत्यद्भुतं, दिव्यं विमानं बुधाः दधृशुः। इति कर्तव्यतामूढाः सम्पूर्णह्लादमानसाः तथैव पश्यन्तः विस्मयोत्फुल्ललोचनाः तस्थुः।

अत्यद्भुतं विमानं तत् दृष्ट्वा लोकपितामहः परमानन्दभरितमुखलोचनपङ्कजः अगस्त्यं वसिष्ठं च वामदेवं काश्यपं जाबालिम् अथवा कण्वं च देवलं देवदर्शनं स्वपुत्रं नारदं चैव तथा ऋषिं पराशरं व्यासं शुकं तथा गार्ग्यं भार्गवं तथा च्यवनम् अन्यानपि मुनीन् पुण्यान इन्द्राद्यांश्च तथा सुरान् सनकादींश्च योगीन्द्रान् समाहूय इदमब्रवीत् ' इदं तु दिव्यं परमाद्भुतं शुभं विमानम् इन्द्रादिनिषेव्यमाणं, परं विष्णोरिव मन्दिरं विभाति। वयं सर्वे अद्भुतं गृहं पश्यामः इतीरयित्वा सर्वजगत्पतिः पितामहः तद्गुहं प्रविवेश तथैव सर्वे विबुधाः तपोधनाः विविधयोगिनः तथैव गेहं विविशुः।

**बोधप्रश्नाः**

१. श्रीभगवदाविर्भावादिवर्णनं कुरुत।

२. श्रीभगवदाविर्भावे विशेषघट्टान् वर्णयत।

**ब्रह्मादीनां भगवन्मन्दिरप्रवेशादिवर्णनं १-५**

ब्रह्मादयः रत्नतोरणभूषितं तप्तहाटकनिष्पन्नकवाट द्वयशोभितं प्रथमद्वारमतीत्य, शङ्कचक्रगदान्वितौ चण्डप्रचण्डौ द्वारपालौ प्राग्द्वारे प्रणम्यैव द्वितीयं द्वारमाविशन्। तथैव सप्तद्वाराणि समतीत्य, महाभुजाः चतुर्मुखमुखाः सर्वे तत्र देवं श्रियः पतिं संसेवयामासुः। सहराज्ञा महात्मना विमाने बहुविस्तीर्णे सिद्धचारणसेविते अपश्यन्नतिसंहृष्टाः। तदानीं पुष्पवृष्टिः महत्यासीत्। देवदुन्दुभिः निर्गतः रम्यमङ्गलनिस्स्वनः आकाशः सुमहानासीत्। देवगन्धर्वाः तुष्टुवुः। विमानस्थाः अप्सरो गणाः ननृतुः। गीतवादित्रसम्भ्रमः सुमहानभूत्। तेन सम्भ्रमेण त्रैलोक्यं पूरितं तदाभवत् वसवः मुनयः तथा लोकपालाश्च विदित्वा सर्वे ग्रहाः तथा रुद्राः धातारः देवतागणाः नामाः यक्षाः तथा सर्वे ये चान्ये सात्विकामताः जगदीशानमीश्वरमच्युतं द्रष्टुमाजग्मुः। ब्रह्माणं पुरस्कृत्य ते भास्करोपमं ददृशुः।

नीलमेघनिभं श्यामं नीलमाणिक्यविग्रहं तप्तहाटकसङ्काश चम्पकोद्दामदामभां, पङ्कजोदरलावण्याम् आर्द्रहारिद्रसन्निभां, शरत्पूर्णनिशाकान्तमण्डलोपमसन्मुखां, भृङ्गपङ्क्तिसमाकारदिव्यालकसुशोभितां, प्रपुल्लपङ्कजस्मेरमुखमन्दस्मितोज्ज्वलां, वामहस्ते लसद्धेमलीलाम्बुजमनोहरां, वलयाङ्गदसंशोभिलम्बमानान्यपाणिकां, पद्मासनस्थितां पद्मां पार्श्वे दक्षिणमाश्रितां वीक्षमाणां कटाक्षेण मुहुः श्रीवत्सलाञ्छनं, मन्दस्मितमनोहारि श्रीमद्वदनपङ्कजं, दयारसतरङ्गैघपुल्लपङ्कजलोचनं, केयूराङ्गदसद्भूषं, वृत्तायतचतुर्भुजं, ज्वालायुतसहस्रारसुदर्शनधरं वरं, शरच्चन्द्रप्रतीकाशपाञ्चजन्यधरं शुभम् अश्रान्तवरदानोद्यद्दक्षपाणिसरोरुहं, कटीतटसुविन्यस्तवामपाणिजलोरुहं, लावण्यसिन्धुलहरीमहावर्तसुनाभिकं बालचन्द्रकलाशोभिनखपङ्क्तिविराजितं, सहस्रपत्रपीठस्थं, सर्वाभरणभूषितं, पारिजाततरोर्मूले भासमानं श्रियः पतिं, कोटिकन्दर्पलावण्यसम्मोहितजगत्रयं, यौवनोद्दामलावण्यं, पञ्चविंशतिहायनं कुमारं, राजसिंहस्य क्रीडमनमिव च्युतं, मूर्तीभूतदयासिन्धुं, मूर्तीभूतक्षमागुणं, मूर्तीभूतमहौदार्यं, मूर्तिमद्रपसम्पदं, नारायणम्, अनाद्यन्तमव्ययं, पुरुषोत्तमं देवगन्धर्वाः सुरसत्तमाः प्रत्यक्षं ददृशुः।

तपोधनाः यस्य रूपं प्रत्यक्षतः द्रष्टुं तेपुः तमजं देवदेवेशं शृङ्गाररसवारिधिं चक्षुषां फलम् अत्यर्थं प्रीतमानसाः ददृशुः। नयनानन्दजनकं तं सूर्यतेजसं दृष्ट्वा सर्वेषां नेत्रपद्मानि अञ्जसा विकासं प्रापुः। तस्य योगिनः दर्शनात् हर्षा वेशसमाविष्टाः। मुनयः तथान्ये च अप्सरो गणाः ननृतुः। भ्रमन्तं भ्रामयन्ति। विपतन्तं पतन्त्यन्ये।

**बोधप्रश्नाः**

१.ब्रह्मादीनां भगवन्मन्दिरप्रणमनादिवर्णनं लिखत।

२.ब्रह्मादयः भगवन्मन्दिरे कीदृशं भगवन्तं दर्शितवन्तः ?

**अगस्त्यादिभिः कृता भगवत्स्तुतिः १-६**

अनन्तरं मुनयः सर्वे अगस्त्यादयः हर्षानिविष्टाः योगिनः स्तुतिप्रीतं गम्यं स्तुत्या तदा प्रीत्यर्थं तुष्टुवुः।

नमस्ते यज्ञरूपाय यज्ञभोक्त्रे नमो नमः।
यज्ञकर्त्रे नमो यज्ञप्रियाय च नमो नमः।
यज्ञगोप्त्रे नमो यज्ञफलदाय नमो नमः।
विश्वामित्र महायज्ञ। पालकाय नमो नमः।
यज्ञं श्राद्धं च दानं च कर्माण्यन्यानि यानि च।
तेषामपि त्वमेवैकः। समस्तजनकर्मणाम्।
पालने फलदाने च प्रभुरित्युच्यते बुधैः।
न केवलं त्वदुद्देशकृतानां कर्मणां प्रभुः।
अन्योद्देशकृतानां च यज्ञानां त्वं प्रभुस्तधा।
आधावस्ते तथा मध्ये त्वद्ज्ञानं तु न चेन्न तत्।
व्यूनं चापि कृतं कर्म त्वद्ध्यानात् याति पूर्णतम्।
कर्मणैव हि सुप्रीतः त्वंतु धर्मं ददासि च।
अर्थकामौ तथा मोक्षं ददासि च तपः प्रियः।
वेदेषु बहवो भागाः कर्माण्येव वदन्ति हि।
तान्येव हि तव प्रीतिकारिणीति पुराविदः।
यथावत् तानि कर्तुं च न शक्यानि मनीषिभिः।
अस्माभिः क्रियते युष्मत् आज्ञा बुद्ध्या हि कर्म तत्।
कर्म छिद्रं तपश्चिद्रं त्यक्तं चोपेक्षितं च यत्।

तत्सर्वं क्षम्यतां देव श्रीनिवास क्षमानिधे।
इति तस्मिन् स्तुते विष्णौ मुनिभिश्च तपोधनैः।
इन्द्राद्याः देवताः सर्वाः तुष्टुवुः जगदीश्वरम्।

**इन्द्रादिभिः कृता भगवत्स्तुतिः १-७**

ओं नमो वेङ्कटेशाय शेषाद्रिनिलयाय च।
सिंहाचलनिवासाय श्रीमन्नारायणाय च।
केशवाय नमो नित्यम्। वासुदेवाय ते नमः।
हृषीकेशाय महते। वामनाय नमो नमः।
उद्धृत्य भूमिं पातालात्। स्थापयित्वा दृढं पुनः।
अनुगृण्हन् जनान् सर्वान् प्रत्यक्षं दृश्यसे गिरौ।
सुराणामुदधिं यत्नात्। निर्मथ्योत्पाद्य चामृतम्।
अक्षरस्त्वं सुरान् सर्वान् दत्वा पीयूषमादरात्।
त्वदीह सर्वथा स्वामिन् परार्थैव सुरेश्वर।
तत्स्वरूपं यथावद्धि ज्ञातुं शक्नोतिकः पुमान्।
क्वचित्सहस्रमूर्धा त्वं सहस्राक्षः सहस्रपात्।
कदाचित् द्विभुजस्त्वं तु कदाचित्त्वं चतुर्भुजः।
आकाशमिव ते रूपं कदाचित् ज्ञानगोचरम्।
कदाचित् निर्विकल्पेन। वेद्यं यत्नेन कस्यचित्।
आहुस्त्वां सगुणं केचित्। निर्गुणं ज्ञानमात्रकम्।
किञ्चिदित्येव केचित्तु। सदित्येव तु केचन।
दिव्यावयवसौन्दर्यं नित्यविग्रहयोगिनम्।
वदन्ति केचिदस्माकमपि तन्मतमुत्तमम्।
हृद्यं प्रमाणभूयिष्ठं तं न तास्म जगद्गुरुम्।
एवं हि स्तूयमाने तु गोविन्दे त्रिदशैरपि।
तुष्टुवुः सनकाद्याश्च योगिनो विजितेन्द्रियाः।
सनकादिकृता भगवत्स्तुतिः १-८
वैकुण्ठधाम विष्णो त्वं जगतामादिकारणम्।

नामामि त्वां जगद्रूपं नममि त्वामनङ्गिनम्।
आधारपद्मे हृत्पद्मे भ्रूमध्ये मूर्ध्नि पङ्कजे।
नीवारशूकवत्सूक्ष्मं पीताभं सर्वतो मुखम्।
सुषुम्नामार्गमध्येऽपि विसतन्तु निभं परम्।
ज्ञानात्मकं मनो वेद्यं लयाच्य सुरूपकम्।
स्वयं, प्रकाशरूपं च समाधौ त्वं नमाम्यहम्।
योगिनां परमाधारं योगीशं योगा दयिनम्।
योगिनामप्यगम्यं च नमस्यामो जगद्गुरुम्।
हृत्पद्मकर्णिकामध्ये शङ्खचक्रगदाधरम्।
नीलतोयदसङ्काशं पीतवासनमच्युतम्।
नमामो वेदवेद्यं त्वां वेदस्याविषयं तथा।
त्वत्पादं सर्वभावेन सर्वदा शरणं गताः।
इति स्तुते जगन्नाथे योगिभिः कोसलाधिपः।
तुष्टाव हृष्टस्तं देवं राजा दशरथस्तदा।।

**दशरथेन कृता भगवत्स्तुतिः १-९**

ब्रह्मेन्द्रप्रमुखाः सर्वे तपः कुर्वन्ति यत्कृते।
त्वदधीना रमा सा तु त्वत्प्रसादाभिकाङ्क्षणि।
त्रिपुरारेर्महाविष्णो लोकसंहारकारिणः।
येन दग्ध पुरी तत्तु त्वदायुधमिति स्मृतम्।
सर्वसृष्टिक्रियाकर्तृ ब्रह्माद्या देवता गणाः।
त्वदाज्ञाकारिणः श्रीश नास्ति कश्चित्तवाधिकः।।
त्वदीयं धाम वैकुण्ठं निरपायं निराकुलम्।
सर्वप्राथ्यं परानन्दं वक्तव्यं किमतः परम्।
एवं नृपेण गोविन्दे स्तूयमाने  चतुर्मुखः।
चतुर्भिः तोषामास मुखैर्वेदसुगन्धिभिः।।

**ब्रह्मणा कृता भगवत्स्तुतिः १-१०**

आसीदग्रे सदेकस्तु स च नारायणः श्रुतः।
आपोऽसृजत्ततो वीर्यं विसृष्टं तासु तेन वै।
तदण्डमभवत्पश्चात् त्वया सृष्टोऽहमीश्वरः।
मया सृष्टा प्रजास्सर्वाः सर्वमूलं त्वमेव भो।

भोः ! मादृशाः जाताः विधयः त्वत्तः कति काजीवैः सूक्ष्मप्रकृत्या च विशिष्टः त्वं कारणम्। त्वमेव सर्वभूतात्मा। त्वमेव जगदित्युच्यते श्रुता। हे हरे ! सुपर्णावयवौ एकं वृक्षं समासते ! तयोः अन्यः सर्वदा कर्मजन्यं फलमश्नाति। तत्रैव अस्पृष्टगन्धः त्वं दीप्यसे यथा रविः तथा। सर्वजीवानां नियन्ता प्रेरकः अनुमोदकंश्च सत्यं ज्ञानमनन्तं च हे श्रियः पते ! त्वद्रूपमेव। नरानन्दात् शतगुणात् देवगन्धर्वसम्मदाः भवानेव ! हे कमलापते ! तव वैभवं स्तोतुमारभ्य तवानन्तगुणार्णवं परिच्छेत्तुमुपक्रम्य ते च नित्याः सहस्रधा उपक्रम्य पुरा वेदाश्च अजानन्तः तूष्णीभावं ययुः। त्वन्नाभिकमलोद्भवः सोऽहं गुणक्षीरयोधिं त्वां कथं स्तौ मि ?

दयोद्रिक्तमुखाम्भोज।। तव दर्शनात् वयं सुराः किञ्चित्तु अवादिष्म च। तत्सर्वं क्षम्यताम्। हे परमोदारप्रसीद ! हे श्रियोज्ज्वल ! प्रसीद त्वम्। हे परमानन्द ! प्रसीद ! हे सुमुखोज्जवल प्रसीद ! इति देवगणाः सर्वे हर्षोत्फुल्लहृदम्बुजाः देवदेवेशं याथात्म्यात् बहुधा अस्तुवन्।

**ब्रह्मादीन् प्रति भागवत्कृतकुशलानुयोगादयः १-११**

मुनिभिः देवबृन्दैश्च स्तुतः श्रीवेङ्कटाधिपः दयाप्रसन्नसम्फुल्लनेत्राब्जाभ्यां विलोक्यन्। तान् सर्वान् सुधावृष्ट्या ह्लादयन् इव सोऽच्युतः मेघगम्भीरवाचा कर्णामृतश्रिया बभाषे।

हे ब्रह्मन् ! कमलासन ! तव भक्त्या स्तुत्या च प्रीतोऽस्मि। तपस्विनां सुराणाञ्च ते आगमनकार्यं किम् ? इति पृष्टः, पुनः प्राह ब्रह्मालोकपितामहः –

**भगवते ब्रह्मादिभिः रावणोपद्रवनिवेदनम् १-१२**

पूर्वं विश्रवसः पुत्रः रावणो नाम राक्षसः सुघोरं तपः कृत्वा देवदानवराक्षसैः मानुषादितरैः च अवध्यतां वरं लब्ध्वा बलदर्पात् इमान् लोकान् मुनीन् नितरां बाधते। श्रीशैलस्य सकाशे केचन दैत्याः सर्वदा बलोद्धता महावेगा ब्राह्मणकण्टकाः नित्यं बाधन्ते प्राणिनः सर्वान् नित्योद्यतवरायुधाः। त्वत्प्रीतिकारकं वैकुण्ठं क्षीरसिन्धुं च दृष्ट्वा त्वत्तत्स्थानं समालोक्य, लीलालोलहृदयम्बुजं त्वां श्रियः कान्तं तत्र अदृष्ट्वा वयमत्रागताः। हे रिपुसूदन त्वमेव शरणमस्माकम्। हे रमासख ! हे जगद्रक्षणकर्ता ! तद्विसृज्य त्वं दिव्ये अतिचैत्ररथे वृषाभिधे गिरस्मिन् परमानन्दः क्रीडारसवशानुगः क्रीडसे हे विष्णो ! अस्माकं का गतिः ? वेङ्कटनायक वद। इत्युक्तः कृपानिधिः अथोक्षजः

तान् सर्वान् प्राह –

हे ब्रह्मन् ! अहमेव गतिः। भवतां तद्भयं मास्तु। हे कमलासन ! मया भवतामभयं दत्तम्। अचिरात् क्रूरं रक्षसं लोककण्टकं रावण सबन्धुं सरथं साश्वं वधिष्यामि न संशयः। एव मुक्त्वा विधिं श्रीशः आगस्त्यं तपोधनं प्राह - ' हे अगस्त्य ! महामुने ! स्वागतं ते। कार्यं ब्रूहि। इत्युक्तः मुनिः परमपावनः तं विष्णुं प्राह - ' मन्दस्मितमनोहारि ! श्रीवेङ्कटेश्वर ! त्वदीयमुखपङ्कजं सन्तापहरणं हृदयाह्लादकारणं सद्यः अदृष्ट्वा कथं स्थातुं शक्नुयाम् ? प्रधानतः ममोद्देश्यं पुण्यं त्वदीयदर्शनम्। हे पुरुषोत्तम ! अन्यच्च किञ्चिद्वक्ष्यामि। श्रूयताम्। श्रीशैलस्य समीपतः असुराः केचिदुद्भूताः। वरदानोद्धताः सदा प्राणिनः बाधन्ते तवात्र सान्निध्ये सति देशपीडा कथं भवेत् ? बालवृद्धद्विजाकुलः विषयोऽयं त्वदीयः। दस्युभिः पीड्यमानश्चेत् कथम् उपेक्षाविषयः ? दुष्टानां निग्रहः कार्यः। तथा शिष्टाना रक्षणं कार्यम्। भवद्देशजनाः सर्वे नीरोमा निरुपद्रवाः। श्रीमन्तः पुत्रपौत्रिणः सर्वे दीर्घायुषः भवदीयकटाक्षतः निर्मत्सराः भवेयुः। हे श्रियः पते ! देव ! अवश्यं मम वरमेतद्देहि । इति पृष्टः परमात्मा सनातनः पुनः प्राह-

हे मुनिवरोत्तम ! मयाद्य वरमेतत् दत्तम्। सर्वे दुष्टांश्च हनिष्ये ! निरुपद्रवं करिष्ये। आरोग्यं सम्पदं सन्ततीः शतायुषः दास्ये। एतंद्विषयवासिनां सर्वदा दास्यामि। कांक्षितमयाचितं च यच्चान्यत् तद्ददामि वः इति कमलापतिः मुनये सम्यक् वरं दत्वा, ' स्वागतं भवतामिति सनकादीनुवाच । तं रमापतिं योगिनः पुनः प्रोचुः - ' स्वामिन्। इयं पुण्यभूमिः। शीघ्रतः तपः सिद्ध्यति। किन्तु कलहार्थिनां बाधा महती दुस्सहा। हे शेषगिरीश्वर !
शीघ्रमिदं देशं निर्बाधं कुरु। वैकुण्ठं त्यक्त्वा अस्मिन् पर्वतोत्तमे स्थीयसे। हे वेङ्कटाधीश प्राणसौख्यदः त्वमत्र स्थित्वापि सर्वभूतैः अदृयः चेत्, तावता किं प्रयोजनम् ? सर्वप्रत्यक्षगोचरं स्थातव्यं त्वया। हे स्वामिन् ! इदमेव नः परमं प्रयोजनम्।

एवमभ्यर्हितः सनकादितपोधनैः श्रीशः हे योगीन्द्र ! तथैव कुरु इति चोक्त्वा मनीन् तदा इन्द्रं वचो प्राह विष्णुः ठ किं ते कार्यं वद' इति च। इति पृष्टः देवेन्द्रः पुनः प्राह विष्णुमव्ययम् - हे स्वामिन् ! अच्युत ! गोविन्द ! दुरात्मना रावणेन पीडिताश्च वयं सर्वे स्थानात् स्थानं भ्रमामहे। इत्युक्तः देवो कमलापतिः अपि प्राह देवेन्द्रं –

देवाश्च सर्वे यूयं गतज्वराः स्वस्था भवतः। लोककण्टकः रावणः हत एव। अचिरात् तं वधिष्यामि सत्यभवधार्यताम्। इति।

**बोधप्रश्नाः**

१.अगस्त्यादिभिः कृतां भगवतः स्तुतिं स्पष्टयत।

२. इन्द्रादिभिः कृतां वेङ्कटाद्रीशस्तुतिं विशदयत।

३. सनकादिभिः कृतां भगवतः स्तुतिं लिखत।

४. दशरथेन कृतां भगवतः स्तुतिं लिखत।

५. ब्रह्मणा कृतां भगवतः स्तुतिं स्पष्टयत।

६. ब्रह्मादीन् प्रति भगवत्कृता कुशलानुयोगादयः वर्णनीयः।

७. भगवते ब्रह्मादिभिः रावणोपद्रवनिवेदनं स्पष्टयत।

८. ब्रह्मादिभ्यः भगवता दत्तमभयमुद्दिश्य व्याख्यात।

**शङ्करस्य शेषाचलाग्नेयदिगवस्थान प्रप्तिः १-१३**

शुचिस्मितः कमलानाथः ईशानं प्राह- हे शङ्कर ! ते आगमनकार्यं किं ? सत्वरं वद इति। इति पृष्टः शिवः प्राह ' स्वामिन् ! वेङ्कटेश्वर ! सदा त्वया यत्र स्थीयते तत्रैव मया स्थातव्यं देव वृषगरीश्वर ! इति पृष्टः पुनः प्राह नीलमेघसमुद्युतिः - ' वेङ्कटाह्वय भूधरे आकल्पं च वसामि। त्वमप्यत्र वस' अस्याद्रेः उपत्यकायाम् शोचिष्केशदिशि इत्यादिश्य, नृपं कोसलाधिपं प्राह किं ते कार्यं वद इति। केशवेनैवमुक्तस्तु प्राह दशरथः मनोगतम्।

**भगवन्तमुद्दिश्य दशरथेन कृता प्रार्थना १-१४**

स्वामिन् ! पुरुषशार्दूल ! अच्युत ! त्वत्प्रसादात् चिरं राज्यं भुक्तम्। ब्राह्मणेभ्यः महद्धनं दत्तम्। सर्वं सुखमनुभूतम्। तथा रिपवः जिताः। पुत्रजन्मसम्भवं सुखं नानुभूतम्। पुत्रहीनस्य न लोकः इति द्विजातयः वदन्ति मे लोकविख्यातं पुत्रं देहि इति पृष्टः राजानं पुनः प्राह वेङ्कटाधिपः। हे राजन् ! पूर्वं त्वया कृतं बहुदुष्कृतं दुस्सहम्। राजन् ! मया किं कर्तव्यम् ? इत्युक्तः नृपः दशरथः प्राह - ' हे स्वामिन् सूर्ये अभ्युदिते तमः कथं तिष्ठेत् ? क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे इति श्रुतिः वक्ति। स्वामिन् त्वयि दृष्टे न चास्त्यघम्। इत्यतः गोविन्द ! कथं पापं त्वयि स्थिते ? इति नृपोणोक्तः पापविनाशनः श्रीशः प्राह - हे राजन् ! प्रीत्या भगवद्भक्त्या त्वदीयया चतुःश्लोक्या स्तुत्या च परमप्रीतः वरोत्तमं तव दास्ये। यस्मात्प्रीत्या चतुः श्लोकी त्वयोक्ता मम भूपते ! तस्मात् तवामितविक्रमाः चत्वारः पुत्राश्च शूराश्च बलवन्तश्च मत्तुल्यबलविक्रमाः दत्ताः। त्वया अयोध्यां गत्वा आदरात् यष्टव्यम्। इत्युक्तः, सो राजा दशरथः पुलकाङ्कितः बभूव। देवदेवं रमापतिं बहुधा स्तुत्वा नत्वा, ततः प्रदक्षिणः कृत्वा पुनः स्तुत्या प्रणम्य, सपुरोहितः शेषशैलेन्द्रनिलयमामन्त्र्य, बन्धुभिः सह श्रीमान् दशरथः अयोध्यां ययौ।

**भगवन्तं प्रति चतुर्मुखेन कृता प्रार्थना १-१५**

कमलापतिः कमलासनमाहूय वचनं चेदमब्रवीत्। हे ब्रह्मन्। कालस्तु अतिक्रान्तः। किमर्थं त्वया स्थीयते ? किमभीष्टं वद ! सत्यं क्षिप्रं दास्यामि तद्वरम्। इति पृष्टः पुनः प्राह ब्रह्मा लोकपितामहः यादि दास्यसि ममाभीष्टं रमापते ! त्वमेवं भूत एव अत्र सर्वप्रत्यक्षगोचरः केवलं दर्शनादेव सर्वेषां सदा सर्वदः भगवन् ! लोकानुग्रहकाम्यया स्थातुमर्हसि। कलौ युगे जनाः सर्वे शिश्नोदरपरायणाः नराः धर्ममधर्मं वापि भूतले न जानन्ति। प्रायशः सर्वेऽपि दुर्बलाः रोगिणः काममोहिताः। पशुप्रायाः मनुष्याः आत्मनः हितं न जानन्ति। हे हरे ! कलौ युगे जन्म प्रायशः पापिनामेव। क्षुत् तृष्णोपहताः सर्वे त्वां न किञ्चन जानन्ति। ते यदि उपेक्षिताः सर्वे रौरवादयः नरकाः न पर्याप्ताः। पुनः ते नरकाः सहस्रधा सृज्याः भवेयुः। हे वेङ्कटाधीश ! दयालोल

हृदम्बुज ! तेषामनुग्रहार्थाय भवता स्थातव्यम्। ब्रह्मणा एवमभ्यर्थितस्तु कृपानिधिः उवाच –

हे ब्रह्मन् ! एतदभ्यर्थितं महद्वरमनुत्तमम्। तव सर्वजीवदयालुत्वमाश्चर्यम्। अनेन सुतरं प्रीतः यथेप्सितं तव दास्ये। सर्वेषां प्रत्यक्षः सर्वकामदः अत्रैव स्थास्यामि। हे चतुर्मुख ! श्रिया सार्धं आकल्पं च वसामि शेषेन गरुडेन विष्वक्सेनेन सर्वदा भूम्या नीलया सर्धं सर्वैः पारिषदैः सह आकल्पमत्रैव वसामि। विविधानि तपांसि मे केचिदत्र कुर्वन्ति, तेषां तपांसि सुलभेनाशुवर्त्मना सिद्ध्यन्तु। तथैव यज्ञकर्माणि योगाश्चापि योगिनां इयं स्वामिपुष्करिणी च अन्वर्थनामतः तीर्थानां स्वामिभूतत्वादुच्यते। यानि कानि च तीर्थानि गङ्गादीनि महीतले तानि सर्वाणि च अस्मात् तीर्थात् उत्पन्नानि। वैकुण्ठे ऐरंमदतटाकः यः तिष्ठति स एव स्वामिपुष्करिणीति गीयते। अत्र स्नानेन महापातककोटयः नश्यन्ति। रहस्ये प्रकाशतः उपपातकसङ्घाश्च अत्र स्नानेन नश्यन्ति। स्वामिपुष्करिणि सरोवरेऽस्मिन् यं काममुद्दिश्य स्नाति तं तं काममवाप्नोति । नात्र विचारणा कार्या। काणः कञ्जः कृशः कब्जः मूकः बधिरः, अनपत्यः दरिद्रः कुष्ठी वा व्याधिपीडितः परमात्मनि अनुत्तमां भक्तिं कृत्वा भगवद्दर्शनोत्सुकः आयाति चेत् यथा कामं प्राप्नोति। न संशयः। अद्य प्रभृति निश्शंकाः जनाः महीतले निर्बाधाश्च दिवारात्रं विचरन्तु इत्थमाश्वासः।

**श्रीवेङ्कटाद्रिनिकटस्थासुरवधार्थं चक्रपेषणम् १-१६**

दुर्दैत्यविनाशाभ्यर्थिनं विधिमाश्वास्य तदा सुदर्शनं हेतिराजं समाहूय अन्वशात्। सहस्रारज्वालामालाविभीषण हे सुदर्शन ! आगच्छ त्वम्। महाभाग शुभं मद्वचनं श्रृणु। सर्वायुधपरिच्छदैः कुमुदादिगणैः सार्धं इतः निर्गत्य, सहस्रा यत्र दैत्याः महाबलाः यक्षराक्षसनागाश्च ब्राह्मणहिंसकाः यत्र यत्र गिरावापि देशे वा काननेऽपि वा अस्य गिरेः परितः गत्वा दष्टान् महाबलान् निश्शेषं भस्मसात्कृत्य, देशं च निरुपद्रवं कृत्वा तत्र तत्रापि जनरक्षां विधाय आगच्छत्वं महाभागेत्याज्ञप्तः चक्राडपि तस्मात् गिरेः विनिर्गत्य दैत्यसङ्घान् सुदुर्जयान् अन्यानपि देशबाधाविधायकान् जनान् सर्वान् क्षणेन हत्वा, दुष्टौघान् निश्शेषं भस्मसा कृत्वा सर्वेषां पश्यतां हरेः सन्निधौ आगच्छन्। तत्समागत्य इदं वचः व्यजिज्ञपत्। तव चक्रिणः प्रतापात् ते दृष्टदैत्याः निहताः इति तस्मिन् चक्रराजे समायाते हरिः स्वयं पुनराह चतुर्मुखब्रह्मणा किमितः कर्तव्यमिति ? वदेति पृष्टः हर्षसमाकुलः ब्रह्मासौप्राह - ' हे देवेश ! प्रसन्नमुखपङ्कज वक्तुं बिभेमि इत्युक्तः, हरिः प्राह - ' मा भैषीः त्वं वदस्व तत् ' इत्याश्वस्तः पुनः प्राह ब्रह्मविदग्रणीः ब्रह्मा -

**श्रीवेङ्कटेश्वरमहोत्सवघट्टः १-१७**

ध्वजारोहणपूर्वः तव महोत्सवः कार्यः महाभूमन् ! स च त्वया श्रिया सह अङ्गीकार्यः। इति ब्रुवन् विधिना चोदितः क्रियतामिति अङ्गीचकार। वैखानसमुखैः मुनिभिः सह कन्यामासे गते रवौ ध्वजारोहणपूर्वकेन उत्सवं चकार। सर्वाभ्यः दिग्भ्यः सर्वे सुराः आहूताः। पुण्यकृत्तमाः राजानः विबुधाः सर्वे आगताः। ब्राह्मणाः क्षत्रियाः वैश्याः शूद्राश्च तथान्त्यजनाः नानाजातिसमुत्पन्नाः समुद्रवनवासिनः अङ्गवङ्गकलिङ्गेषु गौडकाश्मीरसिन्धुषु चोळमाळवपाण्ड्येषु कोसलेषु कुशेषु च वसन्तः ते जनाः सर्वे सकुटुम्बाः गोविन्देति पुनः पुनः सङ्घशः उच्चैः घुष्यन्तः समाययुः।

योगिनामप्यदृश्यः सर्वजन्तुषु दयया सर्वप्रत्यक्षतां यातः परात्परः श्रीनिवासः। विधिना निर्मितं महोत्सवमङ्गीचकार श्रीनिवासः। उत्सवे शार्ङ्गिणः श्रीनिवासस्य दर्शनं पुण्यप्रदं भवति इति ब्रुवन्तः ते सर्वे जनाः मध्ये मार्गे पानीयशालाः विविधान्नगृहाणि च चक्रुः। वाहनानि वासांसि छत्राणि आभरणानि च पादुकाश्च सर्वदैव दधतः सर्वे जनाः परस्परं नृत्यन्तः वादयन्तः गायन्तश्च वेङ्कटाह्वयभूधरं सेवितुमाजग्मुः। ब्रह्मा च शिल्पिनां वरं समर्थं विश्वकर्माणमाहूय समागत जनान् प्रति विश्वकर्माणमाहूय अन्नशालाः पानशालाः विविधाः उपकार्याश्च तत्र तत्र बहुधा कारिताः। गिरेश्च परितः नगराणि चकार। विश्वकर्मा तु विधिवत् मनोज्ञानि पुराणि। पुरे पुरे च विविधा वीथयः पुण्यवीथयः गणिकानां वणिजां पुण्यसम्पदः शोभन्ते। तत्र तत्र च मुक्ताविद्रुमराशयः शोभन्ते। सर्वे च धर्मनिरताः। सर्वे च तदा धनिनः एव। सेवार्थमागतानां वस्त्राण्यनेकशः ददुः। सद्यानि च ददुः। सर्वदा सर्वे पानीयान्नां ददुः। ब्रह्म च देवदेवस्य परमोत्सवं चकार। गन्धर्वाः कलं जगुः। अप्सरो गणाः ननृतुः। तदा विश्वकर्मा स्वसामर्थ्यं प्रकटीकृतवान्। तुङ्गप्रासादसम्बाधं विचित्रगृहभित्तिकं चन्द्रिकान्तशिलोपेतं सूर्यकान्तसमन्वितम् अनेकरत्नखचितं तप्तहाटकनिर्मितं, तप्तहाटकनिर्मितं, तुङ्गध्वजसमोपेतं, रत्नतोरणसंयुतं, जलसिक्तं पुष्पकीर्णं दिव्यरूपसूधूपितं, यथा गन्धर्वनगरं तत्र चकार नगरम्।

**बोधप्रश्नाः**

१.शङ्करस्य शेषाचलाग्नेयादिगवस्थानप्राप्तिं स्पष्टयत।

२. भगवन्तमुद्दिश्य दशरथेन कृतां प्रार्थनां लिखत।

३.भगवन्तं प्रति चतुर्मुखेन कृतां प्रार्थनां लिखत।

४. श्रीवेङ्कटाद्रिनिकटस्थासुरवधार्थं चक्रप्रेषणं विशदयत।

५.श्रीवेङ्कटेश्वरमहोत्सवघट्टं वर्णयत।

**सारांशः १-१८**

प्रियपाठकाः अस्मिन् खण्डे दशरथेन श्रीवेङ्कटाचलनिवासिनां दर्शनं, श्रीभगवदाविर्भावघट्टः ब्रह्मादीनां भगवन्मन्दिरप्रवेशादिवर्णनम्, अगस्त्यादिभिः कृता भगवत्स्तुतिः, इन्द्रादिभिः कृता भगवत्स्तुतिः, सनकादिभिः कृता भगवत्स्तुतिः दशरथेन कृता भगवत्स्तुतिः, ब्रह्मणा कृता भगवत्स्तुतिः, ब्रह्मादीन् प्रति भगवत्कृतकुशलानुयोगादयः, भगवते ब्रह्मादिभिः रावणोपद्रवनिवेदनम्, शङ्करस्य शेषाचलाग्नेयदिगवस्थाप्रप्तिः, भगवन्तमुद्दिश्य दशरथेन कृता प्रार्थना, भगवन्तं प्रति चतुर्मुखे कृता प्रार्थना, श्रीवेङ्कटाद्रिनिकटस्थासुरवधार्थं सुदर्शनचक्रप्रेषणम्, श्रीवेङ्कटेश्वरमहोत्सवघट्टश्च विवृताः।

**आदर्शप्रश्नाः १-२०**

निबन्धत्माकप्रश्नाः (प्रत्येकं २० /१५ अङ्काः)

१.दशरथेन श्रीवेङ्कटाचलवासिनां महर्षीणां दर्शनं वर्णयत।

२. श्रीभगवदाविर्भावघट्टं विशदयत।

३. ब्रह्मादीनां भगवन्मन्दिरप्रवेशादिवर्णनं लिखत।

४. श्रीवेङ्कटेश्वरमहोत्सवघट्टं वर्णयत।

**विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२ /१० अङ्काः)**

१. ब्रह्मादिभिः भगवते रावणोपद्रवनिवेदनं विशदयत।

२. भगवन्तं प्रति चतुर्मुखकृतप्रार्थनादिवर्णनं कुरुत।

३. श्रीवेङ्कटाद्रिनिकटस्थासुरधार्थं चक्रप्रेषणं स्पष्टयत।

४. श्रीवेङ्कटेश्वरमहोत्सववैभववर्णनं कुरुत।

५. महोत्सवसेवाफलदानफलप्रशंसादिकं विशदयत।

६. ब्रह्मादीन् प्रति भगवद्वचनानि स्पष्टयत।

**लघुप्रश्नाः (प्रत्येकं ५ अङ्काः)**

१. अगस्त्यादिभिः कृतां भगवत्स्तुतिं लिखत।

२. इन्द्रादिभिः कृतां भगवत्स्तुतिं लिखत।

३. सनकादिभिः कृतां भगवत्स्तुतिं लिखत।

४. दशरथेन कृतां भगवत्स्तुतिं लिखत।

५. ब्रह्मणा कृतां भगवत्स्तुतिं लिखत।

६. रावणविषये भगवता दत्तमभयमुद्दिश्य लिखत।

७. ऋषीनुद्दिश्य भगवद्वचनानि लिखत।

८. भगवन्तमुद्दिश्य दशरथेन कृतां पुत्रप्रार्थनां लिखत।

* * *

# UNIT - 4

## एकपञ्चाशत् अध्यायात्, सप्तपञ्चाशात् अध्यायावधि।

**प्रस्तावना १-१**

श्रीवराहपुराणान्तर्गते श्रीवेङ्कटाचलमाहात्म्ये प्रथमभागे प्रथमषडध्यायाः प्रथमखण्डे प्रस्ताविताः। द्वितीयखण्डे द्वितीयषडध्यायाः प्रस्ताविताः। तृतीयखण्डे तृतीयषडध्यायाः प्रस्ताविताः। अस्मिन् चतुर्थेखण्डे एकपञ्चाशत् अध्यायादारभ्य सप्तपञ्चशत् अध्यायावधि षडध्यायेषु प्रस्ताविताः विषयाः उच्यन्ते।

तत्र एकपञ्चाशे अध्याये श्रीवेङ्कटेश्वरमहोत्सववैभवर्णानं, महोत्सवसेवाफलदानफलप्रशंसादिकमुक्तम्। द्विपञ्चाशे अध्याये वेङ्कटाद्रौ पुष्पोद्याननिर्माणादिप्रशंसा महोत्सवावभृथस्नानप्रशंसा, ब्रह्मादीनां स्वावासगमनार्थं भगवदभ्यनुज्ञा च उक्ताः।

त्रिपञ्चाशे अध्याये श्रीवेङ्कटाद्रीशवैभवप्रशंसा, ब्रह्मादीनां स्वावासगमनं, फल्गुणीतीर्थमाहात्म्यं, जाबालितीर्थमाहत्म्यं, पूर्वस्यां दिशि सुदर्शनकृता सुरवधप्रकारश्चोक्ताः।

चतुः पञ्चाशे अध्याये सुदर्शनसैन्यासुरसैन्ययोः युद्धप्रशंसा कृता।

पञ्चपञ्चाशे अध्याये सुदर्शनस्यासुरवधार्थं दक्षिणदिग्गमनादिवर्णनं कृतम्।

षट् पञ्चाशे अध्याये वरुणदिशि असुरसुदर्शनसेनायुद्धप्रशंसा कृता।

सप्तपञ्चाशे अध्याये सुदर्शनस्यासुरवधार्थमुत्तरदिग्गमनं वर्णितम्।

**उद्देश्यम् १-२**

प्रियपाठकाः अस्मिन् खण्डे भवन्तः अधोलिखितबिन्दून् आलोचयिष्यन्ति।

- श्रीवेङ्कटेश्वरमहोत्सववैभववर्णनम्।
- महोत्सवसेवाफलदानफलप्रशंसादिकम्।
- वेङ्कटाद्रौ पुष्पोद्याननिर्माणादिप्रशंसा
- महोत्सवावभृथस्नानप्रशंसा
- ब्रह्मादीनां स्वावासगमनार्थं भगवदभ्यनुज्ञा
- श्रीवेङ्कटाद्रीशवैभवप्रशंसा
- ब्रह्मादीनां स्वावासगमनम्
- फल्गुणीतीर्थमाहात्म्यम्
- जाबालितीर्थमाहात्म्यम्
- पूर्वस्यां दिशि सुदर्शनकृतासुरवधप्रकारः

- ❖ आग्नेयदिशि सुदर्शनकृतासुरवधप्रकरः
- ❖ सुदर्शनस्यासुरवधार्थं दक्षिणदिग्गमनम्
- ❖ वरुणदिशि असुरसुदर्शनसेनायुद्धप्रशंसा
- ❖ सुदर्शनस्यासुरवधार्थंमुत्तरदिग्गमनम्

**श्रीवेङ्कटेश्वरमहोत्सववैभववर्णनम् १-३**

श्रीवेङ्कटेश्वरस्य दिव्योत्सवदिनेषु ब्रह्मा घृतसूपगुडोत्तरं नैवेद्यं बहुधा चक्रे। गुडान्नं, पायसान्नं, मुद्गान्नं, तिलौदनं, शाल्यन्नं कृपरान्नं, मरीच्यन्नं, गोधूमान्नं, माषान्नं, मधुरान्नं, घृतोत्तमम् एवं बहुविधान्नं, विविधानि फलानि, विचित्राणि मनस्तोषकराणि दिव्यान्यमृतकल्पानि सुस्वादुरसवन्ति। एकस्मिन् दिने उच्चैश्रवसमश्वं, एकस्मिन् दिने गजमैरावतं, एकस्मिन् दिने नागराजंम्, एकस्मिन् दिने त्रयीमयं गुरुडं च एकैकं समधिष्ठाय वेङ्कटाद्रिशिखामणिः दिने दिने सुरान् सर्वान् उत्सवार्थं समागतान् चित्रध्वजपताकाभिः छत्रचामरराजिभिः सहितः नृत्तवादित्रैः वरनारीगणैः सह कविभिः वन्दिभिश्चैव गायकैः पाठकैः तथा नित्यं वेदैः स्तूयमानः परात्परः श्रीनिवासः भूम्यां श्रियान्वितः अटन् रथ्यायाम् अनुजग्राह। तथैव सायं देवैश्च पदया पूजितः हरिः लोकवृद्ध्यर्थमुत्सवे ब्रह्मनिर्मिते ववृधे। वीतकल्मषाः मुनयः यागशालायां जुहुवुः।

वैखानसतपोधनाः मनोहरान् पूर्णकुम्भान् विधिवत् स्थापयामासुः। श्रीनिवासेत्सवदिनं पुण्यं पापप्रणाशनम् इति आगताः जनाः सर्वे अनेकशः दानानि चक्रुः अन्नदानं, स्वर्णदानं, वस्त्रदानं, गृहदानं च महापुण्यमिति मत्वा महाजनाः इष्टकादारुभिश्चैव निर्मितं हर्म्यसंयुतं प्रत्येकशः वेश्मसोपस्करमलङ्कृतं ददुः। राजानः तत्र भूरे विप्रेन्द्राः स्थापयामासुः। वैश्यान् अन्यांश्च मनुजान् विधिः स्थापयामास। सर्वदात्रैव वासः कर्तव्यः इति विनिश्चिताः विप्राद्याः मानवाः सदा तत्रैव वासं चक्रुः।

एवं श्रीवेङ्कटेशस्य वर्तमाने महोत्सवे कदाचित् नानारत्नविराजितं दिव्यं स्यन्दनं, तप्तजाम्बनदमयमुच्छ्रित्तध्वजशोभितं, नानाकुसुममाल्यैः च मुक्तमाल्यैश्च शोभितं हैमवस्त्रवितानाढ्यं सिद्धगन्धर्वसेवितं, विमानं पुष्पकं कान्त्या स्मारयन्तं मनोहरं, तं रथं श्रीभूमिसहितः परः समधिष्ठाय, स्फुरद्रत्नकिरीटमकुटोज्ज्वलः श्रीनिवासः तपोधनैः ब्रह्मादिदेवबृन्दैश्च सेव्यमानः, श्रियोज्ज्वलां राजवीथीं महावीथीं परिक्रम्य, पुनरागत्य तं दिव्यं वितानासनशोभितम् आस्थानमण्टपं तत्र हिरण्मयमधिष्ठाय, स्वयम्भुवकल्मषमाहूय भगवान् मधुरां गिरं वाचा अब्रवीत्।

**महोत्सवसेवाफलदानफलप्रशंसादिकं १-४**

श्रीभगवानुवाच !

हे ब्रह्मन्। त्वद्भक्त्या उत्सवेन च नितरां प्रीतोऽस्मि। मुनयो ! देवा ! राजानो ! योगिनः ! श्रुणुध्वम्। वर्षे वर्षेतु रवौ कन्याराशिं गते मासेऽस्मिन् ये केचिदत्र मम ब्रह्मक्लुप्तोत्सवं कुर्वन्ति ते भूमौ कामानवाप्य, ब्रह्मलोकं यान्ति। इममुत्सवमुद्दिश्य सेवार्थं यस्तु वासतः पदस्यैकस्य तस्यैव फलं भवति मत्पदम्। तस्य तु ऐहिकं फलम् अवान्तरफलं च भवेत्। ब्रह्मकल्पिते अस्मिन्नुत्सवे मां ये सेवन्ते तान् महीपालाः सेवन्ते। स्नेहात् वाञ्छितं दद्युः। उत्सवकाले ये देहिनः प्रसादं कुर्वन्ति तान् समुद्दिश्य मच्चित्तं क्षणात् शीतलं भवति। विशेषेण महोत्सवे अन्नदानं प्रशस्त्यं स्यात्। येऽपि चान्नं प्रत्यच्छन्ति तेषां सप्तकुलावधि बहुविधं चित्रम् अन्नं मया दीयते। ते तु भुक्त्वा बहून् भोगान् मया दत्तानभीप्सितान् मध्यतः स्वर्गं भुक्त्वा अन्ते मत्पदं यान्ति।

काणान्धपङ्गुमूकानामन्येषां विकलाङ्गिनाम् अन्नवस्त्रहिरण्यादिदातॄणां सम्पदः सदा अनायासेन सिद्ध्यन्ति। भुवि मनुजाः ये चात्रा स्थितं नित्यं वाच्छन्ति तेषामिहैव सम्पदं तथा सन्ततिं दास्यामि। भक्तेः तारतम्यवशात् तेषां सम्पदः सिद्ध्यन्ति।

अस्मिन् वेङ्कटाद्रौ येषां जननं स्थितिः मरणं वा तेषां मुक्तिः करस्था। ज्ञानसाध्या दुर्लभा। यानि कानि च दानानि शास्त्रोदितानि सन्ति तानि सर्वाणि दानानि इह क्रियमाणानि ऐहिकञ्च फलं दत्वा स्वर्गमीप्सितमेव। शरीरान्ते मत्पदञ्च ददाम्येषां न संशयः। वेङ्कटाद्रेः परितः भूमौ ग्रामान्वा पत्तनानि वा राजा ब्राह्मणो योऽपि कोऽपि वा श्रद्धया करोति सः राज्यश्रियं भुक्त्वा, चिरं स्वर्गादिकं

भुक्त्वा, मत्सायुज्यं व्रजत्येव। नात्र विचारणा कार्या। भूमौ पुण्यं क्षेत्रमिदम्। सदात्र स्थातव्यमिति बुद्ध्यात्र वसतां गृहक्षेत्रादिकं ददतीह नराः ते वासफलानि लब्ध्वा पुनः मामकं च पदं प्राप्नुवन्ति।

धृवमिदम्। अत्र ये वसतां प्राज्ञा विद्यादानमनुत्तमं कुर्वन्ति तेषां विदुषां कीर्तिः त्रैलोक्यगामिनी।
तद्बन्धुबन्धु तद्बन्धुबन्धुजनबान्धवाः सर्वेऽपि तत्फलं लब्ध्वा देवताः दिवि मोदन्ते।

**वेङ्कटाद्रौ पुष्पोद्याननिर्माणादिप्रशंसा १-५**

श्रीवेङ्कटेशः प्रीत्या जगाद ! वेङ्कटाद्रौ ये अनुत्तमं बृन्दावनम् उद्यानानि पुण्यानि नानावृक्षयुतानि पुष्पोद्यानानि च कृत्वा तत्पुष्पैः मामर्चयन्ति ते दलस्यैकस्य दिव्यानि वत्सराणि अर्बुदानि च परान् भोगान् स्वर्गे भुक्त्वा अन्ते मत्पदं यान्ति। महीतले तेषामीप्सितमवान्तरफलम्।

भुवि तेषां पुण्यकृतां न च सन्तति विच्छेदः। प्रतिवत्सरं यावन्ति फलपुष्पाणि पत्राणि उद्भवन्ति तथा तेषामपि महीतले कामाः सिद्ध्यन्ति।

यावत्प्रस्थचतुष्टयं प्रत्यहं मम नैवेद्यं सव्यञ्जनं कल्पयन्ति ते हि पुण्यतमाः भुवि ब्रह्मेन्द्रलोकप्रमुखाः तैः नरैः सुखेन जिताः तदीयदर्शनात् पुंसः महिमादयः भवन्ति। तेषामैश्वर्यसम्पत्तौ वक्तव्यं नावशिष्यते। अन्ते पुनरावृत्तिवर्जितं परंधाम यान्ति। वज्रमाणिक्यसंयुतं स्वर्णखचितं भूषणम्। महीतले मामुद्दिश्य ये पुण्याः प्रयच्छन्ति, रूपलावण्यसम्पन्नाः आयुषः विद्यावन्तश्च, मच्चन्दात् सम्पदोऽपि च तेषाञ्च पुत्राः भवन्ति।

पद्मकल्हारतुलसीचम्पकैः दामकारिणः श्रद्धयान्विताः ये प्रत्यहं मदर्चननिमित्तं लक्ष्म्या सहितः तेषां गृहे वत्स्याम्यहम्। तेषां येऽपि च साहय्यं कुर्वते श्रद्धयान्विताः तेषामपि सदा सम्पत्प्रदोहम्।

भोः सुराः योगिनः सर्वे येऽपि चात्र समागताः युष्माकं यद्यदिष्टं सकलं वरं तत् दास्येऽहम्। पुत्रान् पौत्रान् श्रियं वापि राज्यमारोग्यमेव वा आयुः कीर्तिञ्च यच्चान्यत् मत्तो वाच्छति यः पुमान् तत्तद्ददाम्यहं तस्मै सत्यं सत्यं न संशयः। बहुनेह किमुक्तेन ? ये चात्रवसतां पुनः आनुकूल्यं कुर्वन्ति ते मे प्रियतराः मताः। हे मनुजाः अत्र निवसद्भ्यः विबुधाश्च ये द्दह्यन्ति असुराः राक्षसाः यक्षाः पिशाचाः प्राणिनोऽपि वा तानहं सपुत्रपशुबान्धवान् नाशयिष्यामि। नियतोऽनियतोऽपि वा इमं वेङ्कटोद्रिं जनः व्याजाद्वा समारुह्य, स्वामिसरोजले स्नात्वा मां नमस्यति सोऽपि सकामः सर्वधा सुराः इति कूलङ्कषमहौदार्यगुणक्षीरपयोनिधिः श्रीवेङ्कटाधीशः तेभ्यः वराणि दत्वा भेरीमृदङ्गपणवमङ्गलस्वनसंयुतः पुष्पवृष्ट्या युतः श्रीभूमिसहितः श्रीमान् तदा महद्दिव्यं विमानं रत्नतोरणं अन्तः विवेश। ब्रह्मादयो देवगणाः सम्भूय प्रीतमानसाः जयेति च स्तुवन्, तेन घोषेणापूरितं जगत्। ततः ब्रह्मापि वेङ्कटेशस्य दिव्यमङ्गलसम्भ्रमं ऋषिभिः सहधर्मात्मा यथाशास्त्रमकारयत्।

### महोत्सवावभृथस्नानप्रशंसा १-६

ततः श्रवणानक्षत्रे शार्ङ्गिणः देवदेवस्य पुण्यं पवित्रं पापनाशनम् अवभृथं चकार। लोकपूजिते स्वामिपुष्करिणीपुण्यसलिले ब्रह्मादिदेवाः मुनयः योगिनोऽपि च सस्नुः। राजानः तथा विप्राः सर्वे नराः तदा योगीन्द्रः सर्ववित् सनकः तत्र स्नात्वा, सर्वेषां पुरतः तदेदं वचनमुवाच सर्वे श्रुण्वन्तु मद्वाक्यम्। उद्धृत्य भुजमुच्यते। ध्यानयोगिन ज्ञातं सम्यक् शास्त्रैश्च

चिन्तितं समस्ततीर्थभूतस्य देवदेवस्य चक्रिणः पुण्ये अवभृथे यः स्नाति तस्य तत्पूर्वजन्मसु अनन्तेषु कृतं पापं तत्क्षणादेव नश्यति।

इति श्रुत्वा महादेवः, विष्णुरपि तत्तथैवेति एवमेवेति चाब्रवीत्। तदा देवाः स्वामिपुष्करिणीं प्रशशंसुः। विविधैः दिव्यकुसुमैः राशीभूतैः सुगन्धिभिः अनेकैः उपचारैः वेदघोषैः सुखश्रवैः नृत्यगीतादिवादित्रैः दिव्यमङ्गलनिस्स्वनैः प्रसूनयागञ्च इष्ट्वा जनार्धनं तोषयित्वा सर्वदेवैः समन्वितः ब्रह्मा प्रणाममकरोत्। ततः प्रीतिसमायुक्तः श्रीनिवासः विधिमुवाच हे ब्रह्मन्। प्रीतोऽस्मि साम्प्रतम्। एतत्प्रीतिसमं तव दातुं किञ्चित् न विद्यते। जगत्सृष्टिपटो विधेः दास्यं किम् ? त्वमेवाहम्। अहमेव त्वम्। यद्यस्त्यन्यद्वदस्व तत् इति पृष्टः ब्रह्मावदत् स्वामिन्! यद्यस्ति ते कृपा कृतार्थोऽस्मि। लोकस्यानुग्रहं विना नान्यत्। एवमेव हरे अर्थिने ईप्सितं दद। लोकानुग्रहकाम्यया भवतात्र स्थातव्या पुनः पुनः याचनीयं ममाभीष्टमिदमेव। इति पृष्ठः रमाधीशः तथैव चास्त्विति चावदत्। इति।

## ब्रह्मादीनां स्वावासगमनार्थं भगवदभ्यनुज्ञा १-७

अमितौजसं ब्रह्माणं प्राह श्रीनिवासः - हे ब्रह्मन् ! पूर्वमेव त्वं सृष्टिकार्येषु नियुक्तः। त्वदीयलोकञ्च गत्वा, सृष्टिं कुरु ! सुखीभव। इन्द्र ! स्वकं लोकं गच्छ ! स्वकीयकं राज्यं शाधि। हे पिनाकपाणे ! भूतेश। त्वदीयकं लोकं गत्वा उमया विहरस्व ! त्वमवाप्तसकलेप्सितः। हे तपोधन अगस्त्य ! मुनिशार्दूल ! शिष्यैः सह स्वमाश्रमं प्रविश्य नित्यान्यतन्द्रितः कुरु। योगिनः। यथा योग्यमुत्तममावासं गच्छताम्। योगिभिः चिरध्यानामृतसुतृप्तैः स्थातव्यम् इति श्रीवेङ्कटाधीशः सर्वानुत्सवसङ्गतान् तत्तत्स्थानं समुद्दिश्य प्रीतिपूर्वकं विसृज्य, अन्वर्तिमानं श्रीभूमिसहितः प्रविवेश। इति।

## श्रीवेङ्कटाद्रीशवैभवप्रशंसा १-८

शौनकादिमहामुनयः सूतमहर्षिं ऊचुः - हे भगवन्। वेदशास्त्रार्थतत्त्वज्ञानसुनिष्ठित ! सूत ! अनुत्तमं महाश्चर्यमिहाख्यानं श्रुतम्। वेङ्कटद्रिप्रभावोऽयमीदृशः पापनाशनः। तत्रैव भगवत्प्रीतिः ईदृशी निस्तुला खलु। वेङ्कटेशः महाश्चर्यदिव्यचरित्रभूषणः। तस्य चारित्रमद्भुतं परमाद्भुतम् आश्चर्यदायकम्। जगतीतले कुत्रापि अदृष्टाश्रुतपूर्वं तत्। शृण्वतामिदमाख्यानं, नास्ति तृप्तिः। तथा विबुधान् विसृज्य रमापतिः विष्णुः किमकरोत् ? तेन विसृष्टाः देवाश्च किमकुर्वन् ? वद मुने इति पृष्टः सूतः अवदत् श्रूयतामिति तान् मुनीन्।

**ब्रह्मादीनां स्वावासगमनम् १-९**

ब्रह्मा तु हंसमारुह्य सुरैः स्तूयमानः सर्व लोकपितामहः सत्यलोकं जगाम। सहस्राक्षः पुरन्दरः दिव्यं विमानमास्थाय गन्धर्वैः गीयमानः अमरावतीं प्रविवेश। नन्दिकेश्वरमुख्यैः गणैः प्रथमसंज्ञकैः सहितः पार्वतीनाथः वेङ्कटाभिधं पर्वतं प्रदक्षिणं कर्वन्, वस्तुं स्थलममनुत्तमं पश्यन् आग्नेय्यं, दिशि वेङ्कटाद्रेः शिवं सरश्चाद्राक्षीत्। लोकपावनं पुण्यं कापिलं सरः दृष्ट्वा तत्र स्थातव्यमुमया सह रमणीयमिदमिति अत्रैवेति निश्चित्य, रजताचलं जगाम। योगिनः सनकाद्याश्च पापनाशनतीरतः परमप्रीताः अतिष्ठन्। महत्सु काननेषु सप्तऋषयः तत्रैव उत्तरपूर्वतः दिशि फल्गुणी झरतीरे स्व श्रमेषु सुखमवसन्। फाल्गुण्यां पूर्णिमायां तत्तीरे लक्ष्मी अरुन्धती तपः प्रीता पुरा प्रादुरासीत्।

**फल्गुणीतीर्थमाहात्म्यम् १-१०**

श्रीदेवी अरुन्धत्यै इष्टं वरं दत्वा तया प्रार्थिता सरितः नाम फल्गुणीशब्दपूर्वकं ददौ। फाल्गुणे मासि राकाख्ये फल्गुणीतारके तिथौ ये केचित् जनाः तत्र स्नास्यन्ति तेषामहं सदा सर्वकामफलप्रदा प्रीतो गृहे निवस्त्यामि। इति श्रीकमलासना पुनः तस्यै वरं दत्वा अन्तर्धानं गता। तत्र तत्तीरे मुनयः अवसन्। केचन देवाः सम्भूय विनिश्चित्य, विचार्य च अत्रैव वर्तते श्रीशः तस्मादत्रैव सर्वदा वेङ्कटेशं सेवमानाः स्थास्यामः इति निश्चिताः। स्वामितीर्थस्य उत्तरे, तथा देवनद्याः उत्तरे आश्रमं कृत्वा दिवौकसः तत्र सुखं न्यवसन्ते।

**जाबालितीर्थमाहात्म्यम् १-११**

सरसः उत्तरदिग्भागे पश्चिमे तटे स्वाश्रमे शिष्यैः विगतश्रमः जाबालिः न्यवसत्। केचित् गिरौ स्थिताश्चैव नित्यं श्रीनिवासं नमन्ति। केचित् गिरेः परिसरे न्यवसन्। परे पुनरप्यागमिष्याम इति जग्मुः। भगवान् अगस्त्यः तत्र श्रीमद्वेङ्कटनायकमर्चयन् चिरकालं महामुनिः शिष्यैः सह आनन्दपीयूषं पिबन् वेङ्कटाचले न्यवसत्। श्रिया भूम्या समेतः पुरुषोत्तमः वेङ्कटेशः कृतत्रेताद्वापरेषु देवराजैः महीक्षितैः कल्पितैः विविधैः परमाद्भुतैः उत्सवैः नित्यं पूजितः नित्यं याचते इष्टं ददन् मोदते। कलौ युगे श्रीवेङ्कटाचले तटिद्वृत्ति आस्ते।

**पूर्वस्यां दिशि सुदर्शनकृतासुरवधप्रकारः १-१२**

श्रीवेङ्कटेशाभ्यनुज्ञातः सुदर्शनचक्रेण दुष्टदानवसंघाश्च दुष्टचोराः महीभृताः निहताः इत्युक्तः। रणभूमिषु रथाङ्गस्य वृत्तान्तं परमधार्मिकः सूतः जगाद। चक्रराजस्य चारित्रं परमाद्भुतम्।

चक्रराजस्य वैभवं विस्तराद्वक्तुं न शक्यम्। 'दुष्टान्निबर्हय' इत्युक्तः चक्रराजो महाद्युतिः वेङ्कटनाथस्याज्ञां शिरसा धारयन् गन्धर्वगणसेवितः गिरेः शृङ्गात् निर्जगाम।

## सुदर्शनसैन्यासुरसैन्ययोः युद्धप्रशंसा १-१३

शेषाचलस्य पूर्वस्यां दिशि केचिन्महानगाः आसन्। तत्र वनोद्देशे दस्यवः बलदर्पिताः आसन्। उद्यतायुधनिस्त्रिंशाः खड्गचर्मासिपाणयः मायाविनः महाघोराः प्राणहिंसकाः पञ्चकाः क्षेत्रवित्तापहारेण नानाप्राणि भयङ्कराः वनदुर्गसमाश्रयाः नृपवर्याणामसाध्याः नित्यं द्विजान् विशेषतः साधूंश्च बाधमानाः नीलाञ्जनचयोपमाः गर्जन्तः मेघसङ्काशाः। तेषां शतसहस्राणि चोराणां निर्गतानां सुदर्शनमहाराजसेनायां तु पुरस्सराः केचिद्विख्यातसामर्थ्याः निर्गताः तयोर्मिथाः। अभूतपूर्वमुत्तमं युदधमभूत्। मायोपजीविनः ते चोराः सर्वे विलयं ययुः। तच्च वनं पक्षिमृगाकुलं निष्कण्टकमभूत्। सर्वे जनाः जानपदाश्च ये ते सर्वे मुदिताः बभूवुः। ब्राह्मणाः मुनयः योगिनः सर्वे तुष्टुवुः। तदारभ्य तस्मिन् देशे देहिनः निवसन्ति। तदा प्रभृति तद्देशे वासवश्चक्रशासनात् काले वर्षति तदा बहुधा फलान्ति सस्यानि। गावः बहुक्षीरदुहा। तथा सरः स्वादूदकमभूत। यथा कृतयुगे तथा जनाः सर्वे नीरोगाः, कृषिविद्यायां कुशलाः। विप्राः वेदेषु निष्ठिताः। तपस्विनः तपोधर्मे, योगिनः योगाभ्यासे च वणिजः सर्वे वाणिज्ये स्वस्वधर्मेषु निष्ठिताः। प्रभुः सुदर्शनहरिः देशमध्ये समागत्य जनान् सर्वान् समाहूय वचनं चेदमब्रवीत् किं कर्तव्यं भवताम् ? अस्ति चेद्वद वक्तुमर्हः इति।

जनाः ऊचुः -

हे प्रभो ! इतः पूर्वं वयं सर्वे दस्युभिः तस्करैः चोरैः चोरप्रायैः राजभिश्च सुभृशं पीडिताः। हे स्वामिन् ! भवतः प्रसादात् देशोऽयं निरुपद्रवः। ' वयं कृतार्थाः स्मः 'इत्युक्तः प्राह चक्रराट्। धमात्मानं कञ्चित् पुनः देशाधिपं नृपं कृत्वा न्याये वर्त्मनि वर्तध्वं यूयं तेन गतश्रमाः। हेतिभूपतिः एवं तं देशं सुरक्षितं चक्रे।

## आग्नेयदिशि सुदर्शनकृतासुरवधप्रकारः १-१४

आग्नेय्यां दिशि शेषाद्रेः केचित् दैत्यांशसम्भवाः महामायाविनः घोरा वञ्चकाः क्षत्रबान्धवाः जनान् तथा साधून् द्विजान् सर्वान् बाधमानाः आसन्। तेषां नासीत्कदाचन देवब्राह्मणविश्वासः। वने दुर्गं गिरौ दुर्गं स्थले दुर्गं एवमावासदेशस्तु कृत्वा अतिष्टन्। तत्र ते महासेनामागतामुद्यतायुधां ज्ञात्वा, शस्त्रैः अस्त्रैः परश्वधैः महाघोरम् अयुध्यन्त। तादृशानां चोराणां मायिनां निग्रहे बलाध्यक्षं ज्वालामुखं ससैन्यं सन्दिदेश। 'हे ज्वालामुख ! चोरान् मददुर्मदान् निश्शेषं कुरु राज्ञः' इत्याज्ञप्तः,

तदा तेन चक्रराजेन वनेचराः चोराः परमदारुणं युद्धं कृतवन्तः। ज्वालामुखः तत्सैन्यं मदमत्त इव लोडयामास। तत्र वनेचराः चोराः छिन्ना भिन्नाः जग्मुः। ते भीताः त्यक्तशस्त्रायुधाः पलायन्तेस्म। समरभूमिञ्च त्यक्त्वा वने सानुषु लीनाः। तत्र वनभूमिषु कश्चित् जनः न ददृशे। गिरेः दुर्गेषु सर्वेषु वनदुर्गेषु सानुषु महाबिलेषु कुञ्चेषु कुटीरेषु गुहासु च। मृगयामासुः अव्यग्राः तस्यचानुचराः। तदा कञ्चिच्च न ददृशः। विनर्गत्य विस्मिताः ते सर्वे ज्वालामुखाय एवं प्रोच्युः पदातयः। परमदुर्जयः सोऽपि विस्मितः तां मायां ज्ञात्वा, तद्देशवासिनः साधूनाहूय इदं वचो अब्रवीत् 'इमं देशं विसृज्यान्यदेशक्रमाशुगन्तव्यं क्षणमात्रादिति प्रोक्त्वा, परमं धनुः जग्राह। तस्मिन् तदा आग्नेयं मन्त्रवत् अस्त्रं सन्धधे। प्रजज्वाला च तद्दिव्यमस्त्रं पर मभास्वरम्। तदस्त्राच्च सहस्रशः कृशानवः निष्पेतुः। तदा भूतानि विचुकृशुः। सागराः चुक्षुभुः। वञ्चकाः चोराः यत्र तिष्ठन्ति ते अन्तर्धानं गताः, तत्रापि देशे च गत्वा, तानरीन् भस्मसात्कुरु इति तद्दिव्यमुत्तममाग्नेयास्त्रं चिक्षेप। तच्च रोदसी आक्रम्य , ज्वालमालासमाकुलं चोरदेशं गिरिदुर्गवनानि च समाक्रम्य वनेचराः मायिनः यत्र यत्र च तिष्ठन्ति, तानि सर्वाणि स्थलानि अन्यानि यानि च अदहत्। ते च सर्वे दुरात्मानः दग्धकेशितनुरुहाः तेषां स्त्रियः बालाश्च सर्वे वह्निना दग्धाः। अस्त्रस्य तेजसा तत्कुलं सर्वं दग्धं निर्बीजम्। तान् सर्वान् भस्मीकृत्य इषुधिं प्रविवेश।सुदर्शनः सद्यः शीतलकारिणीं वृष्टिं समानयामास। निर्गताः जनाः तं देशमाजग्मुः। भवतः तेजसा सर्वचोराश्च निहताः। सन्तुष्टः तं देशमागत्य, तत्र तानि दुर्गाणि सर्वाणि वनानि च स्थलीकृत्य प्रहतमार्गकं देशं प्रकाशानि चक्रे। तत्रत्यान् साधून् विप्रादिकानपि स्थापयामास तद्देशे धर्माध्यक्षं दयापरं स्थापयित्वा, देशिकान् वृष्टिशाल्यादिवृद्ध्या च पोषयामास।

### सुदर्शनस्यासुरवधार्थं दक्षिणदिग्गमनम् १-१५

सुदर्शनमहाराजः देशमकण्टकं कृत्वा, तस्माद्देशादपक्रम्य दक्षिणभागमाययौ। ससैन्यः सपरिच्छदः दक्षिणं देशमागत्य, निस्साणप्रमुखानि वाद्यानि च वादयामास। तेन महता शब्देन दारिता भधरा इव मदमत्तगजैरश्वैः सुन्दरैः पर्वतोपमैः अनेकैश्च तत्र वनं सहस्रधा चूर्णितम्। तथा गिरयः विपिनानि प्रकाशानि कृतानि। तैः सर्वैः वनदुर्गाणि सुगमानि कृतानि। तत्र दैत्यांशशम्भूताः शूराः शूद्रकुलोद्भवाः अङ्क , पङ्क, पुलिन्द, बिडाल, नालुक इति नामभिः एते शूराः प्रधानाः पञ्चैते पञ्चपापिनः। ते क्षेत्रवित्तापहारतः नित्यं द्विजान् बाधन्तेऽस्म। योगनिष्ठान्, तपोनिष्ठान्, यज्ञकर्मसु निष्ठितान् बालान्, पीडयन्तिस्म। स्त्रियः, वृद्धान् नित्यशः अग्निहोत्राणि, वेदाः, यज्ञाः, उत्सवः, आचाराः, वैदिकाः प्राणिनो भृशम्। क्षुद्राः बहवः प्राणिपीडाकराः आसन्। ते सर्वे सहसा तत्र पुनः पुनः विचार्य, राजासुदर्शनं समागतं ज्ञात्वा, सर्वैः सम्भूय चोद्धव्यं, नान्यथा

गतिरस्ति नः। राजा सुदर्शनो नाम सहस्रभुजमण्डितः। स राजा विक्रमे सहस्रकिरणो पंमः। यत्र यत्र स राजा कृद्धः पश्यति सत्वरं तत्तत्सर्वञ्च सहसा दग्धं भविष्यति किल। अतः चोराः वयं सर्वे सर्वदा सावधानाश्च योत्स्याम 'इति निश्चित्य, ते दस्यवः सम्भूय, यमचोदिताः युद्धार्थं तत्र समाजग्मुः। सुदर्शनोऽपि तान् दृष्ट्वा कृद्धः नाग इव श्वसन्, स्फुलिङ्गाक्षं बलाध्यक्षं ज्वालाकेशं महानटं कालान्तकं रणघ्नञ्च मानसान् पञ्चसृष्ट्वा, तथा चोराणां निग्रहे ससैन्यान् प्रेषयामास। रथैः अश्वैः नागानीकैः सुसंवृताः ते निर्ययुः। अस्त्रैः शश्त्रैश्च योधकाः समरे अन्योन्यं जघ्नुः। एवं प्रवृत्ते सङ्ग्रामे सुमहद्रजः निर्धूतं पङ्कं ज्वालाकेशः शितैः शरैः जघान। महासटः पुलिन्दश्च समरे शरैः जघा। कालान्तको विडालं, वालुकं, रणहा युधि आशीविषोपमैः क्रूरैः शरैः समरे जघान।

ततः राजा सुदर्शनः हयशीर्षं महाशरं अन्तर्धानं गता यत्र तिष्ठन्ति गिरिसानुषु ये प्राणपीडाकराः, दैत्यसम्भवाः, तान् सुदारुणं हीति धनुषि सन्धाय, महाप्रभुः क्षिप्रं विससर्ज। तदस्त्रनिर्गमध्वानैः दुरात्मनां सैन्यं भग्नं जातम्। वनेषु गिरि दुर्गेषु ग्रामे वा पत्तने वापि यत्र यत्र दुरात्मानः ते सर्वे च द्विधाकृताः। देशबाधकदुष्टेषु तदा न कश्चित् ददृशे। जलदुर्गं, गिरौ दुर्गं, तथा वनदुर्गं, स्थलदुर्गञ्च यश्चान्यो दुष्टदेहिनां निवासो तत्तत्सर्वं महाराजा महागजैः भग्नं कृत्वा, तं देशं प्रकाशं कृत्वा, प्रहतमार्गकं कृत्वा, सर्वत्र निहतकण्टकं महामार्गञ्च कृत्वा, विप्रक्षत्रादिकान् साधून् अन्यान् जनान् बहूनपि, स्वे स्वे धर्मे नियुज्यैव सुखं स्थापयामास। नीरोगाश्च जनाः सर्वे कामक्रोधपराङ्मुखाः वेदशास्त्रपराः सर्वे यज्ञैः सुनिष्ठिताः सर्वे। मेघाश्च काले वर्षन्तु। महीरुहाः फलन्तु च। अस्माकं शासनात् सस्यानि समृद्धानि सन्तु। इति अनुगृह्य, तान् सर्वान् तद्देशवासिनः वेङ्कटाधीशकरपङ्कजभानुमान् ववृधे।

तत्र देवाः समागत्य, देवं प्रभुं हरिं स्तुत्वा पुष्पवर्षाणि ववर्षुः। गन्धर्वाश्च कलं जगुः। इदानीमत्र वसतां लब्धं ब्राह्मण्यमुत्तमं भवतः प्रसादात् देशोऽयं सुखीकृतः । इति कीर्तितवन्तः।

**वरुणदिशि असुरसुदर्शनसेनायुद्धप्रशंसा १-१६**

राजा सुदर्शनः श्रीमान् प्रतापहतकण्टकः दक्षिणादिशमसाद्य, तां निर्बाधमेव कृत्वा, देशस्य रक्षणार्थाय कञ्चिन्नृपवरं धर्मात्मानं प्रतिष्ठाप्य, पश्चिमां दिशं प्रतस्थे। शतं शतसहस्राणि भेरीणां व्यनदं तदा। पताकिनः गजाः ध्वजयुक्ताः वाजिनः तत्र मत्तेभाः, कलभाः तथा गम्भीरवेदिनः शस्त्रवर्मायुथोपेताः युद्धकारणात् सन्नद्धाः। द्वीपसम्भूताः वायुवेगाः घोटाः अपरे सहस्रशः वर्मास्त्रशस्त्रसम्पन्नाः निर्युयुः। सिद्धानां विमानानीव शतशोऽथसहस्रशः भास्वराणि विचित्राणि

स्यन्दनानि निर्ययुः। तत्र वेङ्कटाद्रेः अदूरतः पश्चिमे भागे सिंहव्याघ्रनिषेवितं पर्वताकीर्णं काननं वृकभल्लूकसंयुक्तमासीत्। तस्मिन् महति कानने दैत्यांशः पर्वतोपमः किरातः कश्चिदुत्पन्नः। तस्य नाम काननकर्ता। तस्य पिता रिपुघ्नः। स तु शम्भुं समुद्दिश्य व्रत्तचर्यापरोऽभवत्। यक्षराक्षससिद्धानां मनुष्याणां महात्मनां दुर्जयत्वमसाविच्छन् साहसी कदाचन क्रतुध्वंसकरं रुद्रं ध्यात्वा, धृतिमान् नरः खड्गमादय पुष्पसम्भृतं स्वशिरः चिच्छेद। गन्धाद्यैः अलङ्कृतञ्च स्वशिरः शम्भवे अर्पयितुं चिच्छेद। प्रसादात् तत्क्षणात् रुद्रोतं पुनः जीवयित्वा, तदभिप्रेतं लब्ध्वा सादरमुत्तमं ददौ। वनकर्ता समागत्य, तस्मिन् वने दुरासदं स्थानं दुर्गं पराभेद्यमधिष्ठाय महाबलः, अनेकशतसाहस्रैरनोकैः परिवरितः वरदानबलोद्धतः लोकानुत्सादयामस। पीडिताः सर्वे विप्राढ्याः प्राणिनः तदा चुक्रुशुः। सः दुरात्मा सुदर्शनमहानृपं ज्ञात्वा, तं नृप इत्येव मत्वा, रणाय निर्जगाम।

केचिद्वित्रासिता नष्टाः। केचित्पार्श्वेन शायिताः। विभिन्नहृदयाः केचित् त्रिशूलैः धारिताः। एवं विद्रावितं सैन्यं तत् विलोक्य वनकर्ता क्रोधताम्राक्षः बभूव। सैन्याध्यक्षमुवाच महशूरं ज्वालापातं - जहि त्वं गच्छ शीघ्रतः इत्याज्ञप्तः ततः तूर्णं प्रतापवान् ज्वालापातः कनकाङ्गदः रथस्थः धनुर्विष्पारयामास। सुदर्शनम् हाराजः रुषा सेनाध्यक्षं सृजन् बडबामुखनामानं बडबानंलविक्रमं 'जहि त्वं समरे गच्छ ! शत्रुसैन्यमशेषतः ' इत्यब्रवीत्।

ततः सोऽपि सरथः निर्गतः शाङ्र्गमादाय सुमहति तस्मिन् बाणान् युयोज। ततः सैन्ये महारथः शत्रुसैन्ये मुमोच बडबाननः। शतं सहस्रमयुतं नराणां गजानां घटामेकां एकेन शितपत्रिणा जघान स महातेजाः कालानंलयमोपमः। एकामक्षौहिणीं सेनां सुदर्शनबलाग्रणीः मुहूर्तद्वयमात्रतः यमलोकं प्रापयत्। निश्शेषं स्तबलं सर्वं हतमालोक्य, वेगतः दिव्यमस्त्रञ्च सन्धाय तिष्ठतिष्ठेति च ब्रुवन् आजगाम रथात् शीघ्रं किरातो लघुविक्रमः। सुदर्शनमहाकोपसञ्जातः बडबाननः तं वनगोचरं विष्णुचक्रेण घोरं जघान। हते किरातराजे तु तद्वनं निर्मलं बभौ।

### सुदर्शनस्यासुरवधार्थमुत्तरदिग्गमनम् १-१७

सुदर्शनमहाराजः सहस्रकिरणोपमः तं देशं पश्चिमदिशराज्यं हतावग्रहकण्टकं हतदुष्टञ्च कृत्वा, सर्वाणि दुर्गाणि गिरिस्थलवनानि च गजैरश्वैः विनिहत्य सर्वदिक्षु महापथं कृत्वा तत्र मनुजान् यथासुखं स्थापयित्वा तद्देशरक्षकं सत्यवादिनं धर्मिष्टं कञ्चित् निवेश्य देशमध्ये सत्वरं जनानामन्त्र्य सबलः तस्मात् दुष्टचोरजिगीषया प्रतस्थे। पदातयः गजाश्वाश्च रथाश्च गिरिसन्निभाः अग्रे ययुः। सर्वतः वाद्यानि वादयान्तिस्म। वेङ्कटाद्रेः उत्तरे भागे कश्चिन्महासुरः भेरुण्डो नाम दैत्यानां प्रवरः

बलदर्पितः पर्वतसन्निभः पुरा ब्रह्मणा दत्तवरः आसीत्। स तु तत्र निवासञ्च कृत्वा, बहुभिः वृतः वेङ्कटाद्रौ तदन्यस्मिन् गिरौ काननेऽपि वा तपांसि कुर्वतां तदन्यस्मिन् गिरौ काननेऽपि वा तपांसि कुर्वतां विघ्नं कुर्वन् प्राणिभयङ्करः ग्रामे पत्तने वापि स्थितान् विप्रादिमनुषान् सततं तीक्ष्णं बाबधे। तेन देशः पीडितः। काम्भोजा यवनाश्चापि म्लोच्छाः सङ्करजातिजाः भेरुण्डस्य बलोद्रिक्ताः प्राणिपीडकाः तत्रासन्। ते सर्वे पापकर्माणः मुसलायुधाः सम्भूय सन्नध्दाश्चैवमागत्य ते महत् वदनं चक्रुः। सुदर्शनभटाश्चापि भेरुण्डस्य भटाः अपि महत् कदनं चक्रुः। किरातैः आधिकोर्जितैः सुदर्शनभटाः हताः। क्रोधेनारुणताम्राक्षः प्रजज्वालान्तकः कृद्धे तस्मिन् प्रभौ सर्वं जगत् बभौ। चापी खड्गी रथी तूणी कश्चित् कनकपिङ्गलः नाम्ना पावकसङ्काशः साक्षात्पावकविक्रमः पुरुषः उद्भुतः। 'जहि दैत्यान्' इति सुदर्शनः तमाज्ञा पयत्। पावकः सर्वशस्त्रास्त्रसम्पन्नः समरे बभौ प्रलयाग्निरिवादित्यसहस्रसदृशप्रभः पावकः परसैन्येषु बाणवर्षाणि मुमोच। विस्मयकारकं कञ्चित् विनोदं कारयामास। दैत्यानां सम्मोहनार्थं गन्धर्वं समचोदयत्। परमास्त्रेण मोहिताः त्यक्तोद्युत वरायुधाः तत्सर्वं परसैन्यञ्च स्वजनसार्धगं मत्वा नायुद्ध्यन्त। तदा योधाः पुनः सेनापतिं दृष्ट्वा, पुनः स्वकुलोद्भवं जनकं पावकसङ्काशं , नाम्ना मत्वा सर्वे वसुधातले पतित्वा नमन्तिस्म। तद्दृष्ट्वा देवगन्धर्वाः सिद्धविद्याधरादयः परमं विस्मयं जग्मुः। साधु साधु इति च अब्रुवन्। तान् दृष्ट्वा पावक प्रख्यः मोहितानां प्रमापणं अयुक्तमिति तद्दिव्यं तदा उपसंहृतवान्। विमुक्तमोहाः ते सर्वे शस्त्रबाणकान् गृहीत्वा, असिभिः पट्टसायुधैः घोरं कदनं चक्रुः। ततः पावकसंकाशः युद्धकांक्षिणां परेषां क्रौञ्चमस्त्रं समादाय 'छिन्दि भोः कर्णनासे त्वमिति मन्त्रं जजाप। तत् क्षणात् कृत्तनासाश्च कृत्तकर्णाश्च संयुगे। भिण्डिपालेन सर्वेषां बाहून् सर्वतः चिच्छेद। ते सर्वे वीतहस्ताश्च परान् खादितुमुद्यताः। तच्च दृष्ट्वा सर्वविस्मयकारकं मन्त्रेण मन्त्रितं पैशाचिकास्त्रं घोरं तदा विससर्ज पावकसंकाशः। तेनास्त्रेण स्वसैन्यं युद्धभूमिषु निश्शेषं निहतं दृष्ट्वा भेरुण्डः ततः क्रुद्धः परमदारुणं शूलं गृहीत्वा पावकप्रख्यमभिदुद्राव। संयुगे योजनत्रितयोत्सेधः तदा मेदिनी कम्पयन् पावकार्चिः समप्रभः वायुव्यमस्त्रं प्रायुङ्क्त। पर्वतसन्निभं तृणं वात्येव भ्रामया मास। वेङ्कटाद्रेः प्रदक्षिणं कारयित्वा दानवं तं दैत्यम् आकाशे दशयोजनं पुनरुत्क्षिप्य, परमाद्भुतं वायव्यं भूमौ पातयामास। पर्वतोपमं भेरुण्डं जीर्णकूष्माण्डवत् भूमौ सशीर्णः पातयामस।

एवं तं दैत्यं निहत्य, देशमकण्टकं कृत्वा वनदुर्गाणि सर्वाणि खिलीकृत्य, तदा जनान् वेङ्कटाद्रौ ससुखं स्थापयामास सुदर्शनः। आकाशे देवगन्धर्वाः पुष्पवर्षं च विकीर्य, साधु साधु इति तं देवं तदा स्तुतिभिः अस्तुवम्। स्वामिन् ! प्रभो ! जनपदाः सर्वे त्वया स्वस्थाः कृताः।

पुनः त्वं वेङ्कटाधीशसमीपं त्वरितं गच्छ। इत्युक्त्वा सर्वे देवाः मुदान्विताः दिवं ययुः। ये तु स्वसैन्येषु हताः पुनः तान् जीवयित्वा तदा वेङ्कटेशाज्ञया तं देशं स्वस्थं चकार। काले पर्जन्यः। ववर्ष । पादपाः फलवन्तश्च। तदा सुतरां सर्वसस्यानि तत्र फलन्तिस्म। जनाः सर्वे नीरोगाश्च। दुष्टबाधा न च क्वचित्। 'वैकुण्ठोऽयमथन्यो वा स्वर्गो वा भोगतः किम् ? इति सर्वे तं देशं श्रीवेङ्कटाभिधं मेनिरे। दिवौकसः देवा अपि तत्रैव जन्म वाच्छन्ति। सुदर्शनमहाराजः सहस्रभुजमण्डितः प्रतापवान् वेङ्कटनाथस्य आज्ञां सम्यक् कृत्वा, जयमङ्गलघोषैश्च कुसुमोत्करवृष्टिभिः सर्वसैन्यैश्च संयुक्तः मङ्गलं तद्वेङ्कटेशस्य विमानं प्रविवेश।

**सारांशः १-१८**

प्रियपाठकाः अस्मिन् खण्डे श्रीवेङ्कटेश्वरमहोत्सववैभववर्णनं, महोत्सवसेवाफलदानफलप्रशंसादिकं, वेङ्कटाद्रौ पुष्पोद्याननिर्माणादिप्रशंसा, महोत्सवावभृथस्नानप्रशंसा, ब्रह्मादीनां स्वावासगमनार्थं भगवदभ्यनुज्ञा, श्रीवेङ्कटाद्रीशवैभवप्रशंसा, ब्रह्मादीनां स्वावासगमनं, फल्गुणीतीर्थमाहात्म्यं, जाबालितीर्थमाहात्म्यं, पूर्वस्यां दिशि सुदर्शनकृतासुरवधप्रकारः, सुदर्शनस्यासुरवधार्थं दक्षिणदिग्गमनं, वरुणदिशि असुरसुदर्शनसेनायुद्धप्रशंसा, सुदर्शनस्यासुरवधार्थमुत्तरदिग्गमनम् इत्यादयः विवृताः।

**आदर्शप्रश्नाः १-२०**

निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः)

१.आग्नेयदिशि सुदर्शनकृतासुरवधप्रकारं विशदयत।

२. असुरवधार्थं सुदर्शनस्य दक्षिणदिग्गमनं व्याख्यात।

३. वरुणदिशि असुरसुसुदर्शनयोः युद्धं वर्णयत।

४. असुरवधार्थं सुदर्शनस्य उत्तरदिग्गमनं विशदयत।

**आचार्यप्रथमयवर्षम्, पुराणेतिहासः -द्वितीयपत्रम्**

विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२/१० अङ्काः)

१. सुदर्शनसैन्यासुरसैन्ययोः युद्धप्रशंसां लिखत।

२.पूर्वस्यां दिशि सुदर्शनकृतासुरवधप्रकारः वर्णनीयः।

३. ब्रह्मादीनां स्वावासगमनं स्पष्टयत।

४. महोत्सवावबृथस्नानप्रशंसां कुरुत।

५. वेङ्कटाद्रौ पुष्पोद्यानिर्माणादिप्रशंसां लिखत।

६. महोत्सवसेवाफलदानफलप्रशंसादिकं वर्णयत।

**लघुप्रश्नाः (प्रत्येकं ५ अङ्काः)**

१. श्रीवेङ्कटेशमहोत्सवं वर्णयत।

२. ब्रह्मादीनां स्वावावासगमनार्थं भगवदभ्यनुज्ञां स्पष्टयत।

३.श्रीवेङ्कटाद्रीशवैभवप्रशंसां लिखत।

४. फल्गुणीतीर्थस्य माहात्म्यं लिखत।

५. जाबालितीर्थस्य वृत्तान्तं विशदयत।

६. पञ्चपापिनां वृत्तान्तं विशदयत।

७. काननकर्तुः वृत्तान्तं स्पष्टयत।

८. भेरुण्डस्य वृत्तान्तं विवृणुत।

**एकाङ्कप्रश्नाः (प्रत्येकं १ अङ्काः)**

१. सुदर्शनेन सृष्टः कनकपिङ्गलः कः ?

२.पावकेन प्रयुक्तं प्रथमं अस्त्रं किम् ?

३. पावकेन प्रयुक्तं द्वितीयमस्त्रं किम् ?

४. च्छिन्दि भोः कर्णनासेत्वमिति केनोक्तम् ?

५. वेङ्कटाद्रेः उत्तरभागे राक्षसः कः आसीत ?

६. काम्भोजाः कस्मिन् बले आसन् ?

७. मोहितानां प्रमापणंमयुक्तमिति केनास्त्रमुपसंहृतम् ?

८. भिण्डिपालस्य बाहून् चिच्छेद कः ?

९. पावकसङ्काशेन प्रयुक्तं तृतीयमस्त्रं किम् ?

१०. पावकसङ्काशेन चित्रः धर्मः कः ?

११. वेङ्कटभूधरे चित्रः धर्मः कः ?

१२. रमाधीशः अभीप्सितं शीघ्रं केषां दास्यति ?

१३. मतान्तरप्रविष्टानामपि भक्तिः भविष्यति कस्मिन् ?

१४. कलियुगे श्रीशः कुत्र विहरिष्यति ?

१५, कस्मात् परो देवो नस्त्यन्यः शरणं भुवि ?

१६. कस्य समो देवो नास्ति महीतले ?

१७, कलौ युगे मानवः नित्यं कीदृशः भवति ?

१८, निश्शेषं कुरु राज्ञस्तान् इति केनाज्ञप्तम् ?

**एकाङ्कप्रश्ननानामुत्तराणि १- २१**

| | |
|---|---|
| १. पावनसङ्काशः | २. सम्मोहनास्त्रम् |
| ३.क्रौञ्चास्त्रम् | ४. पावकसङ्काशेन |
| ५. भेरुण्डः | ६.भेरुण्डस्य |
| ७. पावकसङ्काशेन | ८. पावकसङ्काशः |
| ९. पैशिचकास्त्रम् | १०. वायुव्यमस्त्रम् |
| ११. वैष्णवः | १२. शूद्राणाम् |
| १३. श्रीनिवासे | १४. वेङ्कटाद्रौ |
| १५. वेङ्कटेशात् | १६. वेङ्कटेशस्य |
| १७. द्रव्यार्जनपरः | १८. सुदर्शनेन |

# UNIT - 5

## अष्टपञ्चाशत् अध्यायात् द्विषष्ठि अध्यायावधि।

प्रस्तावना १-१

श्रीवराहपुराणान्तर्गते श्रीवेङ्कटाचलमाहात्म्ये प्रथमभागे प्रथमष्टडध्यायाः प्रथमखण्डे प्रस्ताविताः। द्वितीयखण्डे द्वितीयषडध्यायाः प्रस्ताविताः। तृतीयखण्डे तृतीयषडध्यायाः प्रस्ताविताः। चतुर्थखण्डे चतुर्थषडध्यायाः प्रस्ताविताः। अस्मिन् पञ्चमे खण्डे प्रथमभागस्यान्तिमाः षडध्यायाः अष्टपञ्चाशत् अध्यायादारभ्य द्विषष्ठि अध्यायावधि प्रस्ताविताः विषयाः उच्यन्ते।

अष्टपञ्चाशे अध्याये श्रीवेङ्कटेशस्य कलिदोषोपहतेषु विशेषतः कृपाधिक्यवर्णनं कृतम्।

एकोनषष्ठितमे अध्याये चेतनस्य आचार्याश्रयणात् पुरुषार्थप्राप्तिनिरूपणं कृतम्।

षष्ठितमे अध्याये अष्टाङ्गयोगस्वरूपनिरूपणं कृतम्। सनकसनन्दनतीर्थमाहात्म्यं, कायरसायनतीर्थमाहात्म्यं, चोक्तम्।

एकषष्ठितमे अध्याये श्रीवेङ्कटेशाष्टोत्तरशतनामावलिकीर्तनं कृतम्।

द्विषष्ठितमे अध्याये महर्षीणां श्रीवेङ्कटेशसेवार्थं श्रीवेङ्कटाचलागमनं, मृर्षिभिः कृता भगवत्स्तुतिः, सूतं प्रति शौनकादिस्तुति, श्चोक्ताः। अनेन श्रीवराहपुराणान्तर्गते श्रीवेङ्कटाचलमाहात्म्ये प्रथमभागः समाप्यते।

### उद्देश्यम् १-२

प्रियपाठकाः अस्मिन् खण्डे भवन्तः अधोलिखितान् बिन्दून् आलोचयिष्यन्ति।

- ❖ श्रीवेङ्कटेशस्य कलिदोषोपहतेषु विशेषतः कृपाधिक्यवर्णनम्।
- ❖ चेतनस्य आचार्याश्रयणात् पुरुषार्थप्राप्तिनिरूपणम्।
- ❖ अष्टाङ्गयोगस्वरूपनिरूपणम्।
- ❖ सनकसनन्दनतीर्थमाहात्म्यम्।
- ❖ कायरसायनतीर्थमाहात्म्यम्।
- ❖ महर्षीणां श्रीवेङ्कटेशसेवार्थं श्रीवेङ्कटाचलागमनम्
- ❖ महर्षिभिः कृता भगवत्स्तुतिः
- ❖ सूतं प्रति शौनकादिस्तुतिः

**श्रीवेङ्कटेशस्य कलिदोषोपहतेषु विशेषतः कृपाधिक्यवर्णनम् १-३**

**मुनयः ऊचुः।**

दिव्यरसायनं वेङ्कटेशस्य कथां पिबतामस्माकं न तृप्तिः। भूयः तृष्णा भवति। कलौ कलौ वेङ्कटाद्रि शिखामणिः कथं तिष्ठेत् ? कः पूजयिष्यति ? तस्य वरदानं कीदृशम् ? हे महामुने ! तत्सर्वमस्माकं वक्तुमर्हसि। इति पृष्टः सूतमहर्षिः श्रीवेङ्कटेशस्य कथामब्रवीत्।

**श्रीसूत उवाच ।**

मांसचक्षुषां नराणांमर्चावतारवत् भूयात्। वैकुण्ठादागतं दिव्यं विमानन्तु तिरोहितम्। कलियुगसन्धिकाले श्रीवेङ्टेशस्यवर्तनमेवमेव। तदितरकालेषु भेदो मौनं तत्र स्थितिः कलियुगे मानवाः विमानमात्रं तु कारयिष्यन्ति। कदाचित् क्षत्रसम्मताः महात्मानः पुण्यशीलाः भवेयुः। कदाचित् ब्राह्मणाः पुण्यशीलाः भवेयुः। कदाचित् वाल्लवानराः पुण्यशीलाः भवेयुः। मोहित्राः अर्चावतार इत्येव वदिष्यन्ति। कलौयुगे केचित् तथैववमतिं करिष्यन्ति। श्रीनिवासः साक्षात्पश्यन् अपश्यन्निव तिष्ठति। साक्षाद् भाषणमेकन्तु तस्य नास्ति। परन्तु निग्रहानुग्रहावपि सर्वमस्त्येव। कलौ युगे वरदानं तु अधिकं भविष्यति। कृतकन्तु विमानं स्यात् इत्याख्यामात्रमेव। किन्तु दर्शनमात्रेण पापकोटिं हरेत्। निश्चयमिदम्। कदाचित् स्वल्पपूजैव महती फलम्। कदाचन स्वल्पैव। स्वयं हि वेङ्कटाधीशः प्रकाशं व्रजेत् क्वचित्। कदाचित् वेङ्कटाद्रिशिरोमणिः अप्रकाशं व्रजेत्। एवं रमया सर्वं तत्र क्रीडत्येव। कलौयुगे केशवः वैचित्र्यं दर्शयिष्यति। अल्पदानेन, भक्त्या, स्वल्पया पूजया, स्मृतिमात्रेण केशवः प्रसन्नश्च भविष्यति। नृणां वेङ्कटाख्यगिरिं प्रति गमनमात्रेण प्रसन्नः स्यात्। इष्टञ्च बहुक्षिप्रं दास्यति। स्वयमप्राकृतो विष्णुः यथा प्राकृतो चरित्रं तथा करिष्यति देवः तान् जनान् मोहयिष्यति। मानुषांश्चैव भोगांश्च भोक्ष्यते प्रीतमानसः। मानवाः विविधान् उत्सवान् अस्य करिष्यन्ति कलौ युगे सर्वार्थे देवाश्च आगयिष्यन्ति। स्वामितीर्थे स्नास्यन्ति। निवेदनं करिष्यन्ति। मनुष्याणामगोचराः निवेदितं भक्षयेयुः।

तद्धिविमानं पश्येयुः। सादराः पूजयेयुः। देवाश्च भविष्यामो नरा इति प्रार्थयिष्यन्ति। वेङ्कटाधीशः तेषां चेप्सितं क्षिप्रं दास्यति।

स्वल्पधर्मेण सन्तुष्टः पुत्रं क्षेत्रं कलत्रकम् आरोग्यं भूतिमैश्वर्यं राज्यप्राप्तिञ्च सत्वरं दास्यति। दुर्लभमायुः नृणां स्वर्गलोकादीनामपि जन्मकोटिशतश्चैव कृतैः पुण्यैः दुरासदां नित्यविभूतिञ्च देवोऽसौ आचार्यसंश्रयात् दास्यति। वेङ्कटभूधरे वैष्णवो धर्मः अहो चित्रः। आश्चर्यमाश्चर्यमिति ब्रुवन्तः वैमानिकाः कमलासनाद्याः भविष्यद्वृत्तान्तमिति मया गीतं व्रजेयुः।

कलौ युगे सम्प्राप्ते वेङ्कटाचलः विशेषात् प्रख्यातः भूमौ अधिकं भविष्यति. रमापतिः तत्र सान्निध्यमधिकं करिष्यति। म्लेच्छसङ्करजातीनां श्वपाकाधमयोषितां, किरातपुल्कसादीनां शूद्राणां हीनजन्मनां श्रीवेङ्कटाधीशे भक्तिः अधिकञ्च भविष्यति। तेषामपि रमाधीशः शीघ्रमभीप्सितं दास्यति। यतो तत्र हरिः भक्त्या क्रीतः सान्निध्यं कुरुते। आर्याः तुरुष्काः मालव्याः गौडा वङ्गाः कलिङ्ककाः आन्ध्राः कर्नाटदेशीयाः कोसलोद्भूतमानुषाः अङ्गाः चोलाश्च पाण्ड्याश्च नानादेशेषु सम्भवाः द्वीपान्तारवासाश्चापि श्रीवेङ्कटेशमहोत्सवे महाभक्तिं धारयन्तः कोटिशः आगमिष्यन्ति। सर्वेष्टं करं लब्ध्वा मुदान्विताः भविष्यन्ति। श्रीवेङ्कटाचलः अप्राकृतः स्वर्णसानुरपि कलौयुगे भूमौ प्राकृता चलवत् भविष्यति। मतान्तरप्रविष्टानामपि भक्तिर्भविष्यति सर्वात्मके परमात्मनि रमाधीशे वेङ्कटेशे। एवं पराभूक्तिं कृत्वा पावनाः भविष्यन्ति। भक्तिमन्तं दृष्ट्वा केशवे भक्तिं गच्छेत् परः। तथा दृष्टफलार्थं भजमानाय सादरं दृष्टप्रदं वेङ्कटेशं दृष्ट्वा पुनः तं व्रजेत्। सोऽपि दृष्टफलं लब्ध्वा वरानपि शतं भजेत्। कलियुगे श्रीशः वेङ्कटाचले चित्रं विहरिष्यति। अत एव 'कलिः साधुः साधुः शूद्रश्च। साध्वः योषितः। विशेषाद्वेङ्कटाधीशसेवनं साधुभूषणम्। इत्येवं कलियुगे मुनयो देवा वदिष्यन्ति। कलिदोषपरीतानां नराणां पाकर्मणां भुवि शरणं वेङ्कटेशात्परो देवो नास्त्यन्यः। वेङ्कटेशसमोदेवो नास्ति नास्ति नास्ति महीतले। स्वामिपुष्करिणीतीर्थसमं नास्ति न चास्ति हि। कलौयुगे श्रीनिवासः नित्यं द्रव्यार्जनपरो भविष्यति। लोकानामनुग्रहाय सर्वदा कामैः पूर्णोऽपि ' इदं द्रव्यं त्वया तावत् दातव्यं मम सम्प्रति 'तवाभीष्टमहं दास्ये दास्य इत्येव च ब्रुवन् इति सर्वजनैः सार्धं क्रीडमाणो भविष्यति। कलौ तदीयचारित्रं वक्तुं कल्पशतैरपि न शक्यम्। तस्य मङ्गलं चरित्रं लेशेनोक्तम्।

**चेतनस्य आचार्याश्रयणात् पुरुषार्थप्राप्तिनिरूपणम्**

**मुनयः ऊचुः -**

हे सर्वशास्त्रार्थवेदवेदाङ्गपारग ! आचार्यसंश्रयादेव परां गतिं लभन्ते इति, अहो वैष्णवधर्मः इति चोक्तं पुरा त्वया। तत्सर्वं वक्तव्यमिति।

**श्रीसूत उवाच।**

पुरा पातालात् भूमिमुद्धृत्य, वेङ्कटाह्वयभूधरे सितेन भूवराहेण धरण्यै भाषिताः मनोहराः ये ये धर्माः तान् वैष्णवान् धर्मान् व्यासप्रसादात् वेद्म्यहम्। गोप्याद्गोप्यतरानपि सङ्ग्रहेण प्रवक्ष्यामि। तेषां वैष्णवधर्माणां विश्वासस्तु परागतिः। यावानपि च विश्वासः तावती सिद्धिरीरिता।

गुरुरेव परोधर्मो। गुरुरेव परागतिः। पापं क्षपयति क्षिप्रं गुरुरेवात्मभावनः। तस्मात्सर्वप्रयत्नेन

परमं गुरुं विश्वसेत्। तत्पापं गुरुर्हन्ति। तत्पापं गुरुर्हरेत्। पारम्पर्यक्रमाद्विष्णुः सर्वपापहरो गुरुः। कारुण्यमूर्तिः। श्रीविष्णुः पापिनः गुरुरूपी। शास्त्रहस्तेन संसारमग्नान् जनान् उद्धरते। न्यायवित् शास्त्रवेदी च धर्माधर्मविवेक्वान् तपो निष्ठाः, ब्रह्मनिष्ठः, तपः स्वाध्यायने रतः। निर्ममः निरहङ्कारः शान्तः दान्तः विमत्सरः परार्थैक प्रयोजनः गुरुरित्युच्यते। संसारदावेभ्यः भीतः शान्तोदान्तः शुचिर्बुधः।

अतः परमनिर्विण्णः निर्वैरः सर्वजन्तुषु, महाविश्वासपूर्वकं गुरुं भक्त्या समांश्रयेत्। गुरो श्रीपादपङ्कजे सर्वभारांश्च निक्षिपेत्। हरेः भयात् यथाशक्ति नित्यनैमित्तिके कुर्वन् मन्त्रान्तरविवर्जितः मोक्षार्थं निर्भरः तिष्ठेत्। द्वयानुष्ठानतत्परः, साधनान्तरहीनश्च ‘ नाष्टाक्षरात्परो मन्त्रो , नास्ति नारायणात्परः।

नास्ति न्यासात्परो योगो तथा ब्रवीति च श्रुतिः इत्येवं वर्तमानस्य देहान्ते परमं पदं न्यासविद्यापरश्चैवं परमार्थवित् वर्तते। ध्याननिष्ठः, लब्धाशी वैराग्यं परमाश्रितः अहङ्कारविहीनः वाक्कायमानसः सर्वेन्द्रियाणि संयम्य, विविक्तं स्थलमाश्रितः बलदर्पविहीनः, कामक्रोधविवर्जितः शान्तः निर्ममश्चापि परिग्रहविवर्जितः ब्रह्मध्यानस्य वैभवात् ब्रह्मभूयाय कल्पते। ब्रह्मभावं गतस्यास्य मानसं प्रसन्नं भवेत्। तस्य न शोकः न चेच्छा च सर्वभूतसमो भवेत्। तस्य हरिभक्तिः भवेत्। भक्त्या केशवं जानाति। पश्चात् प्रसन्नाधीः भगवत्तत्त्वयाथाम्यं वेत्ति। ततः परमसङ्गाच्च विष्णोः सायुज्यमश्नुते। न्यासविद्यानिविष्टस्य कर्मणां त्यागः इष्यते। त्यागश्च फलतः प्रोक्तः स्वरूपेण न च क्वचित्। कर्मणः नियतस्यैव त्यागः मोहमूलकः। कर्माणि त्यजतः पुंसः देहस्य धारणं नास्ति। यज्ञादीनां त्यक्तसङ्गः अशेषतः कर्माणि कुर्यात्।

यज्ञान् प्रजश्चापि सृष्ट्वा चतुर्मुखः ब्रह्मा भगवत्प्रीतिकारकः परोधर्मः यज्ञ एव । अभीष्टकामधुक् यज्ञः। तस्मात् यज्ञः परागतिः। तस्मात् सर्वाः प्रजाःसङ्गविवर्जिताः यज्ञं कुर्युः। यज्ञैः प्रीतः हरिः सर्वमभीष्टञ्च प्रयच्छति। तस्मात् अभीष्टं लब्ध्वा पुनः यज्ञं कुर्यात्। न चेत् स्तेन एव सः विज्ञेयः। सः सर्वकर्मबहिष्कृतः। ततः फलसङ्गविवर्जितं कर्म कर्तव्यम्। पुरा केचित् कर्मणैव परां सिद्धिमितो गताः। भगवत्तत्त्वनिष्ठस्य तदा ज्ञालङ्गनं महान् दोषः। वेदाः स्मृतयः धर्मसङ्ग्रहाश्च तदाज्ञा। आदौ पुंसां आज्ञानुवर्तनं कार्यम्। योगवित्तमः सर्वदा हरौ कर्माणि सन्न्यसेत्। भगवद्ध्यानमाश्रितः निर्ममो नित्यतृप्तश्च। सुखदुःखे समे कृत्वा लाभं हानिं जयं तथा पराजयञ्च शीतोष्णो मानं चाप्यवमानकम् सर्वत्रगं परंब्रह्म सन्तमात्मनि ध्यायन् प्रातः आरभ्य कर्माणि कुर्वन्, इज्यादिकं तथा स्वाध्यायञ्च तत्तत्कालेनं योगं हापयेत्। नित्यं नैमित्तिकं कर्म यथा शक्तिविनिर्वहेत्। वेङ्कटाद्रौ बृन्दावनं मालकरणमेव सेवनञ्चैव यथाशक्तिनिवेदनम्।

तदीयाराधनञ्चापि कुर्वन् विद्वेषमात्मसु, श्रीमद्वेङ्कटनाथस्य विनिवेदितैः जलैः अन्नैः वस्त्रैः तथा माल्यैः शरीरस्य पोषणं कुर्वन् आचार्यमाहात्म्यात् मापरां गतिमवाप्नुयात्।

**अष्टाङ्गयोगस्वरूपनिरूपणम् १-५**

द्वे ब्रह्मणी वेदितव्ये, परञ्चापरमेव च। क्षराक्षरविभेदवान् जीवः। अपरं ब्रह्म। क्षरस्तु सर्वभूतं स्यात्। कूटस्थो हि अक्षरः स्मृतः। परं ब्रह्म तु सर्वात्मा परमात्मा प्रकीर्तितः। सर्वलोकान् बिभर्ति। अन्तः प्रविश्य नियच्छति। यो अव्ययः नित्यः स एव ईश्वरः पुरुषोत्तमः। अतीतः क्षरमत्यर्थं अक्षरस्य परः पुमान्। यस्मात् तस्मात् लोके असौ विख्यातः पुरुषोत्तमः। इति यो वेत्ति पुरुषं सः परार्थवित् भवति। सः सर्ववित् समाधिना वेङ्कटेशं भजेत्। वेदविदां श्रेष्ठः
बुद्धिमान् योगमारभ्य, यमनियमासन भेदान् पूरकरेचककुम्भकइत्यादीन् प्राणायामांश्च प्रत्याहार, धारण, ध्यानभेदांश्च समाधिं च साधयेत्। यमादिध्यानपर्यन्ताः समाधेः सिद्धि हेतवः। समाधिः स्वाङ्गसहितस्तु अष्टाङ्गो योग उच्यते। प्रत्यहं योगं कुर्यात्। परमपुरुषार्थोऽयमिति विश्वसनीयः।

निषिद्धाचारतः पुंसो निवृत्तिः यमः उच्यते। स्वाध्यायो नियमः प्रोक्तः। स्वस्तिकादि आसनं विदुः। रेचकः पूरकः कुम्भकश्चेति प्राणायामः त्रिधा प्रोक्तः। विषयेभ्यः चित्तोपसंहृतिः प्रत्याहारः इति कथ्यते। आत्मन्येव मनसः स्थापनं धारणं स्मृतम्। तैलधारावदविच्छिन्नज्ञानसन्तानक्षणं ध्यानं स्यात्। आत्मविज्ञानं ज्ञात्रुज्ञेयाभिधात्मकम्। ज्ञातुः ज्ञे यस्य बुद्धेश्च भेदज्ञानं यदा न हि, तदा परमानन्दजनने

परमानन्दे चिदात्मनि मनः यदा महायोगं तदा समाधिः गीयते।

मेधावी एवमभ्यस्य पञ्चकालपरायणः तत्तत्कालविधानोक्तम् आचारञ्च समाचरेत्। प्रतिदिनं सायंकाले कीटादि सर्वबाधाविवर्जिते विविक्तदेशे मृद्वासने सुखासीनः तथा स्वस्तिकाद्यासने

ऋजुकायशिरोग्रीवो नासाग्रन्यस्तलोचनः इडया वायुमाकृष्य, कुम्भयेत् शनैः शनैः सुप्तां कुण्डलीं सुषुम्नायां प्रवेशयेत् योगिनः देहे जिहासा यदा वर्तते तदा योगी वेङ्कटेशमनुस्मरनु अर्चिरादिकमार्गेण अर्चिराकृतिं परमं पदं प्रविश्य, वेङ्कटेशस्य सायुज्यं लब्ध्वा चिरम् आनन्दी भवेत्। वेङ्कटेशस्य कैङ्कर्ये धीः बलीयसी यदि स्यात् तदा योगं स्थिरः कुर्यात्। स्वयं गुरोः उपदेशात् विचक्षणः पूर्वोक्तेनैव मार्गेण योगं कुर्यात्।

इडया वायुमाकृष्य सुषुम्नायां प्रवेशयेत्। अर्चिषा सह कोष्ठाग्नेः हृदयाम्बुजं प्रविशेत्। तत्रस्थं शङ्खचक्रगदाधरं केशवं बुद्ध्वा आज्ञास्थानमतीत्य सुधीः भ्रूमध्यं प्रविशेत्। नीवारशूकवत्सूक्ष्मं श्रियः पतिं तत्र पश्येत्। सहस्रपत्रकमलमध्यस्थं चन्द्रमण्डलं सुराधीशं सुधात्मकं रमाधीशं तत्र

पश्येत् सहस्रपत्रकमलमध्यस्थं चन्द्रमण्डलं सुराधीशं सुधात्मकं रमाधीशं तत्र पश्येत्। तत्सङ्कल्पात् चन्द्रबिम्बात् स्रवत्पीयूषबिन्दुना अन्तर्बहिस्तथा व्याप्तं स्वस्य देहं विचिन्तयेत्। तथा सुषुम्नायाः मार्गात् अवरुह्य शनैः शनैः प्राणादीन् वयौ पूर्ववत् तत्तत्स्थानेषु स्थापयेत्। एवञ्च प्रत्यहं सन्ध्यामध्यमरात्रिषु कुर्वन्। विना हस्तेन आत्मनि वायोः धारणं कुर्वीत। शारीरादधिकं वायुं द्वादशाङ्गुलमानकं न्यूनं वा वायुमात्मानि शरीरेण समं कुर्यात्। एवमभ्यासयोगेन नरः वज्रकायो भवेत्। कालमृत्यू विनिर्जित्य आचन्द्रतारकं जीवेत्।

## सनकसनन्दनतीर्थमाहात्म्यम् १-६

अस्य योगस्य भुवि बहवो विघ्नाः भवन्ति चेत् अविघ्नयोगसिद्ध्यर्थं वेङ्कटाह्वय भूधरे पापनाशस्य उत्तरे क्रोशार्धे सिद्धसेविते सनकसनन्दनं नाम्ना पुण्यं सरः किञ्चित् अस्ति। अतिगोप्यं तत् केऽपि मनुजाः भुवि न जानन्ति। मार्गशीर्षमासे शुक्लपक्षे द्वादश्यामरुणोदये नियतमानसः स्वामिपुष्करिणीतीर्थे स्नात्वा त्रयोदशीं समारभ्य सनकसनन्दने स्नायात्। तत्र स्नात्वा विमलः वेङ्कटाद्रिपतेः श्रीमदष्टाक्षरं मन्त्रमयतमन्वहं जपेत्। पश्चात् योगं समभ्य सेत्। ततः सिद्धो भविष्यति।

## कायरसायनतीर्थ माहात्म्यम् १-७

सनकसनन्दनतीर्थस्य समीपे रहस्यं कायरसायनं तीर्थमस्ति। तस्य पानात् तत्क्षणात् देहोऽपि शुद्धो भवति। यत्किञ्चित् पाण्डुपत्रं तु परीक्षार्थं विनिक्षिपेत् तस्मिन् तीर्थे, क्षणादेव शोभनं श्यामं भवति सनकादिभः योगिभिः तत् रहस्यतीर्थं शिलया पिहितम्। पुण्यवतां महात्मनां हि तत् दर्शनं ददाति। येन केन प्रकारेण बुधः देहदृढं कृत्वा, सर्वदा वेङ्कटेशस्य कैङ्कर्यमेव कुर्वीत। शेषिणो हरेः कैङ्कर्यं स्वरूपमात्मनः। तस्मात् कैङ्कर्यहीनः पुरुषः स्वामिद्रोही, न संशयः। तस्मादेव बुधः नित्यं नैमित्तिकं कुर्वीत। अन्यच्च शास्त्रैः अनिन्दितं प्रीतिकर्मापि करणीया। इत्युक्तं प्राक् वराहेण धरण्यै श्रीवेङ्कटाचले। शरीरधारणं भोगः ज्ञानं सामर्थ्यमेव च क्षेत्रं गृहं धनं धान्यं यच्चान्यदुपकल्पितं सर्वं वेङ्कटनाथस्य स्वाधीनमञ्जसा कुर्यात्। बुद्धिमान् ऐश्वर्यमिदं सर्वं जगत् पश्येत् पापकारी नरके पतत्येव, न संशयः। पुण्यकृत् सुखमाप्नोति बुद्धिमान् धृवमित्येव चिन्तयेत्। सततं वेङ्कटनायकं चित्ते योगी चिन्तयेत्। गुरुशुश्रूषणे रतः सदा धर्मशास्त्रं पश्येत्। योगी गृहस्थः जितेन्द्रियः स्वेषु दारेषु रमेत्। आत्मनः हितं साधूनेनेव सदा योगी पृच्छेत्। वेदार्थान् विचारयेत्। सदा वेदान्तमभ्यसेत्। बहुना किमुक्तेन ? विहितं नैव त्यजेत्। निषिद्धं नानुतिष्ठेत्। सारोऽयं धर्मसङ्ग्रहः।

**श्रीवेङ्कटेशाष्टोत्तरशतनामावलिः १-८**

हे सर्वार्थ तत्त्वज्ञ ! सर्ववेदान्तपारग ! श्रीमद्वेङ्कटनायकः येन चाराधितः सद्यः अभीष्टसर्वार्थप्रदः भवति, तत् ब्रूहि। इति पृष्ठः सूतः स्वात्मनि ध्यात्वा तत्क्षणात् मुनिः मुनिशार्दूलान् श्रूयतामिति उवाच।

सूत उवाच !

भगवत्प्रीतिकारकं महद्गोप्यं किञ्चिदस्ति। पुरा महात्मने कपिलाय आदिशेषेण कथितम्। नाम्नामष्टशतं पुण्यं पवित्रं पापनाशनम्। स्वर्णदीपसम्भवानि हेमपद्मानि आदाय, ब्रह्मा पूर्वं श्रीमद्वेङ्कटनायकं समभ्यर्च्य, अष्टोत्तरशतैः दिव्यैः नामभिः मुनिपूजितैः अभ्यर्च्य, स्वाभीष्टं लब्धवान् ब्रह्मा सर्वलोकमपितामहः। भवद्भिरपि तैश्च नामभिः पद्मैश्च समर्च्यः। शेषनगाधीशमानसोल्लासकारिणां तेषां नाम्नामष्टशतं वेङ्कटाद्रिनिवासिनः वक्ष्ये पुंसामायुरारोग्यदं, धनधान्यसुखप्रदं ज्ञानप्रदं विशेषेण महदैश्वर्यकारकं वेङ्कटेशपदाङ्कितैः दिव्यैः नामभिः अर्चयेत्।

नाम्नामष्टशतस्यास्य ऋषिः ब्रह्मा प्रकीर्तितः छन्दः अनुष्टुप्। तथा देव वेङ्कटेशः उदाहृतः। नीलगोक्षीरसम्भूतः श्रीनिवासः बीजमित्युच्यते बुधैः। तथा शक्तिः श्रीनिवासः। वेङ्कटाधिपः हृदयम्। तद अभीष्टसिद्ध्यर्थे विनियोगः निगद्यते।

१. ओं वेङ्कटेशाय नमः
२. ओं शेषाद्रिनिलयाय नमः
३.ओं वृषद्दग्गोचराय नमः
४.ओं विष्णवे नमः
५.ओं मेरुपुत्रगिरीशाय नमः
६.ओं सरः स्वामितटीजुषे नमः
७.ओं कुमाराकल्पसेव्याय नमः
८. ओं वज्रिदृग्विषयाय नमः
९.ओं सुवर्चला सुतन्यस्त सैनापत्यभराय नमः
१०.ओं रामाय नमः
११. ओं पद्मनाभाय नमः
१२. ओं सदावायुस्तुताय नमः

१३. ओं त्यक्तवैकुण्ठलोकाय नमः

१४. ओं गिरिकुञ्जविहारिणे नमः

१५. ओं हरिचन्दनगोत्रेन्द्रस्वामिने नमः

१६. ओं शङ्खराजस्य नेत्राब्जविषयाय नमः

१७. ओं वसूपरिचरित्रात्रे नमः

१८. ओं कृष्णाय नमः

१९. ओं आब्धिकन्यापरिष्वक्तवक्षसे नमः

२०. ओं वेङ्कटाय नमः

२१.ओं सनकादिमहायोगिपूजिताय नमः

२२. ओं देवजित्प्रमुखानन्तदैत्यसंघप्रणाशिने नमः

२३. ओं श्वेतद्वीपसन्मुक्तपूजितांघ्रियुगाय नमः

२४. ओं शेषपर्वतरूपत्वप्रकाशनपराय नमः

२५. ओं सानुस्थापित तार्क्ष्याय नमः

२६. ओं तार्क्ष्याचलनिवासिने नमः

२७. ओं मायागूढविमानाय नमः

२८. ओं गुरुडस्कन्धवासिने नमः

२९. ओं अनन्तशिरसे नमः

३०. ओं अनन्ताक्षाय नमः

३१. ओं अनन्तचरणाय नमः

३२. ओं श्रीशैलनिलयाय नमः

३३. ओं दामोदराय नमः

३४. ओं नीलमेघनिभाय नमः

३५. ओं ब्रह्मादिदेवदुर्धर्शविश्वरूपाय नमः

३६.ओं वैकुण्ठागतसद्धेमविमानान्तर्गताय नमः

३७. ओं अगस्त्याभ्यर्धित अशेषजनदृग्गोचराय नमः

३८. ओं वासुदेवाय नमः

३९. ओं हरये नमः

४०. ओं तीर्थपञ्चकवासिने नमः

४१. ओं वासुदेवप्रियाय नमः

४२. ओं जनकेष्टप्रदाय नमः

४३. ओं मार्कण्डेयमहातीर्थजातपुण्यप्रदाय नमः

४४. ओं वाक्प्रतिब्रह्मदात्रे नमः

४५. ओं चन्द्रलावण्यदायिने नमः

४६. ओं नारायणनगेशाय नमः

४७. ओं ब्रह्मक्लुप्तोत्सवाय नमः

४८. ओं शङ्खचक्रवरानम्रलसत्करतलाय नमः

४९. ओं द्रवन्मृगमदासक्तविग्रहाय नमः

५०. ओं केशवाय नमः

५१.ओं नित्याय नमः

५२. ओं नित्ययौवनमूर्तये नमः

५३. ओं अर्धितार्थप्रदात्रे नमः

५४. ओं विश्वतीर्थापहारिणे नमः

५५. ओं तीर्थस्वामिसरस्स्नातजनाभीष्टप्रदायिने नमः

५६. ओं कुमारधारिकावासस्कन्धाभीष्टप्रदायकाय नमः

५७. ओं जामदग्नसमुद्भूतपोत्रिणे नमः

५८. ओं कुर्ममूर्तये नमः

५९. ओं किन्नरद्वन्द्वशापान्तप्रदात्रे नमः

६०. ओं विभवे नमः

६१. ओं वैखानस मुनिश्रेष्ठपूजिताय नमः

६२. ओं सिंहाचलवासाय नमः

६३. ओं श्रीमन्नारायणाय नमः

६४. ओं सद्भक्तनीलकण्ठार्च्य नृसिंहाय नमः

६५. ओं कुमुदाक्षगणश्रेष्ठसैनापत्यप्रदायकाय नमः

६६. ओं दुर्मेधः प्राणहर्त्रे नमः

६७. ओं श्रीधराय नमः
६८. ओं क्षत्रियान्तकाय नमः
६९. ओं रामाय नमः
७०. ओं मत्स्यरूपाय नमः
७१. ओं पाण्डवारिप्रहर्त्रे नमः
७२. ओं श्रीकराय नमः
७३. ओं उपत्यकाप्रदेशस्थशङ्करध्यातमूर्तये नमः
७४. ओं रुक्माब्जसरसीकूललक्ष्मीकृततपस्विने नमः
७५. ओं लसल्लक्ष्मीकराम्भोजदत्तकल्बारकस्रजे नमः
७६. ओं सालग्रामनिवासय नमः
७७. ओं शुकदृग्गोचराय नमः
७८. ओं नारायणार्धिताशेषजनदृग्विषयाय नमः
७९. ओं मृगयारसिकाय नमः
८०. ओं वृषभासुरहारिणे नमः
८१. ओं अञ्जनागोत्रपतये नमः
८२. ओं वृषभाचलवासिने नमः
८३. ओं अञ्जनासुतदात्रे नमः
८४. ओं माधवीयाधुहारिणे नमः
८५. ओं प्रियङ्गुप्रियभक्षाय नमः
८६. ओं श्वेतकोलवराय नमः
८७. ओं नीलधेनुपयोधरासेकदेहोद्भवाय नमः
८८. ओं शङ्करप्रियमित्राय नमः
८९. ओं चोलपुत्रप्रियाय नमः
९०. ओं सुदर्मिणीसुचैतन्यप्रदात्रे नमः
९१. ओं मधुपातिने नमः
९२. ओं कृष्णाख्यविप्रवेदान्तदेशिकत्वप्रदाय नमः
९३. ओं वराहाचलनाथाय नमः

९४. ओं बलभद्राय नमः

९५. ओं त्रिविक्रमाय नमः

९६. ओं महते नमः

९७. ओं हृषीकेशाय नमः

९८. ओं अच्युताय नमः

९९.ओं नीलाद्रि निलयाय नमः

१००. ओं क्षीराब्धिनाथाय नमः

१०१. ओं वैकुण्ठाचलवासिने नमः

१०२. ओं मुकुन्दाय नमः

१०३. ओं अनन्ताय नमः

१०४. ओं विरिंचाभ्यर्धितानीतसौम्यरूपाय नमः

१०५. ओं सुवर्णमुखरीस्नातमनुजाभीष्टदायिने नमः

१०६. ओं हलायुधजगत्तीर्थसमस्तफलदायिने नमः

१०७. ओं गोविन्दाय नमः

१०८. ओं श्रीनिवासाय नमः

अष्टोत्तरशतं नाम्न्यां च चतुर्थ्या नमसान्वितं श्रद्धाभक्तिसमन्वितः यः नित्यं पठेत् शृणुयात् तस्य श्रीवेङ्कटेशः प्रसन्नो भवति धृवम्। अष्टोत्तरं शतम् अर्चनायां विशेषण ग्राह्यम्। वेङ्कटेशाभिधेयैः श्रीवेङ्कटेशाष्टोत्तरशतेन वेङ्कटाद्रिनिवासिनं नामभिः यः अर्चयति तस्य फलं मुक्तिः, न संशयः गोपनीयमिदं स्त्रोत्रं सर्वेषां न प्रकाशयेत्। श्रद्धा भक्तियुजामेव नामसङ्ग्रहं दापयेत्। इति महात्मने कपिलाय शेषेण कथितम्। कपिलाख्यमहायोगिसकाशात् मया श्रुतमिति, हरेः प्रीतिकरं तदद्य सद्यः भवतामुक्तमिति सूतोक्तिः।

**महर्षीणां श्रीवेङ्कटेशसेवार्थ श्रीवेङ्कटाचलागमनम् १-९**

**सूत उवाच ।**

हे तपोधनाः यूयं पुनः किं श्रोतु मच्छथ। ब्रूत। तदशेषञ्च वक्ष्यामि। नात्र विचारणा कार्या इत्युक्ता, मुनयस्सर्वे एवमिदं प्रोचुः वचः।

**मुनयः ऊचुः।**

हे भगवन् ! भगवद्भक्तिक्षीरसागरचन्द्रमाः अनघ ! सूत ! त्वया वेङ्कटेशस्य माहात्म्यम् उक्तम् तस्य चारित्रं विचित्रं तथा निस्तुलम्। रहस्यानि च नामानि, वेङ्कटेशकथामृतं श्रोत्राभ्यां पीतम्। तस्मात् चक्षुर्द्वयस्यापि पिपासा गरीयसी। वेङ्कटेशितुः सेवार्थं त्वमस्मान् अनुजानी हि । शेषाद्रेः तदीशितुश्च रहस्यानि नामानि, स्वामिपुष्करिणीतीर्थमाहात्म्यञ्च प्रकाशितम्। कलौ युगे हरेः दिव्यं माहात्म्यमेवात्यद्भुतम्। इत्युक्तस्तु ततः सूतः मुनिपुङ्गवान् प्रोवाच।

हे मुनयो ! यूयं शनैः श्रीवेङ्कटाचलं गच्छध्वम्। तत्र गत्वा, पुण्यं गिरं प्रदक्षिणं कृत्वा, पर्यन्ततीर्थेषु स्नात्वा, पर्यन्तगान् सुरान् नत्वा, शुककोकिलमङ्गळं तं रत्नसानुमारुह्य, पद्मवनवातेन रञ्जितां स्वामिपुष्करिणीं प्राप्य, तत्तीर्थे स्नात्वा, दर्शनात् पापनाशनं हृदयानन्दजननं पुलकोद्गमकारकं विमानं च प्रविश्य, परिसृत्य, भूवराहञ्च नत्वा, श्रीभूमिभ्यां मुदायुक्तं, शङ्खचक्रवरायुधे दधानं, पुण्डरीकाक्षं, स्मयमानमुखाम्बुजं, दयामृततरङ्गाब्धिमन्दस्मितमनोहरं श्रीवेङ्कटाधिपं सम्यक् दृष्ट्वा, नत्वा,नामाभिः स्तुत्वा, कमलैः अर्चयित्वा, दुर्लभमभीष्टञ्च लब्ध्वा कृतकृत्या विवर्तध्वमित्युक्ता मुनायः तथा सूतमामन्त्र्य, ते सर्वे प्रहृष्टाश्च भरद्वाजः क्रौशिकः, जाबालिः, काश्यपः, क्रतुः, दक्षः, पुलस्त्यः, गौतमः, पुलहः, अङ्गीरसः, देवलः, देवदर्शनः कौत्सः, कण्वः, मृकण्डुः, शतानन्दः, मैत्रेयः प्रमुखाः तपोधनाः सङ्घशः उच्चैः पुनः पुनः गोविन्देति घुष्यन्तः भागीरथीं तीत्वा, पश्चात् गौतमीं कृष्णवेणिकां च तीर्त्वा, तत्र तत्र महानद्यां स्नात्वा स्नात्वा, तपोधनाः वेङ्कटाद्रिं समागत्य, तप्तजाम्बूनदात्मकं, सर्वतीर्थमयं पुण्यं, सर्वसिद्धनिषेवितं मदमञ्जुलमायूरकेकास्वनमनोहरं, दिव्यनिर्झरसम्पूर्णं, फलपुष्पद्रुमैर्युतम्, अनतिक्रम्य इमे बुधाः सूतोक्तसेवाक्रमं चक्रुः। निर्झरेषु सरस्सु च मन्त्रैश्च स्नानं कुर्वन्तः , तानि रम्याणि सानूनि मणिमन्ति च पश्यन्तः श्रोत्ररम्याणि पक्षिणां वचनान्यपि श्रृण्वन्तः, सामगानानि गायन्तः, स्तुतिसञ्चयं पठन्तः, सम्भ्रमात् नृत्यन्तः सर्वे तपोधनाः हर्षावेशवशंगताः उत्पतन्तः पतन्तश्च शनैः शनैः सम्यक् गिरिप्रदक्षिणं कुर्वन्तः ते, कापिलतीर्थे स्नात्वा, शिवं दृष्ट्वा नत्वा, मेरुशृङ्गाभं सिद्धगन्धर्वसेवितंमारुह्य, अत्यद्भुतात् रत्नसानोः हेमाद्रेः अद्भुतो गिरिः अयम् अभूतपूर्वः श्रीमद्वेङ्कटभूधरः इति ब्रुवन्तः ते सर्वे उत्तमं दिव्यं विमानं ददृशुः। स्वामितीर्थे च स्नात्वा, देवं श्रियः पतिं, कोटिकन्दर्पलावण्यं, किरीटमकुटोज्ज्वलम्, उरस्स्थितश्रिया आक्रान्तमुक्तादामोपशोभितं, चतुर्भुजमुदाराङ्गं शङ्खचक्रधरं, श्रीभूमिसहितं विष्णुं, पद्मार्चितपदाम्बुजं प्रणेमुः। सहसा हृष्ट्वा हर्षोत्फुल्लविलोचनाः वेदमन्त्रैः श्रुतिसम्यतैः स्तोत्रैश्च तुष्टुवुः।

**महर्षिभिः कृता भगवत्स्तुतिः १-१०**

पार्थिवानि रजांसि सुबहूनपि गणयेत् विष्णोः वीर्याणि निश्शेषं न गणयेत् पुमान् मुखात् विप्रः, भुजात् राजा, ऊर्वोः वैश्यः , अनन्तरं पद्भ्यां शूद्रः, मुखादग्निः, इन्द्रश्च, मनसः चन्द्रः, नेत्रात् सूर्यः, सञ्जते, तस्मै ते ब्रह्मणे नमः। इयत्तया गुणानां ते निवर्तन्ते न मानवाः बुद्धीनां किन्तु दौर्बल्यात्। तथैव वेदाश्चापि। एवं तं बहुधा मनोहरैः श्राव्यैः स्तोत्रैः स्तुत्वा, पद्मपत्राणि आदाय, वेङ्कटेशितुः श्रीपादं अव्यग्रं नामभिः सूतभाषितैः अर्चयामासुः। ततः प्रीतो जगद्धाता वेङ्कटेश्वरः बभाषे।

तत्रैवं नैमिशारण्ये प्रीतोऽस्मि भवतामहम्। वेङ्कटाचलमाहात्म्यश्रवणात्, चिरकालतपोलभ्यमपि फलं मया दत्तम्। भवतां मुनीनां यद्यदिष्टं तत् दत्तमेव। वेङ्कटाद्रेः माहात्म्यं बहुदूरस्थितोऽपि यः श्रुणोति, श्रावयति, पठेद्वा श्रद्धयान्वितः, विशेषेण कन्यामासे तस्याहं सुलभः। धनं, धान्यं, महीम्, इष्टान् पुत्रान्, पौत्रान् ददाम्यहम। सर्वान् कामान् च ददामि। देहान्ते मत्पदं दास्यामि। तथा वरान् लब्ध्वा, ते तु तत्र वत्सरपञ्चकं सर्वेषु तीर्थेषु स्नात्वा, वेङ्कटाद्रौ तपोधनाः, माधवं संपूज्य, पुनः सर्वे तपोधनाः नैमिशारण्यं ययुः।

**सूतं प्रति शौनकादिस्तुतिः १-११**

मुनिसङ्गनिषेवितं नैमिशारण्यं गत्वा, सूतमुपसृत्य इदं वचः प्रोचुः। अहो । तव विज्ञानम्। अहो ते सामर्थ्यमेव। वेङ्कटाद्रिवासिनः विष्णोः भवता यथोक्तं रूपमौदार्यरूपञ्च, तथैव गिरिरूपं तत्सर्वं तथैव स्थितम्। अहो ! वेङ्कटभूधरः। त्वत्प्रसादात् वयं सर्वे कृतार्थाः स्मः। वेङ्कटेशस्य संस्थानं, तस्य गिरेः सर्वतः किं त्वया दृष्टमेतत ? अथवा श्रुतं वा तत् ? इति स्तुतः सूतः ततः प्रोवाच इदं वचः।

व्यासस्यानुग्रहात् तत्त्वं सर्वं वेद्मि। वेङ्कटाचलमाहात्म्यं कल्पकोटिशतैरपि वर्षसाहस्रैः सहस्रकैः शेषाणाञ्च न शक्यं वक्तुम्। तथापि कीर्तितं माहात्म्यं किञ्चिदेव खलु। पुण्यं पवित्रमायुष्यं माहात्म्यमिदमुत्तमं यः पठेत् प्रयतो भक्त्या, शृणुयाद्वा, लिखेदपि सर्वान् कामान् अवाप्नोति । मङ्गलं सम्प्राप्नोति।

**सरांशः १- १२**

प्रियपाठकाः अस्मिन् खण्डे श्रीवेङ्कटेशस्य कलिदोषोपहतेषु विशेषतः कृपाधिक्यवर्णनं चेतनस्य आचार्याश्रयणात् पुरुषार्थप्राप्तिनिरूणं, अष्टाङ्गयोगस्वरूपनिरूपणं, सनकसनन्दनतीर्थमाहात्म्यं, कायरसायनतीर्थमाहात्म्यं, श्रीवेङ्कटेशाष्टोत्तरशतनामावलिः, महर्षीणां

श्रीवेङ्कटेशसेवार्थं श्रीवेङ्कटाचलागमनं, महर्षिभिः कृता भगवत्स्तुतिः, सूतं प्रति शौनकादिस्तुतिः इत्यादयः विवृताः।

**आदर्शप्रश्नाः - १-१४**

**निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः)**

१.श्रीवेङ्कटेशस्य कलिदोषोपहतेषु विशेषतः कृपाधिक्यं वर्णयत।

२. चेतनस्याचार्याश्रयणात् पुरुषार्थप्राप्ति निरूपणं कुरुत।

३. अष्टाङ्गयोगस्वरूनिरूपणं कुरुत।

४. श्रीवेङ्कटेशाष्टोत्तरशतनामावलिं लिखत।

**विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२/१० अङ्काः)**

१. श्रीवेङ्कटेशाष्टोत्तरशतनामावलिप्रयोजनं स्पष्टयत।

२.श्रीवेङ्कटेशाष्टोत्तरशतनामावल्यां प्रथम पञ्चाशत् नामानि विवृणुत।

३.श्रीवेङ्कटेशाष्टोत्तरशतनामावल्यां द्वितीय पञ्चाशत् नामानि विवृणुत।

४. श्रीवेङ्कटेशाष्टोत्तरशतनामावलिस्तोत्रे पूर्व पञ्चाशत् नाम्नामवधि लिखत।

५. श्रीवेङ्कटेशाष्टोत्तरशतनामावलिस्तोत्रे उत्तराष्ट पञ्चशत् नाम्नामवधि लिखत।

६. महर्षीणां श्रीवेङ्कटाचलागमनं वर्णयत।

**लघुप्रश्नाः (प्रत्येकं ५ अङ्काः)**

१. वेङ्कटाद्रिमागतानां ऋषीणां नामानि स्पष्टयत।

२.अष्टाङ्गानि कानि ? स्पष्टयत।

३. महर्षिभिः कृतां भगवत्स्तुतिं लिखत।

४. स्तूतं प्रति शौनकादिस्तुतिं लिखत।

५. महर्षीनुद्दश्य भगवद्वचनानि स्पष्टयत।

६. कायरसायनतीर्थस्य माहात्म्यं लिखत।

७.सनकसनन्दनतीर्थस्य माहात्म्यं वर्णयत।

८. भगवता उक्तं योगाचरणं स्पष्टयत।

एङ्काङ्कप्रश्नाः (प्रत्येकं १ अङ्कः)

१. वेदितव्ये द्वे ब्रह्मणी के ?

२. सर्वभूतं किं स्यात् ?

३. अक्षरः कः स्मृतः ?

४. क्षराक्षरविभेदवान् कः ?

५. वेदविदां श्रेष्ठः किमारभते ?

६. समाधेः सिद्धहेतवः केः?

७. अष्टाङ्गसहिता समाधिः किमुच्यते ?

८. प्राणायामः कतिधा प्रोक्तः ?

९. विषयेभ्यः चित्तोपसंहतिः कः?

१०. तैलधारवदच्छिन्नज्ञानसन्तानलक्षणं किम् ?

११. विचक्षणः प्रतिदिनं सायङ्काले किं कुर्यत् ?

१२. बुधः देहदृढं कृत्वा सर्वदा किं कुर्वीत ?

१३. स्वामिद्रोही इति कः उच्यते ?

१४. धर्मसङ्ग्रह सरः कः ?

१५. कस्य पुंसः देहस्य धरणं नास्ति ?

१६. यज्ञादीनां त्यक्तसङ्गः किं कुर्यात् ?

१७. भगवत्प्रीतिकारकः परो धर्मः कः ?

१८. अभीष्टकामधुक् परगतिः कः ?

एकाङ्कप्रश्नानामुत्तराणि १-१५

१. परम् अपरम् २. क्षरः ३. कूटस्थः ४.जीवः ५. योगम् ६. यमादिध्यानपर्यन्ताः ७.योगः ८. त्रिधा ९.प्रत्याहारः १०. ध्यानम् ११. योगम् १२. वेङ्कटेशस्य कैङ्कर्यमेव १३. कैङ्कर्यहीनः १४.निषिद्धं नानुतिष्ठेत् १५. कर्माणि त्यजतः १६. अशेषतः कर्माणि १७. यज्ञः १८. यज्ञः

---

# UNIT - 6

## श्रीवराहपुराणान्तर्गतं श्रीवेङ्कटाचलमाहात्म्यम् द्वितीयभागः (प्रथमद्वितीयौ अध्यायौ )

### प्रस्तावना १-१

श्रीवराहपुराणान्तर्गते श्रीवेङ्कटाचलमाहात्म्ये द्वितीयभागे प्रथमद्वितीयौ अध्यायौ स्वीकृतौ। तयोः द्वयोः अध्याययोः प्रस्ताविताः विषयाः षष्ठखण्डे उच्यन्ते। तत्र प्रथणे अध्याये नारदस्य सुमेरुशिखरस्थयज्ञवराहदर्शनं, वराहसन्निधिं प्रति धरण्याः आगमनं, धरणीवराहयोः संवादः, शेषाचलस्य सर्वपर्वतातिशायित्ववर्णनं, स्वामिपुष्करिण्याः सर्वतीर्थातिशायित्ववर्णनम्, कुमारधारामाहात्म्यं, तुम्बतीर्थमाहात्म्यम्, आकाशगङ्गामाहात्म्यं, पाण्डवतीर्थमाहात्म्यं, पापनाशनतीर्थमाहात्म्यं, देवतीर्थमाहात्म्यं, धरणीकृतावराहस्तुतिः, वराहस्य भगवतो धरण्या साकं शेषाचलागमनम्, अध्यायफलश्रुतिश्चोक्ताः।

द्वितीये अध्याये श्रीवराहमन्त्राराधनविधिः श्रीवराहमन्त्रेण धर्मादीनां स्वाभीष्टसिद्धिवर्णनं च उक्तानि।

### उद्देश्यम् १-२

प्रियपाठकाः अस्मिन् खण्डे भवन्तः अधो लिखितान् बिन्दून् आलोचयिष्यन्ति।

- नारदस्य सुमेरुशिखरस्थयज्ञवराहदर्शनम्
- वराहसन्निधिं प्रति धरण्याः आगमनम्
- धरणीवराहयोः संवादः
- शेषाचलस्य सर्वपर्वतातिशायित्ववर्णनम्
- स्वामिपुष्करिण्याः सर्वतीर्थतिशायित्ववर्णनम्
- कुमारधारामाहात्म्यम्
- तुम्बतीर्थमाहात्म्यम्
- आकाशगङ्गामाहात्म्यम्
- पाण्डवतीर्थमाहात्म्यम्
- पापनाशनतीर्थमाहात्म्यम्
- धरणीकृतवराहस्तुतिः
- वराहस्य भगवतो धरण्या साकं शेषाचलागमनम्

- अध्यायफलश्रुतिः
- श्रीवराहमन्त्राराधनविधिः
- श्रीवराहमन्त्रेण धर्मादीनां स्वाभीष्टसिद्धिवर्णनम्

श्रियः कान्ताय कल्याणनिधये निधयेऽर्थिनाम्।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गलम्।।

श्रीवेङ्कटाचलाधीशं श्रियाध्यासितवक्षसम्।
श्रितयेतनमन्दारं श्रीनिवासमहं भजे।।

**नारदस्य सुमेरुशिखरस्थयज्ञवराहदर्शनम् १-३**

**ऋषयः ऊचुः।**

हे रौमहर्षणः ! सर्वज्ञ ! पुराणार्थविशारद ! महीतले गिरीन्द्राणां माहात्म्यं श्रोतुमिच्छामः। हे महाभाग ! प्रधानाः महीधराः के ? तेषां माहात्म्यं श्रोतुमिच्छामः। अस्माकं ब्रूहि इति।

**श्रीसूत उवाच।**

पुरा एतमेव प्रश्नं जाह्नवी तटे मुनिवरश्रेष्ठं व्यासमपृच्छम्। गुरूत्तमः सोऽब्रवीत्।

पुरा देवयुगे मुनिसत्तमः नारदः नानारत्नसुशोभितं सुमेरुशिखरं गत्वा, तन्मध्ये विपुलं दीप्तं ब्रह्मणः दिव्यमालयं दृष्ट्वा, तस्योत्तरे देशे उत्तमं पिप्पलद्रुमं सहस्त्रयोजनोच्छ्रायं विस्तीर्णं तथा द्विगुणं तन्मूले नानारत्नसमन्वितं दिव्यं मण्टपं, पद्मरागमणिस्तम्भैः सहस्त्रैः समलङ्कृतं, वैडूर्यमुक्तामणिभिः कृतस्वस्तिमालिकं, नवरत्न समाकीर्णं दिव्यतोरणशोभितं मृगपक्षिभिराकीर्णं, नवरत्नमयैः शुभैः पुष्परागमहाद्वारं सप्तभूमिकगोपुरं, सन्दीप्तवज्रसुकृतकवाटद्वयशोभितम्, आदौ प्रविश्य अन्तः दिव्यमौक्तिकमष्टपं ददर्श। वैडूर्य वेदिकं तुङ्ग महामुनिः आरुरोह। तन्मध्ये तुङ्गमतुलं वसुपादविराजितं मुक्तासङ्कीर्णं महद्युति सिंहासनं ददर्श ! तन्मध्ये सहस्त्रदलशोभितं दिव्यं पुष्करं श्वेतं चन्द्रसहस्राभं कर्णिकाकेसरोज्ज्वलं ददर्श। तस्य मध्ये समासीनं पूर्णचन्द्रायुतप्रभं, कैलासपर्वताकारं सुन्दरं पुरुषाकृतिं शुभं वराहवदनं चतुर्बाहुमुदाराङ्ग, शङ्खचक्राभयवरान् बिभ्राणं पुरुषोत्तमं, पीताम्बरधरं देवं पुण्डरीकायतेक्षणं पूर्णेन्दुसौम्यवदनं वपागन्धिमुखाम्बुजं, सामध्वनिं यज्ञमूर्तिं घ्रक्तुण्डं स्त्रुवनासिकं क्षीरसागरसङ्काशं किरीटोज्ज्वलिताननं, श्रीवत्सवक्षसं शुभ्रं यज्ञसूत्रविराजितं कौस्तुभश्रीसमुद्द्योतं समुन्नतमहोरसं, वामपादतलाक्रान्तपादपीठविराजितं, कटकाङ्गदकेयूरकुण्डलोज्ज्वलितं सदा

चतुर्मुखवसिष्ठात्रिमार्कण्डेयैः मुनीश्वरैः भृग्वादिभिः अनेकैश्च अहर्निशं सोव्यमानम्, इन्द्रादिलोकपालैः गन्धर्वाप्सरसां गणैश्च सेवितं देवदेवेशं प्रणिपत्याभिगम्य च, दिव्यैः उपनिषद्भागैः धराधरमभिष्ठूय, नारदः परमप्रीतः देवस्य सन्निधौ स्थितः।

**वराहसन्निधिं प्रति धरण्यागमनम् १-४**

एतस्मिन्नन्तरे दिव्यदुन्दुभिस्स्वनश्चाभूत्। ततः सखिसंयुता धरणीदेवी समागता। सा सरत्नसागराकारदिव्याम्बरसमुज्ज्वला, सुमेरुमन्दराकारस्तनभासवनामिता, नवदूर्वादलश्यामा, सर्वाभरणभूषिता, इडया पिङ्गलया सखीभ्याञ्च समन्विता। ततः ताभ्यां समानीतं पुष्पाणां निचयं मही श्रीमद्वराहदेवस्य पादमूले विकीर्य देवदेवेशं प्रणम्य, कृताञ्जलिपुढा स्थिता। श्रीवराहोपितां देवीमालिङ्ग्य, अङ्के निधाय, प्रीतिप्रवणमानसः पृथ्वीं कुशलं पप्रच्छ।

**धरणीवराहयोः संवादः १-५**

**श्रीवराह उवाच !**

हे ! भूदेवि। सुखावहे शेषशीर्षे त्वां निवेश्य, त्वत्सहायान् धराधरान् लोकं त्वयि निवेश्यैव इहागतोस्मि। हे देवि ! किमर्थं त्वमिहागताः ? इति।

पृथिवी उवाच ।

हे महाबाहो ! पातालात् मां समुद्धृत्य, सहस्रफणिशोभिते रत्नपीठ इवोत्तुङ्गे सरत्ने अनन्तमूर्धनि मां सुस्थिरां कृत्वा मद्धारणक्षमान् पुण्यान् त्वन्मयान् धरांश्चापि न्यवेशयः। हे पुरुषोत्तम ! मदाधारान् तेषु मुख्यान् वदस्व मे इति !

**शेषाचलस्य सर्वपर्वतातिशायित्ववर्णनम् १-६**

श्री वराह उवाच !

सुमेरुः, हिमवान्, विन्ध्यो, मन्दरो, गन्धमादनः, सालग्रामः, चित्रकूटः, माल्यवान्, पारियात्रकः महेन्द्रः, मलयः, सह्यः, सिंहाद्रिः रैवतः, मेरुपुत्रो अञ्जनो नाम शैलः महान् स्वर्णमयः। एते शैलवराः सर्वे त्वदाधारा नाम वसुन्धराधाराः। भगवता देवसङ्घैः ऋषिसङ्घैश्च सेविताः। एतेषु प्रवराः तत्त्वतः सालग्रामः, सिंहाद्रिः, शैलेन्द्रः गन्धमादनः। एते शैलवराः हैमवतीं श्रिताः। दक्षिणस्यां प्रतीताः शैलाः अरुणाद्रिः, हस्तिशैलः, गृध्राद्रिः, घटिकाचलः एते शैलवराः सर्वे क्षीरनद्याः समीपगाः। हस्तिशैलादुत्तरतः पञ्चयोजनमात्रतः सुवर्णमुखरी नाम नदीनां प्रवरा नदी। तस्याः एव उत्तरे तीरे कामलाख्यः सरोवरः। तत्तीरे भगवान् आस्ते शुकस्य वरदो हरिः।

बलभद्रेण संयुक्तः कृष्णो भक्तार्तिनाशनः मुनिगणैः नित्यमाराध्यते। कमलाख्यस्य सरसः उत्तरे तीरे काननोत्तमे क्रोशद्वयार्थमात्रे हरिचन्दनशोभिते श्रीवेङ्कटाचलो नाम वासुदेवालयो महान् शैलेन्द्रो सप्तयोजनविस्तीर्णः योजनोच्छ्रितः स्वर्णमयः रत्नसानु भृदायतः अस्ति ! तत्र इन्द्राद्याः दैवतगणाः वसिष्ठाद्याः मुनीश्वराः, सिद्धाः साध्याश्च मरुतः, दानवाः, दैत्यराक्षसाः, रम्भाद्याः अप्सरसारस्स नियतं धरे वसन्ति। नागाः गरुडाः किन्नराः तपश्चरन्ति। एतैः अधिष्ठिताः सरितः पुण्यदर्शनाः तत्र, विविधानि सरांसि दिव्यानि सन्ति। तीर्थानां सर्वेषां प्रवराणि चक्रतीर्थं, दैवतीर्थं, वियद्गङ्गा, कुमारधारिकातीर्थं, पापनाशनं पाण्डवतीर्थं, तथा स्वामिपुष्करिणी च सप्तैतानि वराणि शुभे नारायणगिरौ।

**स्वामिपुष्करिण्याः सर्वतीर्थातिशायित्ववर्णनम् १-७**

तीर्थाद्रौ वराणि सप्ततीर्थानि। एतेषु प्रवरा शुभा स्वामिपुष्करिणी। अस्याः पश्चिमे तीरे श्रीवराहः निवसति अस्याः दक्षिणे तीरे जगत्पतिः श्रीनिवासः आस्ते। गङ्गाद्यैः सकलैः तीर्थैः समा सा। सागराम्बरे त्रैलोक्ये यानि तीर्थानि सरांसि सरितः तेषां स्वामित्वमापन्नं स्वामिसरोवरम्। पुण्यां स्वामिपुष्करिणीं सेवितुं दिव्यभूधरे सर्वतीर्थानि सन्ति। तेषां सङ्ख्या षट्षष्ठिकोटितीर्थानि पुण्येस्मिन् भूधरोत्तमे। तेषु चात्यन्तमुख्यानि षट्तीर्थानि। पञ्चानां तीर्थराजानां तुम्बो गर्भसमो महान् भूधरोत्तमे। तत्र स्नातानां गर्भवासभयध्वंसी इति।

**धरणी उवाच।**

हे मबाबाहो ! महीधरे षट्तीर्थानि त्वया उक्तानि। यथाकालं यथाविधि तेषां माहात्म्यं वद। तेषु स्नातानां नराणां फलानि वद। इति

**श्रीवराह उवाच।**

हे माधवि। नारायणाद्रिमाहात्म्यं वदामि। श्रुणु। देवाः ऋषयः योगिनः सनकादयः कृतयुगे अञ्जनाद्रिं, त्रेतायां नारायणगिरिं तथा द्वापरे सिंहशैलञ्ज कलौ श्रीवेङ्कटाचलं परमात्मालयं गिरिं विद्वासः प्रवदन्ति। योजनानां सहस्रान्ते, द्वीपान्तरगतोऽपि वा तं भूधरमुद्दिश्य भक्तिः यो नमेत् सः सर्वपापविनिर्मुक्तः विष्णुलोकं गच्छति। तस्मिन् षट्तीर्थमाहात्म्यं श्रुणु ! सर्वपापप्रणाशनं तत् । इति।

**कुमारधारामाहात्म्यम् १-८**

कुम्भसंस्थे रवौ माघे पौर्णमास्यां महातिथौ मघानक्षत्रयुक्तायां कुमारधारिका नाम सरसीलोकपावनी यत्रास्ते, पार्वतीसूनुः कार्तिकेयः अग्निसम्भवः देवसेनासमायुक्तः श्रीनिवासार्चकः

आसीत्। द्वादशाब्दं नियमात् गङ्गादिसर्वतीर्थेषु यः स्नाति तस्य पुण्यफलं कुमारधारातीर्थे यः स्नाति सः समवाप्नुयात्। कुमारधारातीर्थतीरे शक्त्यनुसारेण दक्षिणया सह यः अन्नं ददाति सः तावत् स्नानेतूक्तं फलमाप्नोति। वराह, पद्म, वामन, मार्कण्डेयपुराणेषु कुमारधारातीर्थं वर्णितम्। वराहपुराणे एवं कथा श्रूयते

कदाचित् श्रीनिवासः वेङ्कटाद्रौ सञ्चरति । तदानीमेकः वृद्धः भगवता दृष्टः। तस्य समीपं गत्वा श्रीनिवासः किमर्थं संचरसि भवान् ? अस्यां वृद्धावस्थायां किमावश्यकमित्यपृच्छत्। तदानीं वृद्धः ज्योतिष्टोमादि यज्ञानामाचरणेन देवऋणात् मुक्तिं वांछाम्यहम्। अतः तदर्थं जीवितुमिच्छामीत्युक्तवान्। तत् श्रुत्वा श्रीनिवासः तंस्य हस्तं स्वीकृत्य एकस्मिन् तीर्थे स्नानाचरणं कारितवान्। आश्चर्येण वृद्धः नवयौवनयुवानभवत्। तेन तीर्थस्नानेन वृद्धः कुमारः अभवत् इति कारणात् कुमारधारातीर्थमिति प्रसिद्धम्।

## आकाशगङ्गामाहात्म्यम् १-९

अग्निवाहनस्थिते भानौ चित्रा नक्षत्रसंयुते पूर्णिमाख्ये तिथौ पुण्ये प्रातः काले आकाशगङ्गासरिति स्नातः मोक्षमवाप्नुयात्। आकाशगङ्गातीर्थस्य माहात्म्यं वराह-पद्म-स्कान्दपुराणेषु वेङ्कटाचलमाहात्म्ये उपवर्ण्यते।

आकाशगङ्गातीर्थे ये स्नानं कुर्वन्ति ते संसारसागरं मतिसुलभतयावगाहन्ते। प्रतिदिनेऽपि देवस्त्रियः, नागकन्याः गन्धर्वकन्याः, किन्नराङ्गनाः, वैखानसाङ्गनाश्च स्नानमचरन्ति आकाशगङ्गातीर्थे। सन्तनविहीनस्य भोक्त्रुस्थानस्य दत्तत्वात् एकस्य विप्रस्य प्राप्तं गार्दभमुखं अगस्त्यमहर्षेः वचनानुसारेंण आकाशगङ्गास्नानेन गतमिति माहात्म्यं ज्ञायते।

## पाण्डवतीर्थमाहात्म्यम् १-१०

वृषभस्थे रवौ द्वादश्यां रविवासरे शुक्ले वाप्यथवा कृष्णे पक्षे भौमसमन्विते पाण्डवतीर्थे यो नरः स्नाति नेह दुःखमवाप्नोति परत्र सुखमश्नुते। वराहपुराणे, पद्मपुराणे पाण्डवतीर्थेमाहात्म्यमुक्तम्। पाण्डवाः अस्मिन् तीर्थे स्नानं कृत्वा पुनः राज्यं प्राप्तवन्तः। ततः पाण्डवतीर्थमिति प्रसिद्धम् ! अस्य तीर्थस्य गोगर्भतीर्थमिति नामान्तरं विद्यते।

## पापनाशनतीर्थमाहात्म्यम् १-११

शुक्लपक्षे अथवा कृष्णपक्षे अर्कवारेण सप्तमीयुक्ता हस्तनक्षत्रयुक्ते दिने अथवा पुण्यनक्षत्रे शुभतिथौ पापनाशनसंज्ञके तीर्थे भूधरेन्द्रस्य मस्तके नियमात् यः स्नाति सः नरोत्तमः कोटिजन्मार्जितैः पापैः मुच्यते। वेङ्कटाद्रौ अत्यन्तपापनाशकमिदं तीर्थम्। वराहस्कान्दपुराणयोः पापनाशनतीर्थस्य

माहात्म्यमुक्तम्।

शुक्ले पक्षेऽथवा कृष्णे याऽर्कवारेण सप्तमी।
युक्ता पुण्यर्क्षसंयुक्ता हस्तर्क्षेण युतापि वा।।
तस्यां तिथौ माहाभागे पापनाशनसंज्ञके।
तीर्थे यः स्नाति नियमात् भूधरेन्द्रस्य मस्तके।।
कोटिजन्मार्जितैः पापैः मुच्यते स नरोत्तमः।।
(व.पु.ii - १-१-७१)

**देवतीर्थमाहात्म्यम् १-१२**

वेङ्कटाद्रौ भगवदालयस्य वायव्ये अतिशोभनं तटाकं देवतीर्थमिति ख्यातम्। तस्मिन् स्नानकालं पुण्यतमं किमित्युक्ते ? गुरुपुष्ये व्यतीपाते सोमश्रवणके अत्यन्तशुभदायकम्। एतेषु दिनेषु यः स्नाति तस्य पुण्यफलं किमित्युक्ते ? यानि कानीह पापानि ज्ञानाज्ञानकृतानि च तानि सर्वाणि अतिपावने देवतीर्थे नश्यन्ति। देवतीर्थनिमज्जनात् पुण्यान्यपि च वर्धन्ते। पुत्रपौत्रसमन्वितः दीर्घमायुरवाप्नोति। अन्ते स्वर्गं समाराद्य चन्द्रलोके महीयते। तद्दिनेषु अन्नदः यावज्जीवान्नदो भवेत् इदन्तु अतिगुह्यतमम्। भूदेवीं प्रति वराहस्वामिना देवतीर्थस्य माहात्म्यं वराहपुराणे उक्तम्।

**धरणीकृतवराहस्तुतिः १-१३**

देवतीर्थस्य माहात्म्यं श्रुत्वा धरणीदेवी प्रीतिप्रवणमानसा इष्टाभिः वाग्भिः अतुलं तुष्टाव।

हे देवदेवेश ! वराहवदनाच्युत ! क्षीरसागरसङ्काश वज्रशृङ्ग ! महाभुज ! कल्पादौ सागराम्भसः उद्धृतास्मि त्वया सहस्रबाहुना। हे विष्णो ! धारयामि जगन्त्यहम्। हे उद्यद्भानुप्रतीकाशपादपद्म ! नंमो नमः। बालचन्द्राभदंष्ट्राग्र ! महाबलपराक्रम ! वज्रदंष्ट्राग्रनिर्भिन्नहिरण्याक्ष ! महाबल ! पुण्डरीकाभिताम्राक्ष ! नमो नमः। आनन्दविग्रहानन्त ! काल काल ! नमो नमः। इति स्तुत्वा भूदेवी ! विभुपादयोः ववन्दे

**वराहस्य भगवतो धरण्या साकं शेषाचलागमनम् १-१४**

वन्दमानं धरणीं दृष्ट्वा प्रीत्युत्फुल्लविलोचनः धरणीं देवीं बाहुभिः उद्धृत्य, आलिलिङ्गे। धरणीवक्त्रं प्रेम्णा आघ्राय, वामाङ्गे सन्निवेश्य, गरुडेशानमारुह्य वृषभाचलं जगाम। मुनीन्द्रैः नारदाद्यैश्च स्तूयमानः महीपतिः स्वामिपुष्करिणीतीरे पश्चिमे लोकपूजिते तदाढ्यैः मुनीन्द्रैः वैखानसैः ब्रह्मतुल्यैः महाभागैः महात्मभिः पूजितः। तद्दृष्ट्वा नारदः पूरा मुनीनामुक्तवान्। तत्र मुनिसंसदि तदेतदहमश्रौषम्। धरणीभृतां माहात्म्यं पुरा नारदात् श्रुतम्। इदं धर्मसंवादं पावनं

देवपुरतः ब्राह्मणानां पुरतः यः पठेत् सर्वेषामपि वर्णानां भक्तिपूर्वकं शृण्वतां सः पुत्रपौत्रसमन्वितः प्रतिष्ठामवाप्नोति। शृण्वतां सर्वेषामपि यदिष्टं तद्भविष्यति। भुवि पर्वतेषु पुण्येषु पुण्यस्य महीधरस्य श्रीवेङ्कटाचलस्य माहात्म्यं नाम्नः पापाहं मोक्षफलप्रदायकम्।

**श्रीवरहामन्त्राराधनविधिः १-१५**

वैवस्वते मन्वन्तरे पुण्यतमे कृतयुगे नारायणाद्रौ निवसन्तं क्षमापतिं देवेशं वराहरूपिणं देवं धरणी सखिभिः वृता रक्तपद्मायतेक्षणं प्रणम्य परिपप्रच्छ।

**धरणी उवाच**

हे देवेश ! भवान् केन मन्त्रेणाराध्यः प्रीतो भविष्यति सदा भवतः प्रियः यः तं मे वद त्वम्। सदा जपतां सर्वसम्पत्तिकारकं पुत्रपौत्रदं कामिनां कामदं सार्वभौमत्वदश्चैव। यः अन्ते त्वत्पदप्राप्तिं नियतात्मनां ददाति। एवं भूतं मयि प्रीत्या वद इति।

इति पृष्टः तया भूम्या, प्रीतिस्मिताननः मानदः वाराह प्राह।

सद्यः सम्पत्तिकारकं परं गुह्यं भूमिदं पुत्रदं कदाचन अप्रकाश्यं गोप्यम्। किञ्च नियतात्मने शुश्रूषवे भक्ताय वाच्यम्। ' ओं नमः श्रीवराहाय धरण्युद्धरणाय च। वह्निजाया समायुक्तः ' सदा जाप्यो मुमुक्षुभिः। अयं मन्त्रः सर्वसिद्धिप्रदायकः। अस्य मन्त्रस्य ऋषिः सङ्कर्षणः। देवता वराहस्वामी

एव। छन्द्रः पङ्क्तिः। श्रीबीजं समुदाहृतम्। सद्गुरोः लब्धतन्मनुः मन्त्रं चतुर्लक्षं जपेत्। क्षौद्रसर्पिः समन्वितं पायसान्नं जुहुयात्। शुद्धस्फटिकशैलाभं रक्तपद्मदलेक्षणं वराहवदनं सौम्यं चतुर्बाहुं किरीटिनं श्रीवत्सवक्षसं चक्रशङ्का भयकराम्बुजं, वामोरुस्थितया भूदेव्या युक्तं रक्तपीताम्बरधरं रक्ताभरणभूषितं श्रीकूर्मपृष्ठमध्यस्थशेषमूर्त्यब्जसंस्थितं मनः शुद्धिप्रदायकं ध्यानं करणीयम्। एवं ध्यात्वा अष्टोत्तरं शतं मन्त्रं सदा जपेत्। तथा कृत्वा सर्वान् कामानवाप्नोति। अन्ते मोक्षञ्च व्रजेत्। धृवमिदम्। इति।

श्रीवराहमन्त्रेण धर्मादीनां स्वाभीष्टसिद्धिवर्णनम्

श्रीवरहामन्त्रं श्रुत्वा भूदेवी वराहस्वामिनं पृच्छति हे देव ! पुरा केनैवानुष्ठितमेतन्मन्त्रम् ? प्राप्तञ्च फलं किम् ? इति पृष्ठः देवः श्रीवराहः पुनः अब्रवीदिदम्। पुरा कृतयुगे धर्मो नाम मनुः महान् ब्रह्मणोऽयं मन्त्रं लब्ध्वा मामकं पदं प्राप्तोऽभूत्। इन्द्रः दुर्वाससः शापात् भ्रष्टः अनेनेष्ट्वा पुनः प्राप्तः त्रिविष्टपम्। अन्येऽपि मुनयः जप्त्वा परां गतिं प्राप्ताः। पन्नगाधीशः अनन्तः कश्यपात् श्रीवराहमन्त्रं लब्ध्वा श्वेतद्वीपे जपित्वैव धरणीधरः बभूव। तस्मात् धरार्थिभिः मनुष्यैः सदा श्रीवराहमन्त्रः जप्यः। इति।

एतत् श्रुत्वा सुप्रीता धरणी पुनः प्राह धराधरम्। वेङ्कटाख्ये महाशैले जगत्पतिः श्रीनिवासः अमलः श्रीभूमिसहितः कदा आयाति ? हे जनार्धन ! कल्पान्तरस्थायी कथं भविष्यति ? एतत् ब्रूहि वराहात्मन् महत्कौतूहलं ममेति।

**सारांशः १-१७**

प्रियपाठकाः ! अस्मिन् खण्डे नारदस्य सुमेरुशिखरस्थयज्ञवराहदर्शनं, वराहसन्निधिं प्रति धरण्याः आगमनं, धरणीवराहयोः संवादः शेषाचलस्य सर्वपर्वतातिशायित्ववर्णनं, कुमारधारामाहात्म्यं, तुम्बतीर्थमाहात्म्यं, आकाशगङ्गामाहात्म्यं, पाण्डवतीर्थमाहात्म्यं, पापनाशनतीर्थमाहात्म्यं, देवतीर्थमहात्म्यं, धरणीकृतवराहस्तुतिः, वराहस्य भगवतो धरण्या साकं शेषाचलागमनम्, अध्यायफलश्रुतिः, श्रीवराहमन्त्राराधनविधिः, श्रीवराहमन्त्रेण धर्मादीनां स्वाभीष्टसिद्धिवर्णनमित्यादीनि उक्तानि।

आदर्शप्रश्नाः १-१९

निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः)

१.नारदस्य सुमेरुशिखरस्थयज्ञवराहदर्शनं विशदयत।

२. वराहसन्निधं प्रति धरण्याः आगमनं संवादं च लिखत।

३. शेषाचलस्य सर्वपर्वतातिशायित्वं वर्णयत।

४.स्वामिपुष्करिण्याः सर्वतीर्थातिशायित्वं वर्णयत।

**विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२/१० अङ्काः)**

१.कुमारधारातीर्थस्य माहात्म्यं वर्णयत।

२.वेङ्कटाद्रौ मुख्यानां षट्तीर्थानां परिचयं कुरुत।

३. देवतीर्थस्य माहात्म्यं स्पष्टयत।

४. धरणीकृतवराहस्तुतिं स्पष्टयत।

**लघुप्रश्नाः (प्रत्येकं ५ अङ्काः)**

१.भगवतो वराहस्य धरण्या साकं शेषाचलागमनं स्पष्टयत।

२. वराहपुराणे द्वितीयभागे प्रथमाध्यायस्य फलश्रुतिं विवृणुत।

३. श्रीवरहमन्त्राराधनविधं लिखत।

४. श्रीवराहमन्त्रेण धर्मादीनां स्वाभीष्टसिद्धिं वर्णयत।

५. पापनाशनतीर्थस्य माहात्म्यं वर्णयत।

६. धरणीवराहयोः संवादं लिखत।

एकाङ्कप्रश्नाः (प्रत्येकं १ अङ्काः) १-२०

१.श्रितचेतनमन्दारः कः ?

२. रौमहर्षणः नाम कः ?

३. पुराणार्थविशारदः कः ?

४. पीताम्बरधरः कः ?

५. इडया पिङ्गलया सरवीभ्याञ्च समन्विता का ?

६. सप्तयोजनविस्तीर्णः योजनोच्छ्रितः सैलेन्द्रः कः ?

७. वेङ्कटाद्रौ तीर्थेषु प्रवरा का ?

८. गङ्गाद्यैः सकलैस्तीर्थैः समा का ?

९. गर्भावासभयध्वंसी स्नातानां तीर्थं किम् ?

१०. वेङ्कटाद्रेः त्रेतायां नाम किम् ?

११. वेङ्कटाद्रौः द्वापरे नाम किम् ?

१२. देवसेनासमायुक्तः श्रीनिवासार्चकः कः ?

१३. आकाशगङ्गा सरिति स्नातः किमवाप्नुयात् ?

१४. कोटिजन्मार्जितैः पापैः मुच्यते नरः ? कस्य तीर्थस्य स्नानेन ?

१५.गुरुपुष्ये व्यतीपाते सोमश्रवणके कस्य तीर्थश्य स्नानकालः पुण्यदायकः ?

१६. ओं नमः श्रीवराहाय धरण्युद्धरणाय च। वह्निजाया समायुक्तः इति मन्त्रः कः ?

१७. त्रिविष्टपात् भ्रष्टः इन्द्रः केन मन्त्रेण त्रिविष्टपं पुनः प्राप्तः ?

१८. पन्नगाधीशः श्रीवराहमन्त्रं कस्मात् लब्धवान् ?

**एकाङ्कप्रश्नानामुत्तराणि १-२१**

१.श्रीनिवासः २. सूतः ३.सूतः४. श्रीमहाविष्णुः ५.भूदेवी ६.श्रीवेङ्कटाचलः ७. स्वामिपुष्करिणी ८. स्वामिपुष्करिणी ९.तुम्बतीर्थं १०. अञ्जनाद्रिः ११.सिंहाचलः १२. कार्तिकेयः १३. मोक्षम् १४.पापनाशनतीर्थस्नानेन १५.देवतीर्थस्य १६. श्रीवराहमन्त्रः १७. श्रीवराहमन्त्रेण १८. कश्यपात्

# UNIT -7

## श्रीवराहपुराणान्तर्गतं श्रीवेङ्कटाचलमाहात्म्यम् द्वितीयभागः (तृतीयचतुर्थौ अध्यायौ )

### प्रस्तावना १-१

श्रीवराहपुराणान्तर्गते श्रीवेङ्कटाचलमाहात्म्ये द्वितीयभागे तृतीयचतुर्थौ अध्यायौ स्वीकृतौ। तयोः द्वयोः अध्याययोः प्रस्ताविताः विषयाः सप्तमखण्डे उच्यन्ते। तत्र तृतीये अध्याये अगस्त्यप्रार्थनया भगवतः सर्वजनदृग्गोचरत्ववर्णनं, मित्रवर्मणः आकाशराजाख्यसुतोत्पत्तिवर्णनं, धरणीतलात् पद्मावत्युत्पत्ति क्रमः, आकाशराजस्य धरण्याख्यपत्न्यां वसुदासाख्यसुतोत्पत्तिश्चोक्ताः।

चतुर्थे अध्याये उद्यानवासिन्याः पद्मावत्याः समीपे नारदागमनं, नारदोदीरितपद्मावतीशरीरलक्षणानि, मृगयार्थं पुष्पाटवीं प्रति श्रीनिवासागमनं, भगवतः कन्याकानां चान्योन्य संवादश्चोक्ताः।

### उद्देश्यम् १-२

प्रियपाठकाः अस्मिन् खण्डे भवन्तः अधो लिखितान् बिन्दून् आलोचयिष्यन्ति।

* अगस्त्यप्रार्थनया भगवतः सर्वजनदृग्गोचरत्ववर्णनम्
* मित्रवर्मणः आकाशराजाख्यसुतोत्पत्तिवर्णनम्
* धरणीतलात् पद्मावत्युत्पत्तिक्रमः
* आकाशराजस्य धरण्याख्यपत्तन्यां वसुदासाख्यसुतोत्पत्तिः
* उद्यानवासिन्याः पद्मावत्याः समीपे नारदागमनम्ट
* नारदोदीरितपद्मावतीशरीरलक्षणानि
* पद्मावत्याः स्वसखीभिः साकं पुष्पाटवीगमनम्
* मृग्यार्थं पुष्पाटवीं प्रति श्रीनिवासागमनम्
* भगवतः कन्याकानां चान्योन्यसंवादः

### अगस्त्यप्रार्थनया भगवतः सर्वजनदृग्गोचरत्ववर्णनम् १-३

**श्रीवराह उवाच !**

हे वरानने ! पुरा वृत्तं कथयिष्यामि शृणु ! हे महादेवि ! पुण्यवृत्तान्तमिदं सभविष्यं सहोत्तरम्। वैवस्वते अन्तरे पूर्वे कृतयुगान्तरे वायोः महत् तपो दृष्ट्वा श्रीभूमिसहितः श्रीनिवासश्च स्वामिपुष्करिणी तटे आगच्छत्। दक्षिणेऽस्मिन् पुण्यतमे नन्दसंज्ञके विमाने वायोः प्रियकरो हरिः

श्रीकान्तः वसिष्यति। तदारभ्य हृषीकेशः सेनान्या विष्वकसेनेन आराधितः आकल्पान्तम् अनिशम् अदृश्येऽस्मिन् विमानेऽसौ वसिष्यति।

**धरणी उवाच।**

अदृश्यो भगवान् मर्त्यैः कथं दृश्यो भविष्यति ? देवेशो श्रीनिवासोऽपि भवद्दक्षिणपार्श्वगः जनैः कथमाराध्यते ? एथद्वदेति।

**श्रीवराह उवाच।**

पुरास्मिन् अगस्त्यो समासाद्य सनातनं देवं द्वादशाब्दमाराध्य, पुनः पुनः तं प्रीणयित्वा, भवान् दृश्यो भवतु इति तत्र सान्निध्यं ययाचे। एवमुक्तः श्रीभूमिसहितः हृषीकेशः त्वत्कृते सर्वदेहिनामहं दृश्यो भविष्यामि। हे देवर्षे ! एतद्विमानं कदापि नादृश्यं स्यात्। आकल्पान्तं दृश्योऽहमस्मिन् नात्र संशयः। इति तद्वचनं श्रुत्वागस्त्यमुनिः प्रीतः स्वमाश्रमं प्रायात्। ततः देवो चतुर्भुजः नरादिभिः सदृश्योऽभूत्। मुनिचिन्त्येऽस्मिन् विमाने असिता च तथोत्तरम्। सदा स्कन्देन आराध्यमानः वायुना सेवितः। एवं गते काले चतुर्युगसमन्विते चन्द्रवंशे मित्रवर्मा जातः।

**मित्रवर्मणः आकाशराजाख्यसुतोत्पत्तिवर्णनम् १-४**

अष्टाविंशे द्वापरान्ते सञ्जाते महाभारते युद्धे अतीते सति कलियुगे विक्रमार्कादयो भूपाः शकादिशूद्रादयः श्रीनिवासमज्ञात्वा, स्वर्गलोकं गमिष्यन्ति। ततः सोमकुलोद्भूतः महारथः मित्रवर्मा राजा तुण्डीर मण्डले नारायणपुरे वसन् महान् महाभाग्योदयो भविष्यति। तस्मिन् पृथिवीपतौ धर्मेण भूलोकं शासति। अकृष्टपच्या पृथिवी सर्वसस्यविभूषणा। सर्वे जनाः धर्मसमन्विताः निरीतिकाः अभवन्। तस्य मित्रवर्मणः पत्नी पाण्ड्यकन्या मनोरमा समभवत्। तस्य कुलोत्तंसो आकाशराज नाम सुतो जातः। तस्य पत्नी तु धरणी नाम्ना शकवंशजा आसीत्। नृपोत्तमः मित्रवर्मा आकाशराजं राज्ये सिंहासने विनिक्षिप्य, वेङ्कटाद्रेः समीपतः पुण्यं तपोवनं ययौ।

**धरणीतलात् पद्मावत्याः उत्पत्तिः १-५**

आकाश नामा महान् राजा सार्वभौमकः अभूत्। एकदारव्रतः राजा धरणीसक्तचेतनः आरणितीरतः यज्ञार्थं भुवं शोधयामास। कृष्यमाणे धरातले काञ्चनेन हलेनैव भुवं यज्ञार्थं शोधयामास। बीजमुष्टिं विकिरता धरोद्गता सर्वलक्षणलक्षिता पद्मशय्यागता रम्या कन्या दृष्टा। तप्तजाम्बुनदमयीव विराजती पुत्रिका। तां दृष्ट्वा सः महीपालः आकाशराजः विस्मयोत्फुल्ललोचनः आदाय ‘ तनया चेयं ममैव’ इति पुनः पुनः मन्त्रिभिः जहर्ष। तदा वागशरीरिणी प्राह- सत्यं तवैव

तनया सुलोचनां वर्धयस्व 'इति। ततः प्रीतमना राजा स्वपुरं प्रविवेश। देवीं धरणीमाहूय महीपतिः इदमाह- ' भूतलादुत्थितां मम देवदतामिमां पश्य। अपुत्राभ्यामावाभ्यां इयं पुत्री भविता धृवम्। इत्युक्त्वा देव्याः हस्ते प्रीत्या आकाशराजः प्रददौ।

**आकाशराजस्य धरण्याख्यपत्न्यां वसुदासाख्यसुतोत्पत्तिः १-६**

तस्याः बालिकायाः गृहं प्रविष्टायां धरणीदेवी गर्भमादधौ। सुप्रीतः आकाशराजः स्निग्धविलोचनां दृष्ट्वा 'फलिता सुभ्रु ! लता सान्तानिकी च में' इत्युवाच।

अथ सा धरणीदेवी कमललोचना अकाले सुप्रशस्ते मुहूर्ते स्वोच्छसंस्थेषु पञ्चसु ग्रहेषु दिवाकरे मेषस्थे पुत्रं सुषुवे। तदा देवदुन्दभयोः नेदुः। गृहे पुष्पवृष्टिः अपतत्। तज्जन्मदिवसे सुखस्पर्शः वायुः ववौ। पुत्रजन्मनि सुप्रीतः पुत्रप्रसूति प्रवक्तॄणां छत्रचामरवर्जितं सर्वस्वदानमकरोत्। कपिलाकोटिदानञ्च वृषभाणां शताधिकं सर्वस्वदानमकरोत्। द्वादशे पुण्ये दिवसे जातकर्मादिकाः क्रियाः वसुदास इति नामधेयञ्च स्वयं चकार। आकाशराजस्य तनयः वसुदासः मनोरमः शुक्लपक्षे चन्द्र इव दिनदिनाभिवृद्धि ववृधे।

ब्रह्मपारगैः गुरुभिः उपनीतः विनीतोऽसौ पितुः अस्त्राणि शस्त्राणि मन्त्रवत् सेऽप्यशिक्षत।

चतुष्पादं धनुर्वेदं साङ्गोपाङ्गमधीतवान् अतिबलिना तेन पुत्रेण पिता परैः दुराधर्षः अभूत्। आकाश इव निष्पङ्को ग्रीष्मे वैशाखमासमध्याह्न इव दुःसहः दुर्निरीक्षकः आसीत्।

**उद्यानवासिन्याः पद्मावत्याः समीपे नारदागमनम् १-७**

**धरणी उवाच !**

आकाशराजस्य पुत्रस्य नाम वसुदासः इति उक्तम्। अयोनिजायाः तत्पुत्र्याः नाम किम् ? इति पृष्टः जगत्पतिः श्रीवराहः पुनः प्राह-

मतिमान् आकाशराजा कमले शयां बालिकां दृष्ट्वा वसुधासुतां 'पद्मिनीति च नाम्ना चकार। यौवनसम्पन्नां सखीभिः परिवारिताम् आरामे विहरन्तीं तां शुककोकिलनादिते यदृच्छया मुनिसत्तमः नारदः तत्रागतः। वनलक्ष्मीमिवालोक्य विस्मयादिदमब्रवीत् - हे भीरु ! कासि ? कस्य सुता ? मे तव हस्तं दर्शय ! इत्युक्ता सा सुचार्वङ्गी स्वात्मानं मुनये अब्रवीत् आकाशराजसुता।

हे ब्रह्मन् ! मे लक्षणानि वदस्व ! इत्युक्तः सः मुनिसत्तमः नारदः तदा प्राह।

**नारद उवाच -**

चारुवदने ! श्रुणु ! तव लक्षणानि वदामि। तव पादौ रक्तपद्मदलान्वितौ प्रतिष्ठितौ। हे सुभ्रु ! पादाङ्गुल्यः समारक्ता रक्ततुङ्गनखान्विताः। जङ्घे चारोमशे शुभे। गुल्फौ गूढौ। जानुनी समसुस्निग्धे। क्रमादूरु समावूरू। नितम्बौ पृथुलौ पीनौ। जघनं चिन्त्यमेव। नाभिमण्डलवान् निम्नः। ते पार्श्वौ उभौ मे चकौ। त्रिवली ललितं मध्यं रोमराजिविराजितम्। स्तनौ पीनौ। घनौ स्निग्धौ उन्नतौ मग्नचूचुकौ। ते करौ रक्तपद्माभौ पद्मरेखासमन्वितौ। सुसूक्ष्मौ रक्तसत्पर्वनिरन्तरसमाङ्गुली शुकतुण्डसमाकारनखपङ्क्तिविराजितौ। ते भुजौ पुष्पदण्डवत् दीर्घौ च कोमलौ। ते पृष्टं वेदिवद्भाति। विलग्नम् ऋजुमध्यमम्। शुभे ! ते कण्ठस्तु रक्तो दीर्घश्च। स्कन्धौ चाव नतौ। मुखं प्रसन्नं सततम् अकलङ्कशशिप्रभम्। कपौलौ कनकादर्शसदृशौ कुण्डलोज्ज्वलौ। हे शुभानने ते नासिका तिलपुष्पसमाकारा। ते ललाटोऽयं अकलङ्काष्टमीचन्द्रसदृशो अतिमनोहरः दृश्यते। ते मूर्दा समवृत्तः नीलालकसुशोभितः स्निग्धायतकचान्वितः। स्मितसंशोभिदशनं बिम्बाधरसमन्वितम्। ते मुखं विष्णुयोग्यं स्यादिति मे निश्चिता मतिः। तव नाभिः दक्षिणावर्त आवर्त इव गाङ्गजः। त्वं हि क्षीराब्धिसम्भूता लक्ष्मीरिव दृश्यसे। इति चोक्त्वा ताभिः पूजितः नारदः अन्तर्दधे।

**पद्मावत्याः स्वसखीभिः साकं पुष्पाटवीगमनम् १-८**

नारदस्य गते सति पद्मावत्याः सख्यः तां पद्मिनीमूचुः हे मनोहरे ! वनं गच्छाम पुष्पार्थं वसन्तः समुपागतः। वनेऽस्मिन् पुष्पापचयनं कुर्मः। इत्युक्त्वा आकाशराजस्य तनयायुताः वनं जग्मुः। ततस्ततः पुष्पाण्याहरमाणाः शुभ्रदन्तद्वयोज्ज्वलं कञ्चित् गजेन्द्रं ददृशुः। गण्डभित्तितलोद्भूतमदधाराद्वयोज्ज्वलम् उन्नतं करणीयूथैः समुपेतं रजोज्ज्वलं पूत्कारिपुष्करप्रोद्यच्छीकरावूरिता ननं मदगजेन्द्रं दृष्ट्वा च उद्विग्नहृदया वनस्पति मुपाश्रिताः।

**मृगयार्थं पुष्पाटवीं प्रति श्रीनिवासागमनम् १-९**

एतस्मिन्नन्तरे चाशु अकलङ्केन्दुधवलं जम्बूनदपरिष्कृतं, स्फुरद्विद्युल्लतायुक्तशरन्मेघमिवोन्नतं तस्मिंस्तु मदनाकारवर्चसं, पुण्डरीकदलाकारकर्णान्तायतलोचनं, सुसूक्ष्मक्षौमसंवीतनीलचूलिकयोज्ज्वलं, पद्मरागमणिद्योतिस्फुरत्कुण्डलमण्डितं, सुवर्णरत्नखचितशाङ्र्गदिव्यधनुर्धरम्, अपरेण करेणैव काञ्चनं शरं वहन्तं, पीतकक्ष्यानुसंवीतकटिदेशं सुमध्यमं, रत्नकङ्कणकेयूरकटिसूत्रविराजितं, विशालवक्षः संशोभिदक्षिणावर्तसंयुतं, स्वर्णयज्ञोपवीतेन स्फुरत्स्कन्धं मनोहरं महावेगादनुद्दुतम् ईहामृगं समुद्दिश्य ददृशुः।

तं दृष्ट्वा विस्मिता सस्मिताः नार्यः अत्र तस्थुः। हयमारूढं तं दृष्ट्वा नम्रमस्तकः गजेन्द्रः तुण्डमुद्धृत्य गर्जन् विनिवृत्य वनं ययौ। तस्मिन् गते गजे तत्र हयारूढः ईहामृगं विचिन्वानः पुष्पलवीसमीपतः समाययौ।

**भगवतः कन्यकानां चान्योन्यसंवादः १-१०**

तुरगोपरि संस्थितः श्रीनिवासः ताः कन्यकाः समेत्य उवाच। कश्चिदीहामृग इतीरितः मृगः अत्रागतः भवतीभिः दृष्टो वा स ब्रूत मे कन्यका इति।

तं श्रीनिवासं प्रत्यूचुः कन्याः दृष्टोऽस्माभिः न कश्चन। हे वरधनुर्धर ! किमर्थमागतोऽस्माकं वनम्। हे निषादप ! अत्र वर्तमानाः मृगाः सर्वे अवध्याः। आकाशात्मजपालितात् अस्मात् वनात् आशु गच्छ इति तासां वचः श्रुत्वा, सः श्रीनिवासः हयादवरुरोह।

**एवमुवाच -**

कनकाम्बुजसन्निभा, सुभगा, चारुसर्वाङ्गी पीनोन्नतपयो धरा इयं का ? यूयं काः? मे ब्रूत। श्रुत्वा स्वस्यालयं गिरिं गमिष्याम्यहमिति। इति तस्य वचः श्रुत्वा धरण्यात्मजयेरिता पद्मावती सखी पर्वतालयं निषादं प्राह- हे शूर ! वसुधातलसम्भवा आकाशराजतनया इयमस्माकं नायिका पद्मिनी नाम। हे सुभगाकार भवतः नाम किम् ? कस्य सुतो भवान् ? का जातिः ? कुत्र ते वासः ? किमर्थ त्वमिहागतः ? ब्रूहि इति पृष्टः सः श्रीनिवासः मन्दस्मितमुखाम्बुजः ताः प्राह- पुराविदः अस्माकं तु दिवाकरकुलं प्राहुः। यस्य नामानि अनन्तानि पावनानि मनुष्याणां, वर्णतो नामतश्चापि तपस्विनः कृष्णं प्राहुः। ब्रह्मद्विषां सुरारीणां यस्य चक्रं भयावहं, यस्य शङ्खध्वनिं श्रुत्वा वैरिणः मोहमीयुः ? अमरेष्वपि यस्य धनुषः तुल्यं धुनुः नास्ति तं मां वेङ्कटाद्रिनिवासिनं वीरपतिं प्राहुः। तस्मात् अद्रितटात् सोऽहं निषादैः अनुगैः वृतः मगयार्थं हयारूढः युष्माक वनमागतः। मयाप्यनुद्रुतः कश्चित्
मृगः वायुगतिर्ययौ। तमदृष्ट्वावनं कश्चित् मृगः वायुगतिर्ययौ। तमदृष्ट्वा वनं पश्यन् सुभगमिमां दृष्टवान्। कामादिहागतोऽहं वा मया लभ्यते त्वियम् ? इति कृष्णवचः श्रुत्वा कृद्धाः ताः पुनः अब्रुवन्

- आकाशराजः त्वां दृष्ट्वा, निगडबन्धनं कृत्वा यावन्नयति तावत्त्वं शीघ्रं स्वमालयं गच्छ।

एवं ताभिः तर्जितः सः हयमारुह्य शीघ्रगं स्वानुचरैः सर्वैः, युक्तः द्रुततरं गिरिं ययौ।

**सारांशः १-११**

प्रियपाठकाः ! अस्मिन् खण्डे अगस्त्यंमहर्षेः प्रार्थनया भगवतः सर्वजनदृग्गोचरत्ववर्णनं, प्रार्थनया भगवतः सर्वजनदृग्गोचरत्ववर्णनं, मित्रवर्मणः आकाशराजाख्यसुतोत्पत्तिवर्णनं, धरणीतलात् पद्मावत्याः उत्पत्तिक्रमः, आकाशराजस्य धरण्याख्य पत्न्यां वसुदासाख्यसुतोत्पत्तिः, उद्यानवनवासिन्याः पद्मावत्याः समीपे नारदगमनं, नारदोदीरितपद्मावतीशरीरलक्षणानि, पद्मावत्याः स्वसखीभिः साकं पुष्पाटवीगमनं, मृगयार्थं पुष्पाटवीं प्रति श्रीनिवासागमनं, भगवतः कन्याकानां चान्योन्यसंवादः इत्य दयः विवृताः।

**आदर्शप्रश्नाः १-१३**

**निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः)**

१.नारदोदीरितपद्मावतीशरीरलक्षणानि वर्णयत।

२. भगवतः कन्यकानां चान्योन्यसंवादं लिखत।

३. आकाशराजस्य वसुदासाख्य सुतोत्पत्तिं विशदयत।

४. धरणीतलात् पद्मावत्याः उत्पत्तिक्रमं स्पष्टयत।

**विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२/१० अङ्काः)**

१. उद्यानवासिन्याः पद्मावत्याः समीपे नारदागमनं विशदयत।

२. पद्मावत्याः स्वसखीभिः साकं पुष्पाटवीगमनं वर्णयत।

३. मृगयार्थं पुष्पाटवीं प्रति श्रीनिवासागमनं वर्णयत।

४. मित्रवर्मणः आकाशराजाख्यसुतोत्पत्ति वर्णनम् कुरुत।

५. अगस्त्यप्रार्थनंया भगवतः सर्वजनदृग्गोचरत्ववर्णनं कुरुत।

६. आकाशराजस्य वृत्तान्तं लिखत।

**लघुप्रश्नाः (प्रत्येकं ५ अङ्काः)**

१.आकल्पान्तमदृश्येऽस्मिन् विमानेऽसौवसिष्यति - विवृणुत।

२. अगस्त्यः वेङ्कटाद्रौ किमाचचार ? विवृणुत।

३. नारायणपुरे मित्रवर्मणः वृत्तान्तं लिखत।

४. आरणितीरतः भुवं शोधआमास वियन्नृपः - व्याख्यात।

५. वसुदासस्य जातके ग्रहस्थितिं स्पष्टयत।

६. वसुदासस्य विद्यावैभवस्थितं विवृणुत।

७. पद्मावत्याः वनविहारवर्णनं कुरुत।

८. पुष्पाटव्यां श्रीनिवासस्य वर्णनं कुरुत।

**एकाङ्कप्रश्नाः (प्रत्येकं १ अङ्काः)**

१. कृतयुगे कस्य तपं दृष्ट्वा श्रीनिवासः वेङ्कटाद्रिं समागतः ?

२. स्वामिपुष्करिणीतटे दक्षिणे विमानस्य संज्ञकः कः?

३. आकल्पान्तमदृश्येऽस्मिन् विमाने वसिष्यति कः ?

४. अदृश्यो भगवान् मर्त्यैः कथं दृश्यो भविष्यति इति कया पृष्टम् ?

५. वेङ्कटाद्रौ देवतमाराध्यमगस्त्यः कियत्काल प्रीणयामस ?

६. तत्र सान्निध्यं ' भवान् दृश्यो भवतु' इति ययाचे कः ?

७. एतद्विमानं नादृशं स्यात् कदाचन इति कस्योक्तिः ?

८. आकल्पान्तं विमाने दृश्योऽहं नास्ति संशयः इति कं प्रति भगवता उक्तम् ?

९. विक्रमार्कादयः भूपाः किमज्ञात्वा स्वर्गं गताः ?

१०. मित्रवर्मा नाम राजा कस्मिन् कुले उद्भूतः ?

११. नारायणपुरं कस्मिन् मण्डले आसीत् ?

१२. मित्रवर्मणः पत्न्याः नाम किम् ?

१३. मित्रवर्मणः पत्नी कस्य पुत्री ?

१४. मित्रवर्मामनोरमयोः पुत्रः कः ?

१५. आकाशराजस्य पत्न्याः नाम किम् ?

१६. धरण्याकाशराजयोः पुत्रः कः ?

१७. एकदारव्रतः धरणीसक्तचेतसः कः ?

१८. पद्मशय्यागता रम्या सर्वलक्षणलक्षिता का?

१९. फलिता सुभ्रु ! लता सान्तानिकी च मे इति कस्योक्तिः ?

२०. स्वोच्छसंस्थेषु पञ्चसु ग्रहेषु सुमुहूर्ते जातः कः ?

२१. वैशाख इव मध्याह्ने दुःसहो दुर्निरीक्षकः कः ?

२२. त्रिवलीललितं मध्यं रोमराजिविराजितं कस्याः ?

२३. त्वं हि क्षीराब्धिसम्भूता लक्ष्मीरिवहि दृश्यसे इति केनोक्तम् ?

२४. कं दृष्ट्वा हयमारूढं गजेन्द्रो नम्रमस्तकः ?

२५. पद्मावतीं प्रति श्रीनिवासः स्वकुलं किमित्युक्तवान् ?

**एकाङ्कप्रश्नानामुत्तराणि १-१४**

१.वायोः २.नन्द ३. श्रीनिवासः ४. भूदेव्या ५. द्वादशाब्दं ६. अगस्त्यः ७.भगवदुक्तिः ८. अगस्त्यं ९. वेङ्कटाद्रौ भगवन्तं १०. सोमकुले ११. तुण्डीरमण्डले १२. मनोरमा १३. पाण्ड्यराजस्य १४. आकाशराजः १५. धरणीदेवी १६. वसुदासः १७. आकाशराजः १८.पद्मावती १९.आकाशराजस्य २०.वसुदासः २१. वसुदासः २२. पद्मावत्याः २३. नारदेन २४. श्रीनिवासं २५. दिवाकरकुलम्

* * *

# UNIT - 8

## श्रीवराहपुराणान्तर्गतं श्रीवेङ्कटाचलमाहात्म्यम् द्वितीयभागः (पञ्चमषष्ठौ अध्यायौ )

### प्रस्तावना १-१

श्रीवराहपुराणान्तर्गते श्रीवेङ्कटाचलमहात्म्ये द्वितीयभागे अष्टमखण्डे पञ्चमषष्ठौ अध्यायौ स्वीकृतौ। तयोः द्वयोः अध्याययोः प्रस्ताविताः विषायाः अष्टमखण्डे उच्यन्ते। तत्र पञ्चमे अध्याये पद्मावतीदर्शनेन श्रीनिवासस्य मोहप्राप्तिः, मुह्यमानं श्रीनिवासं प्रतिवकुळमालिकोक्तिः, श्रीनिवासोक्तपद्मावतीपरिणयकारणानि, वियद्राजपुरं प्रति वकुलमालिकागमनं, दिव्योद्यानस्थ पद्मावतीसखीः प्रति वकुलमालिकोक्तिश्चोक्ताः।

षष्ठे अध्याये वकुलमालिकां प्रति सखीविनिवेदितपद्मावत्युदन्तः, पद्मावतीमुद्दिश्य दैवज्ञं प्रति

वियद्राजकृतप्रश्नादिः, दैवज्ञोक्त्या अगस्त्यलिङ्गार्चनया विप्रादिप्रेषणं, धरणीकृतप्रश्नस्य पुलिन्दिनी प्रतिवचनं, पद्मावती निवेदित भगवद्भागवतलक्षणानि, वकुलमालिकया सार्थं सखीनां धरणीसमीपे आगमं चोक्तानि।

### उद्देश्यम् १-२

प्रियपाठकाः अस्मिन् खण्डे भवन्तः अधो लिखितान् बिन्दून् आलोचयिष्यन्ति।

* पद्मावतीदर्शने श्रीनिवासस्य मोहप्राप्तिः
* मुह्यमानं श्रीनिवासं प्रति वकुलमालिकोक्तिः
* श्रीनिवासोक्तपद्मावतीपरिणयकारणानि
* वियद्राजपुरं प्रति वकुळमालिकागमनम्
* दिव्योद्यानस्थ पद्मावती सखीः प्रति वकुलमालिकोक्तिः
* वकुळमालिकां प्रति सखीविनिवेदितपद्मावत्युदन्तः
* पद्मावतीमुद्दिश्य दैवज्ञं प्रति वियद्राजकृतप्रश्नादिः
* दैवज्ञोक्त्या अगस्त्यलिङ्गार्चनाय विप्रादिप्रेषणम्
* धरणीकृतप्रश्नस्य पुलिन्दिनी प्रतिवचनम्
* पद्मावतीनिवेदित भगवद्भागवतलक्षणानि
* वकुळमालिकया सार्थं सखीनां धरणीसमीपे आगमनम्

**पद्मावतीदर्शने श्रीनिवासस्य मोहप्राप्तिः १-३**

श्रीनिवासः दिव्यं चालयं सम्प्राप्य हयोत्तमत् अवतीर्य कैरातरूपकान् देवान् सर्वान् सानुगान् विसृज्य, ' विश्रमध्वमिति प्रोच्य, मणिमण्डपं विवेश। मणिसोपानमारूह्य, पञ्चकक्ष्या अतीत्य च मुक्तागृहं समासाद्य, नवरत्नमये मञ्चे शुभे डोलायिते तस्मिन् अवशो हरिः संविवेश। पद्मागर्भाभाम् आयत लोचनां तनुमध्यां पीनकुचां मन्दस्मितमुखाम्बुजां तमेव संस्मारन्, पद्मोद्भवां क्षीराब्धितनयामेव शुभां मेने। तस्यां गतमना देवो श्रीनिवासो मुमोह।

**मुह्यमानं श्रीनिवासं प्रति वकुळमालिकोक्तिः १-४**

ततः मुह्यमानं श्रीनिवासं प्रत मध्याह्ने समये दिव्यमुत्तममन्नं सूपदंशं, सुगन्धञ्चातिशोभनं देवार्हं शुद्धान्नं पायसान्नञ्च गौडं मुद्गान्नमेव च कृत्वा, पञ्चविधान् पूपानपूरिकावटकानपि च कृत्वा सखीभिः वकुलमालिका देवं श्रीनिवासं द्रष्टुं ययौ। पद्मावती, पद्मपत्रा, चित्ररेखा इति सखीभिः समन्विता वकुळमालिका ताः सर्वाः प्रमदोत्तमाः देवस्य द्वारि निवेश्य सा वकुमालिका स्वयं देवस्य समीपं गत्वा, भक्ति भावतः ववन्दे। रत्नभूषिते पर्यङ्के विवशं देवं दृष्ट्वा पादसंवाहनं कृत्वा निमीलि तलोचनं किमपि ध्यायन्तञ्च तं शुचिस्मिता व्याजहार। हे देवदेवेश ! पुरुषोत्तम ! उत्तिष्ठ ! किं शेषे ? माधव ! परमान्नं कृतं भोक्तुमागच्छ देव ! किं वा त्वमार्तवत् शेषे ? सर्वलोकार्तिनाशन ! देव ! मृगयामटता भवता वने किं दृष्टम् ? हे विशालाक्ष ! कामुकस्येव दृश्यते। का दृष्टा ? देवकन्या वा ? मानुषी कन्यका वा ? त्वमचिन्त्यात्मन् चित्तापहारिणीं तां कन्यां मे ब्रूहि ! इति।

तस्याः तद्वचनं श्रुत्वा विभुः श्रीनिवासः निश्श्वासमकरोत्। निश्श्वसन्तं श्रीनिवासं पुनः प्राह प्रीता वकुळमालिका- ' हे पुरुषोत्तम ! तवापि मनोहरा सा का ? इति पृष्टः हृषीकेशः वक्ष्यामि तत्त्वतः श्रुणु इति तामवोचत् –

**श्रीनिवासोक्तपद्मावती परिणमकारणानि १-५**

**श्रीभगवानुवाच !**

पुरा त्रेतायुगे पुण्ये रावणं हतवानहम्। तदा वेदवती कन्या श्रियः साहय्यमकरोत्। महीतलात् जनकस्य सीतारूपाभवत् लक्ष्मीः। पञ्चवटीवने मारीचं हन्तुं मयि गते तु सीतया चोदितः ममानुजः लक्ष्मणोऽपि मामेव अन्वयात् तं रावणोद्यमं ज्ञात्वा अग्निहोत्रगतो वह्निः सीतामादाय पाताले स्वाहायां च सन्निवेश्य, पुरा रावणेन रक्षसा स्पृष्टां अग्नौ विसृष्टदेहां शुभां तां

वेदवतीं रावणं संहर्तुं सीतायाः रूपसदृशीं कृत्वा तस्मिन्नाश्रमे एव उत्ससर्ज। सा एव रावणहृता भूत्वा लङ्कायाश्च निवेदिता। रावणे हते तु पश्चात् सा पुनः अग्निं विवेश। अग्निस्तु स्वाहायां रक्षितां लक्ष्मीं मम जानकीं हस्ते दत्वा सीतया सहितं मामाह- हे राम ! इयं वेदवती सीतायाः प्रियकारिण ! सीतार्थं राक्षसपुरे लङ्कायां बन्धीकृता स्थिता तस्मात् एनां श्रिया सह वरेणैव प्रीणय त्वमित्य ब्रवीत्। इति वह्नि वचः श्रुत्वा सीता मामवदत् - ' हे विभो ! मम प्रीतिकरी नित्यमियं वेदवती। तस्मात्परं भागवतीमेनां वरय इति' ।

**श्रीभगवानुवच !**

तदाकार्ण्याहं देवि ! अष्टाविंशे कलौयुगे तथा करिष्यामि। तावदेषा ब्रह्मलोके वसत्वमरपूजिता। इत्युक्तवान्। पश्चात् भूमितनया वियत्सुता भविष्यति इति मया लक्ष्म्या च दत्तवरा सुन्दरी अद्य नारायणपुरे धरणीतलात् सम्भूता। पद्मसमा पद्मनेत्री पद्मा द्त्तवरा सती सखीभिरनुरूपाभिः वने पुष्पाणि चिन्वती मृगयामटता तत्र मया दृष्टा मनोरमा। तस्याः रूपं मया वक्तुं न शक्यं –तहायनैः। लक्ष्म्येव च तया मेऽद्य सङ्गमो भविता यदि प्रणाः स्थिराः भविष्यन्ति सत्यमित्यवधारय। वकुळमालिके ! त्वं तत्र गत्वा तां कन्यां दृष्ट्वा पद्मेन्दीवरल्लोचना विशालाक्षई अनवद्या रूपलावण्यादियं योग्येति चास्य जानि हि। इति।

**वियद्राजपुरं प्रति वकुळमालिकागमनम् १-६**

पद्मावतीमभिवर्ण्य मोहमापन्नं तं श्रीनिवासं पुनः प्राह वकुळा देवेश ! इतो गच्छामि तव मनोज्ञा यत्र तत्रातः रमाधीश ! येन तां प्रति गमिष्ये मार्ग वद ! एवमुक्तः रमाधीशः तां वकुळस्रजं प्राह- हे महाभागे श्रीनृसिंहगुहायतः तन्मार्गेणावतीर्य, मनोरमात् तस्मात् भूदरेन्द्रात् अगस्त्याश्रममासाद्य, तदर्चितं लिङ्गं अगस्त्येश इति सुवर्णमुखरीतटे ख्यातं दृष्ट्वा, ततः तीरेणैव शुकब्रह्मऋषेः वनं गच्छ। तत्र कल्लोलमालिनीं सुवर्णमुखरीं पश्यन्ती पावनं पद्मसंयुतं पद्म सरो नाम गच्छ । अथ तत्र स्नात्वा, तत्तीरे तपन्तं मुनिसत्तमं छायाशुकं नमस्कृत्य, शुकेन मुनिना सततमाराध्यमानं पीतनिर्मलवाससं, इन्द्रनीलमणिश्यामं तीर्थयात्रां गमष्यन्तं बलभद्रं सिताकृतिं मुक्तान्वितकरद्वयं मन्त्राणि उपासयन्तं पादुकायुक्तं मुट्यन्तं बलभद्रं प्रणम्य, अस्मात् सरसः स्वर्णकमलमादाय सुवर्णमुखरीं तीर्त्वा, वनान्युपवनानि चातीत्य, अरणीतीरमासाद्य, वनान्तरे विश्रम्य, नारायणपुरीं दृष्ट्वा विस्मयञ्च गमिष्यसि। तस्त्र चोपवने वृक्षान् पुष्पाढ्यान् फलसंयुतान् पश्यन्ती परमं हर्षमवाप्य, नदीतटे गत्त्वा, पुष्पोत्तरे मार्गे नित्यं गङ्गयेवावृतां सरिता अरणी नामया इन्द्रपुरीसमाम् काशराजनगरीं गत्वा तत्रार्हं कुरु। इत्यब्रवीत्।

इत्यादिश्य सुराधीशः श्रीनिवासः वकुळाभिधां तां सखीं विसृज्य शुभ्रे शयने श्रीसमन्वितः शिश्ये। वकुळमालिका देवदेवेशं प्रणम्य, गुञ्जामणिसमाकारं रक्तत्राश्वमधिरुह्य विविधान् मार्गान् पश्यन्ती यथोक्तमार्गेण ययौ। श्वेतदन्तविभूषितान् पर्वताकारान् मत्तेभान् जलादानतत्परान् करणीयूथसहितान् श्वेतघनप्रख्यान् सिंहयूथैरनुद्रतान् सिंहान् शूर्दूलान् खड्गमृगान् शरभान् गवयान् मृगान् कृष्णसारान् गोमायून्, शशान् प्रियकान् , सारसान्, मयूरान्, मार्जारान्, वनगोचरान्, वृकान्, शुकान्, सूकरान्, सुवाचः पक्षिणः, विविधाकारान् पश्यन्ती तुष्यन्ती च मुहुर्मुहुः पादपाकुलं पश्चिममारणीतीरंमाससाद।

अरुणादश्वात् अगस्त्येशसमीपतः अवतीर्य, अगस्त्येन सुपूजितं अगस्त्येश्वरं लिङ्गं दृष्ट्वा तत्र स्नात्वा पीत्वा च नदीतटे विशश्राम।

राजगृहात् देवसन्निधौ तत्रागता योषिताः पद्मालयायाः सखीः ताः दृष्ट्वा वकुळमालिका तासां समीपे गत्वासां किं वदन्तीं पृच्छतिस्म। हे विचित्राभरणस्रजः योषितः यूयं का ? ब्रूत ! कुतः अत्र समागताः ? हे कमलाननाः किं कार्यम् ? इति । तस्याः वकुळमालिकायाः वचः श्रुत्वा ताः सुन्दर्यः स्मित्रपूर्वम ब्रुवन् - देवि ! वक्ष्यामहे अधुना वहिता वयं श्रुणुष्वेति।

## वकुळमालिकां प्रति सखीविनिवेदितपद्मावत्युदन्तः १-७

**योषितः ऊचुः।**

वयमाकाशराजस्य शुद्धान्तनिलयाः स्त्रियः। वसुधापतेः आकाशराजस्य दुहितुः पद्मालयायाः सख्यः। पूर्वं राजपुत्री पुरस्कृत्य, वनान्तरं गताः राजपुत्र्यर्थमाकुलाः पुष्पापचयं कुर्वन्त्यः वृक्षमूले समासीनाः तत्र इन्द्रनीलशिलाश्यामम् इन्दिरामन्दिरोरसम् ईषत्स्मितमुखं, चारुपीनदीर्घभुजद्वयं, मृषृपीताम्बरं हेमबाणबाणासनोज्ज्वलं, सुवर्णमकुटं, हेरकैयूरादिविभूषितं कमललोचनं पुरुषं पश्याम। तं तु दृष्ट्वा पद्मालया द्दतहेमनिभाकारा सा पश्य पश्येति अब्रवीत्। तदा पश्यन्तीनामस्माकं सा आशु अन्तर्धनं गतः। सा पद्मावती मूर्छिता। ततः अस्माभिः राजगृहं नीता। इति।

## पद्मावतीमुद्दिश्य दैवज्ञं प्रति वियद्राजकृतप्रश्नादिः १-८

आकाशराजः अस्वस्थां पुत्रीं दृष्ट्वा दैवचिन्तकमाहूय हे विप्रेन्द्र ! मम पुत्र्याः ग्रहचारफलं वदेत्यपृच्छत्। बृहस्पतिसमो विप्रः आत्मनि खेचरान् विकार्या, हे नृपोत्तम ! सर्वे ग्रहाः तव पुत्र्याः अनुकूलाः। किन्तु नित्यं ग्रहफलं किञ्चित् भ्रान्तिकरम्। इति पुनः विचार्य धीमान् तमुवाच। छायां लगच्छ गुणित्वा फलानि च विचार्य, लग्ने लग्नाधिपः चन्द्रः, केन्द्रे बृहस्पतिश्च, स्तः। दिन पक्षी तु निद्राति। प्राश्नपक्षी तु राज्यगः। हे राजन् ! तस्य फलं श्रुणु ! स्वास्थ्यमेव भविष्यति।

उत्तमः पुरुषः कश्चित् कन्यकां प्रति आगतः। तं दृष्ट्वा मूर्छिता पुत्री। तेन योगं समेष्यति। तेनैव प्रेषिता काचित् कन्यका आगमष्यति। सा तु यद्वाक्यं वदिष्यति तदित्थं ते भविष्यति। सत्यं सत्यं वदाम्यहम्। तत्कुरुष्व। किञ्च सर्वार्थदं यत्तु सर्वव्याधिविनाशनं तव पुत्र्याः सुखावहं वक्ष्यामि तत्कुरुष्व। अगस्त्यलिङ्गस्य ब्राह्मणैः अभिषेचनं कारय। इति।

## दैवज्ञोक्त्या अगस्त्यलिङ्गार्चनाय विप्रादिप्रेषणम् १-९

राजनमेवमुक्त्वा दैवचिन्तकः गृहं यातः। आकाशराजोऽपि तदा वैदिकान् विप्रानाहूय, अभ्यर्च्य हे द्विजाः देवालयं गत्वा शम्भोः मन्त्रपूर्वकं महाभिषेकं कुरुध्वम् इत्यनुज्ञाप्य, अस्मानाहूयाभ्यवदत्। हे कन्यकाः महभिषेकसम्भारान् सम्पादयत। इति नृपेणैवाज्ञप्ताः वयं देवालयं गताः। हे सुभगे त्वदागमनकारणं त्वं ब्रूहि अस्माकम्। कुतोऽसि ? कस्य वार्थेन ? क्व वा जिगमिषा ? इमं दिव्याश्वमधिरुह्य देवलोकादि गता वा ? इति ताभिः पृष्टा वकुलमालिका हृष्टा बालिकाः हर्षयन्तीव मधुरां वाचं प्रोवाच।

## वकुळमालिका उवाच।

श्रीवेङ्कटाद्रेः प्राप्ताहम्। वकुलमालिका नाम्ना। धरणीं द्रष्टुकामाहं इमं तुरङ्गमारुह्यागता। तत्र नृपालये देवीं द्रष्टुं शक्या भवेत् ? इति तस्याः वचः श्रुत्वा, ताः नृपकन्यकाः प्रोचुः। हे शुभे ! अस्माभिः सहिता त्वं धरणीं द्रक्ष्यसे। इत्युक्ता सा ततस्ताभिः नृपमन्दिरमागता।

## धरणीकृतप्रश्नस्य पुलिन्दिनी प्रतिवचनम् १-१०

राजमन्दिरे धरणीदेवी समीपे आगतांपुलिन्दिनी। सा तु सगुञ्जाशुङ्खभूषिता, स्तनं धयं शिशुं पृष्ठे वस्त्राञ्चलेन बध्वा, आयान्ती वदामि सत्यं श्रणुत भूतं भव्यं भविष्यकमिति वदन्ती वीथिविथिषु। शुचिस्मिता तामाहूय स्वर्णशर्प समादाय तस्मिन् मुक्ता निधाय त्रिप्रस्थमात्रान् त्रीन् राशीन् कृत्वा तस्यै निधाय हे पुलिन्दे ! एष्यद्वा भूतमेव वा त्वं सत्यं वद इति एवं अभिपृष्टा सा मनस्विनी मन्दमाह ।

## पद्मावतीनिवेदित भगवद्भागवतलक्षणानि १-११

मातः ! लोके यः नेत्राभिरामः, सतामपि मनः प्रियः ब्रह्माद्याः यं द्रष्टुकामा ? यत्तु सर्वगतं महत् ? तेजसामपि तेजस्वी, देवानामपि दैवतं, भक्तैः सद्भिरिहा प्राप्यः। अभक्तैः न कदाचन प्राप्यः, तस्मिन्नेव मे मनः प्रवर्तते। भक्तानां सर्वकामदं तदेवान्विष्यताम्। इत्येतत् श्रुत्वा धरणी पुनः सुतामपृच्छत् हे सुलोचने। यैः प्रप्यं तत् भक्तलक्षणं ब्रूहि इति।

**पद्मालया उवाच।**

हे मातः ! भक्तानां लक्षणं श्रुणु ! गुह्यं समाहिता। नित्यं भुजयुग्मे शङ्खचक्राङ्किते, ऊर्ध्वपुण्ड्रं सान्तरालं विशेषतः तेषामेव लक्षणम्। पुनः द्वादशोर्ध्वपुण्ड्राणि धारयन्ति अपरे। ललाटोदरहृत्कण्ठे जठरे पार्श्वयो रपि भुजद्वन्द्वे सयुग्मे पृष्ठे गलपृष्ठके च केशवादिनि नामानि द्वादशाङ्गेषु द्वादश वासुदेवेति तन्मूर्ध्नि नमोऽस्त्विति धारयन्ति। हे मातः तेषां नियमान् मनोरमान् वक्ष्ये ! वेदपारायणरताः वैदिकं कर्म कुर्वन्ति। सत्यं वदन्ति। क्वचित् परान् नासूयन्ति। परनिन्दां न कुर्वन्ति। परस्वं न हरन्ति। सुरूपाः परदारान् न स्मरन्ति न पश्यन्ति न स्पृशन्ति कदाचन। तान् वैष्णवान् विद्धि। सर्वभूतदयावन्तः सर्वभूतहिते रताः सदा देवेशं गायन्ति। तान् भक्तानवेहि। येन केन च सन्तुष्टाः, स्वदारनिरताश्च ये वीतरागभयक्रोधाः तान् भक्तान् वैष्णवान् विद्धि। एवं विधैः गुणैः युक्ताः पञ्चायुधचिह्नपृच्छन्ती स्थिताभवत् धरणी देवी। पृष्टा सा पुलिन्दिनी अस्यास्तु मनसा यद्विचिन्तितं तदवदत्। हे कल्याणि ! मध्यराशौ चिन्तितं ते ऋजु मे वद इति पृष्टा राजवल्लभा धरणी पुलिन्दामोमित्याह । अथ धरणी उवाच ! राशिरुक्तः फलं ब्रूहि। धनराशिं ददामि ते इति ! पुलिन्दा उवाच ! हे सुभ्रु ! सत्यं वदामि ते। मे शिरोरत्नं प्रयच्छा इत्युक्ता सा तु धरणी स्वर्णपात्रे अन्नमाददे। तस्यै पुलिन्दिन्यै दत्वा सत्यं ब्रूहि इति सा अवदत्। सक्षीरमन्नमादाय पुत्राय दत्वा सा भामिनी सत्यमवदत्। हे सुभ्रूः ! दुहितुः देहशोषणं पुरुषादागतम्। हे भेरु ! तद्रूपादर्शनादियमङ्गतापं समापन्ना अनङ्गशरपीडिता। स तु देवादिदेवः स्वयं वैकुण्ठादागतः श्रीवेङ्कटाद्रिशिखरे स्वामिपुष्करिणीतटे मायावी परमानन्दः कामरूपी रमापतिः श्रिया सह स्वभक्ताभीष्टदो हरिः विहरते। सः तुरङ्गं समारुह्य काननान्तरे विहरन् उपवनमागत्य, हे राज्ञि ! सः तव कन्यां दृष्टवान्। रमासमामिमां दृष्ट्वा स्वयं कामवशंगतः स्वसखीं ललितां देवः तेऽन्तिकं प्रेषयिष्यति। रमेव तं समेत्यैषा चिरं सुखं रमिष्यति। मम वचनं सत्यमेतत्। पुत्रस्यान्नं प्रयच्छेति तूष्णीमास पुलिन्दिनी। तस्यै पुनः अन्नं दत्वा तां विससर्ज। तस्यां पुलिन्दिन्यां विनिर्गतायां तु धरणीदेवी उत्थाय तस्मात् शुभमन्तः पुरं विवेश। यत्र पद्मालया कन्या स्वसखीवृता समास्ते पुत्रीसमीपस्थाः कन्याः गत्वा, कामातुरां सुतां हे पुत्रि ! किं वा वस्तु प्रियं ते ? हे शुभे ! किं करिष्यमि ? इति मात्रा धरा अपि पित्रा चान्ये शिष्टेन वा पुनः आचार्यरूपेण स्वगृह्योक्तविधानेन वह्निमादाय बुधः चक्राद्यायुधमन्त्रेण षोडशाहुतीः जहुयात्। ततः परं मूलमन्त्रेण पौरुषेण सूक्तेन पश्चात् जातवेदः सुमन्त्रेणाष्टोत्तरं शतं महाव्याहृतिभिः हुत्वा तत्र चक्रादीन् तापयेत्। सद्यान् सुतप्तान् गुरुणा मन्त्रवत् धारयेत्। भुजद्वये शङ्खचक्रे, मूर्ध्नि शाङ्र्गशरौ ललाटे तु गदा हृदये खड्गमेव च धार्या। एवं मुमुक्षुभिः विष्णुभक्तैः

पञ्चैव धार्याणि। अथवा भुजयोः चक्रशङ्खौ सुलक्षणौ धारणीयौ। एवं लाञ्छनयुक्ताः ये भक्ताः ते वैष्णवाः स्मृताः। सदाचारसमन्वितैः तैरेव लभ्यं तद्ब्रह्म। तस्मिन्नेव मम प्रीतिः। मनः तत्प्राप्तिं कांक्षते। मातः ! विष्णुं विना अन्येषु वाच्छा काचिन्न जायते। अच्युतं हरिं वदामि। विष्णुं श्यामलं स्मरामि। मातः तेनैव जीवामि। विधिः तद्योगे चिन्त्यताम्।

मातरं दीनामित्युक्त्वा अम्बुजानना पद्मावती विरराम। तच्छृत्वा विष्णुः कथं प्रीतः भवेत् इति धरणीदेवी चिन्तयामास।

## वकुळमालिकया सार्धं सखीनां धरणीसमीपे आगमनम् १-१२

एतस्मिन्नन्तरे कन्याः अगस्त्येशं समर्च्य, वकुळदेव्या सहैव धरणीं द्रष्टुमागताः। आगतान् ब्राह्मणान् तत्र पूजयित्वा सुभोजनैः दक्षिणाः पूर्णा वस्त्रालङ्कारसंयुताः दत्वा पूजयित्वा, वाञ्छितार्थस्य सिद्धये आशिषो वाचयित्वा, सर्वान् ब्राह्मणान् विसृज्य अथ स्वयोषितः अगस्त्येशं पूजयित्वा आगताः ताः मनस्विनीः अपृच्छत्।

## सारांशः १-१३

प्रियपाठकाः अस्मिन् खण्डे पद्मावतीदर्शनेन श्रीनिवासस्य मोहप्राप्तिः, मुह्यमानं श्रीनिवासं प्रति वकुलमालिकोक्तिः, श्रीनिवासोक्तपद्मावतीपरिणयकारणानि, वियद्राजपुरं प्रति वकुळमालिकागमन, दिव्योद्यानस्थ पद्मावती सखीः पति वकुळमालिकोक्तिः। वकुळमालिकां प्रति सखीविनिवेदितपद्मावत्युदन्तः, पद्मावतीमुद्दिश्य दैवज्ञं प्रति विजद्राजकृतप्रश्नादिः, दैवज्ञोक्त्या अगस्त्यालिङ्गार्चनाय विप्रादिप्रेषणं, धरणीकृतप्रश्नस्य पुलिन्दिनीप्रतिवचनं, पद्मावतीनिवेदितभगवद्भागवतलक्षणानि, वकुळमालिकया सार्धं सखीनां धरणीसमीपे आगमनम्, इत्यादीनि विवृतानि।

आचार्यप्रथमयवर्षम्, पुराणेतिहासः -द्वितीयपत्रम्

**आदर्शप्रश्नाः १-१४**

**निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः)**

१.वियद्राजपुरं प्रति वकुळमालिकागमनं वर्णयत।

२.पुलिन्दिन्याः वृत्तान्तं विशदयत।

३. पद्मावतीनिवेदित भगवद्भागवतलक्षणानि स्पष्टयत।

४. पद्मावतीमुद्दिश्य दैवज्ञस्य वचनानि विशदयत।

**विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२/१० अङ्काः)**

१.पद्मावतीदर्शनेन श्रीनिवासस्य मोहप्राप्तिं वर्णयत।

२.मुह्यमानं श्रीनिवासं प्रति वकुळमालिकोक्तिं विशदयत।

३.श्रीनिवासोक्तपद्मावतीपरिणयकारणानि लिखत।

४.श्रीनिवासोक्तं वेदवती वृत्तान्तं विशदयत।

५. वकुळमालिकां प्रति सखीवि निवेदितं पद्मवत्युदन्तं स्पष्टयत।

६.दैवज्ञोक्त्या अगस्त्यलिङ्गार्चनाय विप्रादिप्रेषणं लिखत।

**लघुप्रश्नाः (प्रत्येकं ५ अङ्काः)**

१.श्रीनिवासस्य मोहावस्थां वर्णयत।

२.वकुळादेव्या श्रीनिवासं प्रति सान्त्वनवचनानि स्पष्टयत।

३.श्रीनिवसोक्तरावणवृत्तान्तं विशदयत।

४. श्रीनिवासोक्तानि पद्मावतीवर्णनवचनानि लिखत।

५.अगस्त्येशवृत्तान्तं लिखत।

६. वकुळादेव्या दृष्टं वनं वर्णयत।

७.दिव्योद्यानस्थपद्मावतीसखीः प्रति वकुळमालिकोक्तिं लिखत।

८.धरणीकृतप्रश्नस्य पुलिन्दिनीप्रतिवचनं स्पष्टयत।

९. भागवतलक्षणानि कानि ? स्पष्टयत।

१०.वकुमालिकया सार्धं सखीनां धरणीसमीपे आगमनं लिखत।

**एकाङ्कप्रश्नाः (प्रत्येकं १ अङ्कः)**

१.गतमना देवः श्रीनिवासो मुमोह कस्याम्?
२. पद्मावतीपद्मपत्रा चित्ररेखा समन्विता का ?
३.त्रेतायुगे श्रियः साहय्यमकरोत् का ?
४. रावणोद्यमं ज्ञात्वा सीतां स्वाहायां प्रस्थापितवान् कः ?
५. सीतायाः रूपसदृशीं कृत्वा उत्ससर्ज कः ?
६. सीतार्थं राक्षसपुरे रावणेन बन्धीकृता का ?
७. तस्मात्परं भागवतीं देवैनां वश्येति उक्तवती का ?
८. नारायणपुरे धरणीतलात् सम्भूता का ?
९.अगस्त्येश इति ख्यातं कस्मिन् तटे विद्यते ?
१०. सगुञ्जा शङ्खभूषिता वीथिकामायान्ती का ?
११. वदामि सत्यं शृणुत भूतं भव्यं भविष्यकमिति कया उक्तम् ?
१२. वद सत्यं त्वम् एष्यद्वा भूतमेव वेति कया उक्तम् ?
१३. सत्यं वदामि ते सुभ्रु ! शिरोरत्नं प्रयच्छ मे इति कया उक्तम् ?
१४. कामरूपी विहरते श्रीवेङ्कटाद्रिशिखरे कः ?
१५. रमासमामिमां दृष्ट्वा स्वयं कामवशं गतः कः ?
१६. वीतरागभयक्रोधाः भक्ताः के ?
१७. सदाचारसमन्वितैः वैष्णवैः लभ्यं किम् ?
१८. तस्मिन्नेव मम प्रीतिः तत्प्राप्तिं कांक्षते मनः इति कस्याः उक्तिः ?

**एकाङ्कप्रश्नानामुत्तराणि १-१५**

१.पद्मावत्याम् २. वकुळदेवी ३. वेदवती ४.अग्निदेवः ५. अग्निदेवः ६. वेदवती ७.सीता ८. पद्मावती ९. सुवर्णमुखरी १०. पुलिन्दिनी ११.पुलिन्दिन्या १२. धरणीदेव्या १३. पुलिन्दिन्या १४. हरिः १५. श्रीनिवासः १६. वैष्णवाः १७. तद्ब्रह्म १८.पद्मावत्याः

* * *

# UNIT -9

## श्रीवराहपुराणान्तर्गतं श्रीवेङ्कटाचलमाहात्म्यम् द्वितीयभागः (सप्तमाष्टमौ अध्यायौ )

प्रस्तावना १-१

श्रीवराहपुराणान्तर्गते श्रीवेङ्कटाचलमाहात्म्ये द्वितीयभागे नवमखण्डे सप्तमाष्टमौ अध्यायौ स्वीकृतौ। तयोः द्वयोः अध्यययोः प्रस्ताविताः विषयाः उच्यन्ते। तत्र सप्तमे अध्याये धरणीदेव्यै वकुलमालिकानिवेदित श्रीनिवासोदन्तः, श्रीनिवासोक्त्या शङ्खनृपस्य स्वामितीर्थे तपः करणम्, वकुलमालिकोक्त्या धरण्यादिकृतविवाहनिश्चयः, बृहस्पत्युक्त्या विवाहलग्नस्थिरीकरणम्, विश्वकर्मादिकृतपुरालङ्कारादिक्रमः, पद्मावतीशुकेन सह वकुलायाः श्रीनिवाससमीपे गमनं, पद्मावत्या शुकदत्तश्रीनिवासमालाधारणं चोक्तानि।

अष्टमे अध्याये श्रीनिवासस्य लक्ष्म्यादिकृतपरिणयालङ्कारः, ब्रह्मादिभिस्साकं श्रीनिवासस्य वियद्राजपुरागमनं, पद्मावतीपरिणयघट्टः, वधूवरयोः वियद्राजवितीर्णप्राभृतादिकं, श्रीनिवासकृपया वियद्राजस्य भक्तिप्राप्तिरूपवरप्राप्तिः, विवाहार्थमागतानां ब्रह्मादीनां स्वावासगमनं चोक्तानि।

**उद्देश्यम् १-२**

प्रियपाठकाः

* अस्मिन् खण्डे भवन्तः अधोलिखितान् बिन्दून् आलोचयिष्यन्ति।
* धरणीदेव्यै वकुलमालिकानिवेदित श्रीनिवासोदन्तः
* श्रीनिवासोक्त्या शङ्खनृपस्य स्वामितीर्थे तपः करणम्
* वकुलमालिकोक्त्या धरण्यादिकृतविवाहनिश्चयः
* बृहस्पत्युक्त्या विवाहलग्नस्थिरोकरणम्
* विश्वकर्मादिकृत पुरालङ्कारादिक्रमः
* पद्मावती शुकेन सह वकुलायाः श्रीनिवाससमीपे गमनं
* श्रीनिवासस्य लक्ष्म्यादिकृतपरिणयालङ्कारः
* ब्रह्मादिभिस्साकं श्रीनिवासस्य वियद्राजपुरागमनम्
* पद्मावतीपरिणयघट्टः
* वधूवरयोः वियद्राजवितीर्णप्राभृतादिकम्
* श्रीनिवासकृपया वियद्राजस्य भक्तिप्राप्तिरूपवरप्राप्तिः
* विवाहार्थमागतानां ब्रह्मादीनां स्वावासगमनम्

**धरणीदेव्यै वकुलमालिकानिवेदित श्रीनिवासोदन्तः १-३**

हे कन्याः ! कैषा वरा ? युष्माभिः कुतः सङ्गता ? किमर्थामागता ? एषा मे पूज्या प्रतिभाति इति।

**कन्यकाः ऊचुः।**

हे देवि ! एषा दिव्याङ्गना त्वयि कार्यार्थमागता। देवालये शिवसन्निधौ सङ्गतेयमस्माभिः पृष्टा अवदत् भवतीं द्रष्टुमेवेगतेति, युष्माकं राज्ञो मुखेन मया राजगृहे द्रष्टुं शक्या ? एवं पृष्टास्ततो ब्रूमः सहास्माभिश्चा गम्यताम्। वयं तु धरणीदास्यो नृपालयं गमिष्यामः। इत्युक्तास्मभिरायाता त्वत्समीपम्। भवत्या पृछ्यता मेषा किमत्यागमनं तवेति। तासां वचः शृत्वा धरणीदेवी तां वकुलमालिकामपृच्छत् - देवी ! कुतस्त्वमागता ? किं वा कार्य तव मया ? त्वदागमनकारणं ब्रूहि । करिष्यामि सत्यम्। इति वकुलमालिका उवाच।

वकुलमालिकानाम्ना, वेङ्कटाद्रेः समायाता। श्रीवेङ्कटाचले अस्माकं स्वामी नारायणो आस्ते। कदाचित् हंसशुक्लं मनोजवं हयमारुह्य वेङ्कटाद्रेः समीपतः मृगयार्थं गतः। कुसुमाकरे शोभने काले वनानि विचरन् मृगान् गजान् सिंहान् गवयान् शरभान् रुरून् शुकान् पारावतान् हंसान् पत्रिणो अन्यान् पश्यन् वनान्तरे तत कञ्चित् यूथपं मदवर्षिणं गजराजं करेणुसहितं तुङ्गमन्वगच्छत् सुरोत्तमः।

**श्रीनिवासोक्त्या शङ्खनृपस्य स्वामितीर्थे तपः करणम् १-४**

वनाद्वनान्तरं गत्वा बृहच्छैले जनार्दनं प्रतिष्ठाप्य तपस्यन्तं नृपं शङ्खमुपागमत्। भक्तितः श्रीभूमिसहितं नित्यमर्चयन्तश्च शङ्खनागबिलं नाम पावनमुत्तमं सरः गत्वा, तत्सरस्तीरमासद्य,

तुरङ्गादवरुह्य, राज वेषं नरोत्तमं शङ्खणनृपतिं समासाद्य, हे नृपश्रेष्ठ ! शेषभूभृतः अस्मिन् पादे किं क्रियते ? इत्यपृच्छत्।

**शङ्खणनृपः उवाच !**

हैहयदेशीयोऽहं भूभृतः श्वेतस्य पुत्रः। महाविष्णोः प्रीतये अत्राखिलान् क्रतून् कृतवान्। महाविष्णोः अदर्शनात् निर्विण्णोऽहम्। तदानीमवदत् सर्वार्तिनाशिनी दिव्यवाणी -' राजन् ! ते नात्र प्रत्यक्षं भविष्यामि। वचः श्रुणु। त्वं नारायणाद्रिं गच्छ। मां स्फुटं तपः कुरु ' इति। ततोऽहं

देशं त्यक्त्वा तपसा आराधयाम्यहम्। हे नृप ! देवमचिन्त्यमत्रश्रियः पतिं प्रतिष्ठाप्य, अगस्त्यानुग्रहात् विधानतः नित्यमर्चयामि। इति तस्य वचः श्रुत्वा, विभुः सोत्प्रासं प्राह। त्वं नारायणाद्रिं गच्छ। अस्य पादे किमास्य ते। अनेन मार्गेणारुह्य त्वं पश्चिमे शिखरे न्यग्रोधमूलतः स्थितं बालं विष्वक्सेनं प्रणम्य, स्वामिपुष्करिणीं गत्वा, स्नात्वाथ पश्चिमे तीरे तत्र अश्वत्थं वल्मीकं द्रक्ष्यसे। तयोर्मध्यं समासाद्य तपः कुरु इत्यचोदयत्। कश्चित् श्वेतो वराहो अस्मिन् वल्मीके चरति धृवम्। स तु पुण्यवतामेव सेवां यच्छति।

इत्यदिश्य हयारूढो विभुः मृगयां जगाम। वनाद्वनं चरन् अरणीं नदीं समासाद्य तत्र हयादवरुह्य, शुभे तटे विचचार। वनान्तादागतो वायुः पद्मकल्हारशीतलः श्रमापनयनः मन्दं पुरुषोत्तमं शिषेवे। तरवः पुष्पवर्षाणि विकिरन्तः सिषेविरे। एवं श्रीनिवासः पुष्पभरवतान् तरून् विचरन्, गजराजं तं विचिन्वन् पुष्पलावीः सुवेषाः रुचिराः मेघेष्विव शतह्रदाः कन्याः ददर्श। तासां मध्यगतां तन्वीं मनोहरां लक्ष्मीसमां हेमवर्णां ददर्श। तस्यां सक्तमना अभूत्। तां गृध्नुः आह ताः कन्याः केयमित्येव पुरुषः। इयं कन्या वियद्राजः कन्या इति ताभिः उक्ताः। तासां वचः इदं श्रुत्वा हयमारुह्य वेगवान् भगवान् स्वालयं रुचिरं गिरिमाशु आजगाम।

तत्र स्वालयमासाद्य स्वामिपुष्करिणीतटे देवः मामाहूय, हला वकुलमालिके ! वियद्राजपुरं गत्वा अन्तः पुरं प्रविश्य तत्पत्नीं धरणीं प्राप्य, कुशलमेव च पृष्ट्वा, तस्याः तनयां रुचिरां कमलालयां याचस्व। राज्ञः अभिमतमाज्ञाय शीघ्रमागच्छ। इत्थं देवेन चाज्ञप्ता त्वद्गृहमागता। राज्ञा मन्त्रियुतेन च यथोचितं कुरुष्व। इति।

**वकुलमालिकोक्त्या धरण्यादिकृतविवाहनिश्चयः १-५**

कन्यया पद्मावत्या विचार्यैव उत्तरं वचः प्रोच्यतामिति वकुलमालिकायाः वचः श्रुत्वा, प्रीता बभूव राज्ञा आकाशराजमाहूय कमलालयामुपेत्य, वकुलस्रजः वचनं मन्त्रिमध्ये अवदत्। श्रुत्वा प्रीतो आकाशराजः मन्त्रिणः सपुरोहितान् अवदत्।

**आकाशराज उवाच !**

कन्या तु अयोनिजा, दिव्या, सुभगा, कमलालया वेङ्कटाद्रिनिवासिना देवदेवेन आर्थिता मे मनोरथः अद्य पूर्णः। भवतां संमतं किम् ? ब्रूत। मन्त्रिगणाः सर्वे राज्ञः उत्तमं वचनं श्रुत्वा, सुप्रीतमनसो महीपतिं वियद्राजं प्रोचुः। हे राजेन्द्र ! वयं कृतार्थाः। कुलं सर्वोन्नतं भवेत्। भवत्कन्येयमतुला श्रिया सह रमिष्यति। परमात्मने शार्ङ्गिणे देवदेवाय दीयताम्। अयं वसन्तः श्रीमांश्च शुभं श्रीघ्रं विधीयताम्। बृहस्पतिमाहूय विवाहर्थं लग्नं विधीयताम्। इति।

### बृहस्पत्युक्त्या विवाहलग्नस्थिरीकरणम् १-६

तथास्तु इति देवलोकात् बृहस्पतिमाह्वयामास। कन्यावरयोः विवाहार्थं नरेश्वरः लग्नाय पप्रच्छ।

**आकाशराजः उवाच !**

कन्यायाः जन्मनक्षत्रं मृगशीर्षमिति स्मृतम्। देवाधिदेवस्य जन्मनक्षत्रं श्रवणम्। तयोः विवाहयोगाय सुमुहूर्तं विचार्यताम्। इति आकाशराजस्य वचनानि श्रुत्वा बृहस्पतिः हे राजन् ! तयोः उत्तरफल्गुनी नक्षत्रं सुखवृद्ध्यर्थं प्रोच्यते दैवचिन्तकैः सम्मता। वैशाखमासे विधिवत् क्रियातमिति सुमुहूर्तं निश्चितम्। राजा तु बृहस्पतिं सम्पूज्य, अथ विसृज्य च, देवस्य दूतिकां वकुलमालिकामाह- हे शुभे ! देवालयं गच्छ। वैशाखमासे देवदेवाय श्रीनिवासाय कल्याणं निश्चितम्। वैवाहिकविधानं कृत्वा चागम्यतामिति वदेति। ततः पद्मावतीदेव्याः प्रियकरं शुकं दूतं तया सह विसृज्य, स्वसुतं वायुं इन्द्राद्यानयने असृजत्।

### विश्वकर्मादिकृतपुरालङ्कारादिक्रमः १-७

आकाशराजः विश्वकर्माणमाहूय पुरालङ्कारकर्मणि नियोजयामस। सोऽपि निमिषान्तरात् निर्ममे। इन्द्रः पुष्पवृष्टिमसृजत्। अप्सरोगणाः ननृतुः। कुबेरः धनदः धनधान्याद्यैः तत् गृहं पूरयामास। यमधर्मराजः भुवि मनुजान् रोगरहितान चकार। वरुणः रत्नजालानि मौक्तिकादीनि अपूरयत्। एवं सर्वाणि सम्पाद्य देवाः वृषाचलं ययुः।

### पद्मावत्याः शुकेन सह वकुलायाः श्रीनिवासमीपे गमनं १-८

ततः सा वकुलमालिका शुकेन सहिता हयमारूह्य, श्रीवेङ्कटाद्रिमासाद्य, देवालयसमीपतः तुरङ्गादवरुह्य सशुकाभ्यन्तरं ययौ। रत्नपीठे सुलोचनं देवं दृष्ट्वा, प्रणम्य हे विभो ! प्रीता कृत्यं कृतं तत्र। माङ्गल्यवार्तां वक्तुं शुक एष समागतः। इत्यवदत्।

### श्रीनिवासाय शुक्रावेदितपद्मावतीपरिणयवृत्तान्तः १-९

तत्र विशेषविषयान् वदेति देवेनाज्ञप्तः शुकः नत्वा तमब्रवीत् त्वां प्रत्याह भूमेः सुता मामङ्गीकुरुमाधव वदामि तव नामानि, स्मरामि त्वद्वपुस्सदा। हे रमापते ! भुजाद्यङ्गैः तव चिह्नानि ध्रियन्ते। पञ्चसंस्कारसंयुतान् त्वद्भक्तानर्चयामि। हे मधुसूदन ! त्वत्प्रीतये कर्माणि करोमि। एवं सदैवाचरन्त्याः मम पित्रोरनुमतेः देवेश ! प्रसादं कुरु। माधव ! मामङ्गीकुरु। इति कमलस्था धरासुता विज्ञापयामास।

**पद्मावत्या शुकदत्तश्रीनिवासमालाधारणम् १-१०**

शुकस्य वचनं श्रुत्वा सुप्रियं तु आत्मनो हरिः हे शुक ! अहं पद्मावतीं कल्याणमुद्वाहं कर्तुम् आगमिष्यामि चामरैः इति वद एवं तामित्थं देवो अब्रवीदिति। श्रुत्वा शुकः देववाक्यमादाय वनमालिकां देवदत्तां स्वीकृत्य शीघ्रं वियद्राजसुतां प्रति ययौ। शुकः पद्मावतीं गत्वा कस्तूरीपरिमलभरिततुलसीमालिकां दत्वा, प्रणम्य शुभं देववचः देवीमवदत्। तत्

शृत्वा, तन्मालिकां गृह्य भूमिजा शिरसा ददौ। अपि च श्रीनिवासागमनकाङ्क्षिणी अलङ्कारमुचितं चक्रे।

वियद्राजोऽपि सानन्दं सादरमिन्दुमाहूय राजन् ! विविधं रससंयुतमन्नं विधीयताम्। विष्णोः नैवेद्ययोग्यं यत् परमान्नं विधीयताम्। देवानाञ्च ऋषीणाञ्च नराणामपि सम्मतं चतुर्विधं सुगन्धाढ्यं भक्ष्यभोज्यलेह्यपेयरूपं सुधाकरामृतांशैः एवं संविधानं कृत्वा विभोः प्रतीक्ष्यागमनं सभायां मन्त्रिसहितः समाप्तप्रीतमानसः पुत्रीमलङ्कृतां कृत्वा, धरणीसहितो नृपः आसीत्।

**श्रीनिवासस्य लक्ष्म्यादिकृतपरिणयालङ्कारः १-११**

ततः देवाधिदेवो श्रीनिवासोऽपि भामिनीं लक्ष्मीमाहूय हे सुलोचने ! विवाहार्थं किं कार्यम् ? स्वसखि आज्ञापयस्व ! कार्यं प्रियं कुरु। इति तस्य वचः श्रुत्वा, श्रीस्तु सखीनामभ्यचोदयत्। ततः श्रिया आज्ञप्ता प्रीतिः सुगन्धं तैलमाददौ। श्रुतिः क्षौमं समादाय देवस्य सन्निधौ तस्थौ। धृतिः

आदर्शमादत्त। कान्तिः मृगमदं ददौ। ह्रीः यक्षकर्दममादाय हरेः पुरतो स्थिता। कीर्तिः कनकपट्टञ्च सरत्नं मकुटं ददौ। तदा इन्द्राणी छत्रं ददौ। सरस्वती चामरं ददौ। गौरी द्वितीयं चामरं विजयाजये व्यजने चागताः। ताः समालोक्य, श्रीः उत्थाय सत्वरा सुगन्धं तैलमादाय शीर्षतः देवमभ्यज्य, गन्धचूर्णैः उद्वर्तितं देवाङ्गं परिमृज्य, करिभिः अनीतान् शतं काञ्चनान तोयकलशान्, वियद्गङ्गातीर्थेभ्यः कर्पूरादिसुवासितान् एकमेकं समादाय रमा हरिं तु अभ्यषिञ्चत्। धूपेन केशान् संधूप्य, आश्यामान् तान् बबन्ध। तद्विभोः अङ्गं स्वर्णवर्णेन सुगन्धेनानुलिप्य, पीतकौशेयकं काञ्चीसमन्वितं कट्यां बद्ध्वा, मुकुटादि विभूषाभिः इन्दिरा भूषयामास। सर्वास्वेवाङ्गुलीषु अङ्गुलीयकरत्नानि अलङ्कृत्य, धृतिः देवस्य सन्निधौ आदर्शं दर्शयामास। देवदेवः आदर्शं दृष्ट्वा ऊर्ध्वपुण्ड्रं स्वयं दधौ। पश्चात् स्वयं लक्ष्मीसमन्वितः गरुडमारुह्य ब्रह्मादिभिः साकं श्रीनिवासः आकाशराजपुरमागतः।

## ब्रह्मादिभिस्साकं श्रीनिवासस्य वियद्राजपुरागमनम् १-१२

ब्रह्मेशवज्रिवरुणयमयक्षेशसेवितः वसिष्ठाद्यैः मुनीन्द्रैश्च योगिभिः सनकाद्यैश्च भक्तैः भागवतैः युक्तः नारायणपुरीं ययौ। गन्धर्वपतयः जगुः। अप्सरो गणाः ननृतुः। तदा देवस्य सन्निधौ देवदुन्दुभयोः नेदुः। मुनयः स्वस्तिसूक्तानि जपन्तः तं समन्वयुः। एवं श्रीनिवासः विष्वक्सेनादिपार्षदैः देवगणैः युक्तः सखीभिः स्यन्दनस्थाभिः वकुलाद्याभिः अन्वितः स्वलङ्कृतम् आकाशराजस्य पुरमाससाद।

## पद्मावतीपरिणयघट्टः १-१३

श्रीनिवासदेवमागतमालोक्य, कन्यां पद्मावतीमैरावतस्थितां पुरीं प्रदक्षिणीकृत्य गोपुरद्वारमागताम् ततः आकाशराजः वधूवरौ आलोक्य, समानीय, बन्धुभिः सहितः देवं केशवमालोक्य, तस्थौ। विष्णुः श्रीनिवासः स्वकण्ठस्थां मालां हस्तेनादाय सस्मितः कमलायाः स्कन्धदेशे मुमोच। सा पद्मावती सुमनश्चितां मल्लिकामालामादाय श्रीनिवासस्य कण्ठे समर्पयत्। एवं तौ त्रिवारं कृत्वा, वाहनादवरुह्य, क्षणं पीठे स्थित्वा पश्चात् शुभं गृहं विविशतुः। ब्रह्मादिदेवयूथैश्च सहितौ भूमिजाहरी गृहं विविशतुः। अब्जजः चतुर्मुखः साङ्कुरार्पणं माङ्गल्यसूत्रबन्धादि लाजहोमान्तमेव च वैवाहिकं कारयित्वा, व्रतादेशं समाज्ञाय कमलाहरी शायितौ। चतुर्थे दिवसे चतुर्मुखः सर्वं समापय्य, वियद्राजमुज्ञाप्य, गरुडे हरिमारोप्य, देवीभ्यां सहितं देवं देवैः गुन्तुं प्रचक्रमे। दिव्यदुन्दुभिनिर्घोषैः वृषभाचलं, सम्प्राप्य, ब्रह्माद्याः देवतागणाः देवदेवेशं श्रीनिवासं तुष्टुवुः। शुकादयः मुनिगणाः पुरुषोत्तमं तुष्टुवुः। अथ स्तूयमानः देवोऽपि मणिमण्डपं विवेश। रमाधरणिजाभ्याञ्च तत्र सिंहासनं ययौ।

## वधूवरयोः वियद्राजवितीर्णप्राभृतादिकम् १-१४

तदा आकाशराजोऽपि महेन्द्रादि सुरैः सह पुत्रीविष्ण्वोः प्रियार्थं तु प्राभृतं कर्तुमुद्यतः, सौवर्णेषु कटाहेषु शालिसंम्भवान् तण्डुलान् मुद्गपात्राण्यनेकानि, घृतकुम्भशतानि च पयोघटसहस्राणि दधिभाण्डान्यनेकशः दिव्यानि चूतकंदलीनारिकेलफलानि धात्रीफलानि कूष्माण्डराजरम्भाफलानि, पनसान्, मातुलुङ्गान् शर्करापूरितान् घटान् सुवर्णमणिमुक्ताः, क्षौमकोट्यम्बराणि, दासीदाससहस्राणि, कोटिशः गाः, तथैव हसेन्दुशुक्लवर्णानां हयानामयुतं ददौ। तुङ्गानां नित्यमदानां गजानामधिकं शतात्, अन्तः पुरचरानारीः, नृत्तगीतविशारदाः चतुः सहस्राणि विष्णवे श्रीनिवासाय ददौ। एतानि सर्वाणि दत्वा, देवपुरो विभुः तस्थौ देवीभ्यां सहितः हरिः देवोऽपि तत्सर्वं दृष्ट्वा सुप्रीतो बभूत्।

**श्रीनिवासकृपया वियद्राजस्य भक्तिप्राप्तिरूपवरप्राप्तिः १-१५**

सुप्रीतः श्रीनिवासः श्वशुरं राजानं प्राह- हे राजन् मत्तः गुरो यदिच्छसि वरं वृणीष्व इति श्रीशवचः शृत्वा, वियद्राजः विभुमवदत् हे देव ! इह त्वत्सेवैव एवमव्यभिचारिणी भूयात्। त्वत्पादकमले मनः त्वयि भक्तिः ममास्तु। इति।

त्वया यदुक्तं राजेन्द्र ! सर्वमेतद्भविष्यति। इति तस्मै वरं दत्वा यथोचितं सम्मान्यैव।

**विवाहार्थमागतानां ब्रह्मादीनां स्वावासगमनम् १-१६**

ब्रह्मेशादिसुरान् सर्वान् यथोचितं समभ्यर्च्य, स्वर्लोकगमनायैवमनुमेने मुदा हरिः। गतेषु तेषु सर्वेषु श्रिया भूमिजया युतः स्वामिपुष्करिणी तटे यथापूर्वं विहरन् अर्च्यमानः देवः श्रीनिवासः दिव्यालये आस्ते।

**सारांशः १-१७**

प्रियपाठकाः ! अस्मिन् खण्डे धरणीदेव्यै वकुलमालिकानिवेदित श्रीनिवासोदन्तः, श्रीनिवसोक्त्या शङ्खनृपस्य स्वामितीर्थे तपः करणम्, वकुलमालिकोक्त्या धरण्यादिकृतविवाहनिश्चयः, बृहस्पत्युक्त्या विवाहलग्नस्थिरीकरणम्, विश्वकर्मादिकृत पुरालङ्कारादिक्रमः, पद्मावतीशुकेन सह वकुलायाः श्रीनिवाससमीपे गमनम्, पद्मावत्या शुकदत्तश्रीनिवासमालाधारणम्, श्रीनिवासस्य लक्ष्म्यादिकृतपरिणयालङ्कारः, ब्रह्मादिभिस्साकं श्रीनिवासस्य वियद्राजपुरागमनम्, पद्मावतीपरिणयघट्टः, वधूवरयोः वियद्राजवितीर्ण प्राभृतादिकम्, श्रीनिवासकृपया वियद्राजस्य भक्तिप्राप्तिरूपवरप्राप्तिः, विवाहार्थमागतानां ब्रह्मादीनां स्वावासगमनमित्यादीनि उक्तानि।

**आदर्शप्रश्नाः १-१९**

**निबन्धात्मकप्रश्नाः (प्रत्येकं २०/१५ अङ्काः)**

१. शङ्खणनृपस्य वृत्तान्तं विशदयत।

२.श्रीनिवासकल्याणमहोत्सवं वर्णयत।

३. वकुलमालिकया श्रीनिवासस्य विवाहनिश्चययत्नं स्पष्टयत।

४. पद्मावती श्रीनिवासयोः मध्ये शुकसन्देशं वर्णयत।

**विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२/१० अङ्काः)**

१. श्रीनिवासस्य लक्ष्म्यादिकृतपरिणयालङ्कारविशेषान् विशदयत।

२.पद्मावतीपरिणयघट्टं वर्णयत।

३. पद्मावती श्रीनिवासयोः वियद्राजवितीर्णप्राभृतादिकं स्पष्टयत।

४.पद्मावत्या शुकदत्त श्रीनिवासमालाधारणं वर्णयत।

५. बृहस्पत्युक्त्या विवाहलग्नस्थिरीकरणं विशदयत।

६. वकुलमालिकया धरण्यादिकृत विवाहनिश्चयं स्पष्टयत।

**लघुप्रश्नाः (प्रत्येकं ५ अङ्काः)**

१.धरणोदेव्यै वकुलमालिकानिवेदितश्रीनिवासोदन्तं लिखत।

२.श्रीनिवासोक्त्या शङ्खणनृपस्य स्वामितीर्थे तपः करणं स्पष्टयत।

३.विश्वकर्मादिकृतपुरालङ्कारादिक्रमं स्पष्टयत।

४. श्रीनिवासं प्रति पद्मावत्या शुकसन्देशप्रेषणं विशदयत।

५.पद्मावत्या शुकदत्तश्रीनिवासमालाधारणं विशदीकुरुत।

६. श्रीनिवासकृपया वियद्राजस्य वरप्राप्तिं विवृणुत।

७.वियद्राजवितीर्णप्राभृतादिकं स्पष्टयत।

८. ब्रह्मादिभिस्साकं श्रीनिवासस्य वियद्राजपुरागमनं वर्णयत।

**एकाङ्कप्रश्नाः (प्रत्येकं १ अङ्काः)**

१.जनार्दनं प्रतिष्ठाप्य तपस्यन्तः कः श्रीनिवासेन दृष्टः ?

२. कस्य सरसस्तीरे तुरङ्गादवरुह्य श्रीनिवासः शङ्खणं दृष्टवान् ?

३. शङ्खणनृपस्य पिता कः ?

४. शङ्खणनृपः कस्य देशीयः ?

५. नारायणाद्रिं गत्वा तत्र तपः कुरु इति शङ्खणनृपं प्रति केनोक्तम् ?

६. श्वेतवराहः केषां सेवां यच्छति ?

७. कस्मिन् नदीतीरे श्रीनिवासः हयादवरुह्य विचाचार ?

८. वयं कृतार्था राजेन्द्र ! कुलं सर्वोन्नतं भवेत् इति कैः उक्तम् ?

९. पद्मावत्याः विवाहलग्ननिश्चयाय कः आहूतः ?

१०. पद्मावत्याः जन्मनक्षत्रं किम् ?

११. श्रीनिवासस्य जन्मनक्षत्रं किम् ?

१२. पद्मावतीश्रीनिवासयोः विवाहनक्षत्रं किम् ?

१३. पद्मावती श्रीनिवासयोः विवाहः कस्मिन् मासे निश्चितः ?

१४. आकाशराजः पुरालङ्कारकर्मणि कमाहूतवान् ?

१५. आकाशराजः पुरालङ्कारकर्मणि कमाहूतवान् ?

१६. माङ्गल्यवार्तां वक्तुं शुक एष समागतः इति कया उक्तम् ?

१७. मामङ्गीकुरु माधव इति शुकसन्देशः कया प्रेषितः ?

१८. कर्तुं कल्याणमुद्वाहमागमिष्यामि चामरैः इति केनोक्तम् ?

**एकाङ्कप्रश्नानामुत्तराणि १-२०**

१.शङ्खणनृपः २. शङ्खनागबिलस्य ३. श्वेतराजः ४. हैहयदेशीयः ५. श्रीनिवासेन ६. पुण्यवताम् ७. आरणी ८. आकाशराजस्य मन्त्रिभिः ९. बृहस्पतिः १०. मृगशीर्षम् ११. श्रवण १२. उत्तरफल्गुणी १३. वैशाखमासे १४. वायुं १५. विश्वकर्माणं १६. वकुलमालिकया १७. पद्मावत्या १८. श्रीनिवासेन

* * *

# UNIT - 10

श्रीवराहपुराणान्तर्गतं श्रीवेङ्कटाचलमाहात्म्यम् द्वितीयभागः ( नवमदशमौ अध्यायौ )

( दशमखण्डः)

## प्रस्तावना - १-१

श्रीवराहपुराणान्तर्गते श्रीवेङ्कटाचलमाहात्म्ये द्वितीयभागे दशमखण्डे नवमदशमौ अध्यायौ स्वीकृतौ। तयोः द्वयोः अध्याययोः प्रस्ताविताः विषयाः उच्यन्ते।

तत्र नवमे अध्याये वसुनामकनिषादवृत्तान्तः सुतहननोद्युक्तं वसुं प्रति भगवदुक्तिः, रङ्गदासस्य श्रीनिवाससेवार्थं श्रीशेषाचलागमनम्, श्रीनिवासार्थं रङ्गदासकृतदिव्योद्यानमण्डपनिर्माणानि, रङ्गदासस्य गन्धर्वक्रीडादर्शनेन भगवत्कैङ्कर्यविस्मृतिः स्वानुष्ठितानुसन्धानेन लज्जितं रङ्गदासं प्रति श्रीनिवासवचनम्, तोण्डमान्नामकनृपवृत्तान्तः, तोण्डमान्नृपस्य मृगयार्थं श्रीशेषाचलागमनम्, श्रीनिवाससमीपस्थं पञ्चवर्णशुकवृत्तान्तः, तोण्डमान्नपस्य निषादेन सह श्रीनिवाससेवागमनम्, तोण्डमान्नृपं प्रति रेणुकोक्तिः, शुकवर्णितपद्मसरोवरमाहात्म्यम्, देवादिकृतश्रीलक्ष्मीस्तुतिः, इन्द्रादीन् प्रति स्तुतिप्रसन्नलक्ष्मीवचनम् इत्यादीनि उक्तानि।

दशमे अध्याये तोण्डमान्नृपस्य स्वपितुः सकाशात् राज्यप्राप्तिः, वसोः वल्मीके श्रीवराहदर्शनम्, तोण्डमान्नृपाय वसुनिवेदितवराहोदन्तः, नृपस्य निषादवाक्यस्वप्नाभ्यां बिलमार्गेण शेषाचलागमनम्, भगवदाज्ञया तोण्डमान्नृपकृतक्षीराभिषेकप्राकारनिर्माणादिकम्, गङ्गास्नानागतवीरशर्माख्यविप्रचरितम् अस्थिसरोवरमाहात्म्यम्, कुर्वग्रामस्थकुलालवंशजभीमाख्य भक्तोदन्तः, कुर्वग्रामस्थ भीमाख्यभक्तसपत्न्या सह वैकुण्ठप्राप्तिः, श्रीनिवासकृपया तोण्डमान्नृपस्य सारूप्यप्राप्तिः, वेङ्कटाचलमाहात्म्यश्रवणपठनफलश्रुतिः इत्यादयः उक्ताः।

## उद्देश्यम् १-२

प्रियपाठकाः अस्मिन् खण्डेभवन्तः अधो लिखितान् बिन्दून् आलोचयिष्यन्ति।

- वसुनामकनिषादवृत्तान्तः।
- सुतहननोद्युक्तं वसुं प्रति भागवदुक्तिः
- रङ्गदासस्य श्रीनिवाससेवार्थं श्रीशेषाचलागमनम्।
- श्रीनिवासार्थं रङ्गदासकृत दिव्योद्यानमण्डपनिर्माणानि

- रङ्गदासस्य गन्ध्वक्रीडादर्शनेन भगवत्कैङ्कर्यविस्मृतिः
- स्वानुष्ठितानुसन्धानेन लज्जितं रङ्गदासं प्रति श्रीनिवासवचनम्
- तोण्डमान्नामकनृपवृत्तान्तः।
- तोण्डमान्नृपस्य मृगायार्धं श्रीशेषाचलागमनम्
- श्रीनिवाससमीपस्थं पञ्चवर्णशुकवृत्तान्तः
- तोण्डमान्नृपस्य निषादेन सह श्रीनिवाससेवागमनम्
- तोण्डमान् नृपं प्रति रेणुकोक्तिः
- शुकवर्णितपद्मसरोवरमाहात्म्यम्
- देवादिकृत श्रीलक्ष्मीस्तुतिः
- इन्द्रादीन् प्रति स्तुतिप्रसन्नलक्ष्मीवचनम्
- तोण्डमान्नृपस्य स्वपितुः सकाशात् राज्यप्राप्तिः
- वसोर्वल्लक्ष्मीके श्रीवराहसन्दर्शनम्
- तोण्डमान्नृपाय वसुनिवेदित वराहोदन्तः
- नृपस्य निषादवाक्यस्वप्नाभ्यां बिलमार्गेण शेषाचलागमनम्
- भगवदाज्ञया तोण्डमान्नृपकृतक्षीराभिषेकप्राकारनिर्माणादिकम्।
- गङ्गास्नानागत वीरशर्माख्यविप्रचरितम्
- अस्थिससरोवरमाहात्म्यम्
- कुर्वग्रामस्थकुलालवंशजभीमाख्यभक्तोदन्तः
- कुर्वग्रामस्थभीमाख्यभक्त सपत्न्या सह वैकुण्ठप्राप्तिः
- श्रीनिवासकृपया तोण्डमान् नृपस्य सारूप्यप्राप्तिः
- वेङ्कटाचलमाहात्म्यश्रवणपठनफलश्रुतिः

**वसुनामकनिषादवृत्तान्तः १-३**

**धरणी उवाच !**

हे प्रिय ! भूमिधर ! कलौ युगै केन त्वं द्रक्ष्यसे ? अस्मिन् वेङ्कटाद्रौ ते विमानं केन कार्यते

? सुभगाकृतिः श्रीनिवासे केनैव द्रक्ष्यते ? हे विभो ! एतत् श्रोतुं मम कौतूहलं, प्रीत्या ब्रूहि इति।

**श्रीवराह उवाच !**

हे देवि ! भविष्यद्वदामि ते ! अस्मिन् महीधरे पुण्ये निषादौ वसुनायकः पुरुषोत्तमे भक्तिमान् श्यामाकवनपालो ऽभूत्। श्यामाकतण्डुलान् पकत्वा, मधुना परिषिच्य, श्रीभूमिसहिताय देवदेवाय निवेद्य, एवं भक्तिमतः तस्य भार्या शुभा चित्रवती वीरनामानमुत्तमं तनयमसूत। वसुः पुत्रेण सहितः पतिभक्तया भार्यया निवसतिस्म। कस्मिंश्चिद्दिवसे पुत्रं श्यामाकं वनं पालयेति विसृज्य, पत्न्या सहितः मध्वन्वेषणतत्परः मधुच्छत्रदिदृक्षया शीघ्रं वनान्तं गतः। बालः श्यामाकपक्वानि गृहीत्वा, अग्नौ निधाय पिष्ट्वा वृक्षमूलं श्रियः पतेः निवेदयामास। नैवेद्यं भक्षयित्वैव वीरस्त्वास सुखेन। तदनन्तरे वसुश्चापि मध्वादाय समागतः। श्यामांकान् भक्षितान् दृष्ट्वा आत्मनः सुतं सन्तर्ज्य खड्गमादाय तं हन्तुं त्वरया हस्तमुद्धधौ।

**सुतहननोद्युक्तं वसुं प्रति भगवदुक्तिः १-४**

तदा तद्वृक्षस्थः विष्णुः पाणिना खड्गं जग्राह। खड्गं गृहीतं केनेति पश्यन् सः वसुः वृक्षं ददर्श। वृक्षगूढार्धविग्रहं शङ्खचक्रगदापाणिं केशवं दृष्ट्वा, वसुश्च तं खड्गं मुक्त्वा प्रणम्योवाच -किमिदं देवदेवेश चेष्टितं क्रियते त्वया ? इति।

**श्रीभगवानुवाच !**

वसे ! श्रृणु मे वचः त्वम्। पुत्रः मयि भक्तिमान्। त्वत्तोऽपि मे प्रियतमः। तस्मात् प्रत्यक्षमागतः। तस्य सर्वत्र तिष्ठामि। तवस्वामिसरस्तटे। इति देववचः श्रुत्वा, वसुः प्रीतिमानभवत्। एतस्मेन्नेव काले शूद्रोऽपि विष्णुभक्तिसमन्वितः बाल्यात्प्रभृति पाण्ड्यदेशात् समागतः।

**रङ्गदासस्य श्रीनिवाससेवार्थं श्रीशेषाचलागमनम् १-५**

सः रङ्गदासः नारायण पुरीं प्राप्य, श्रीवराहं प्रणम्य, तत्र वेङ्कटाचलवासिनं श्रीनिवासं श्रुत्वा, ततः देवदेवेशं स्वयम्भूश्रीनिवासं सेवितुं प्रययौ। सुवर्णमुखरीं प्राप्य, स्नात्वा, चोत्तीर्य, तत्तटे पुण्यप्रदायिनि कमलाख्ये सरसि स्नात्वा, तत्तीरवासिनं बलरामेण संयुतं देवं कृष्णं नमस्कृत्य, ततः प्रायात। गजघटायुतं वनं शनैः ससम्प्राप्य, शेषाद्रिं, निर्झरं कपिलतीर्थं सन्ददर्श। तत्समीपं समासाद्य, कपिलपूजितं शिवं तत्पुरः चक्रतीर्थं, तत् अगाधं पापनाशनं गत्वा, तत्र स्नात्वा, ततः शनैः शनैः वेङ्कटाद्रिमगच्छत्। तदाराद्धुं गच्छता मार्गे वैखानसेन युक्तः। द्वादशवार्षिकः बालः रङ्गदासः स्वामिपुष्करिणीं प्राप्य, स्नात्वा भक्तिसमन्वितः वैखानसेन मुनिना गोपीनाथेन वनमध्ये तरोर्मूले स्वामिपुष्करिणीतटे पूजितं तिष्ठन्तं श्रीभूमिसहितं पुण्डरीकाक्षं हरिं शुभं पीतनीलाकृतिमाकाशस्थं सन्ददर्श। पार्श्वस्थशङ्खचक्राभ्यां गदासिभ्यां निषेवितं आकाशे पक्षौ विस्तार्य वितानवत् देवमूर्ध्नि

स्थितञ्च गरुडेशानं पश्चात् शाङ्र्ग तथा शरं च सेवितवान्।

**श्रीनिवासार्थं रङ्गदासकृतदिव्योद्यानमण्डपनिर्माणानि १-६**

श्रीनिवासं दृष्ट्वा विस्मितो रङ्गदासकः अस्य देवस्य चारामं नाम पुष्पवाटिकां करिष्यामीत्यचिन्तयत्। मनसा निश्चित्य सुधीः रङ्गदासः सर्वं तरुमूले अवसत्। दिने दिने वैखानसात् विष्णोः नैवेद्यं च कृत्वा शनैः घोरं वनं छित्वा, पार्श्वगान् वृक्षान् चिच्छेदाज्ञया तावुभौ देवसेवितौ वर्जयित्वा, देवस्य परितः भूमौ तदा शिलाकुड्यमकरोत्। तत् कुड्यस्यैव परितः पुष्पारामांश्चकार। मल्लिका करवीराब्जकुन्दमन्दारमालतीतुलसीचम्पकानाञ्च वनान्येव चकार। तत्र कपं खनित्वा तज्जलैर्वनं वर्धयन् आरामपुष्पाण्यादायाथाकरोत् दामानि विचित्राणि तदा बद्ध्वा पूजकस्य करे ददौ। पूजकः तानि आदाय स्कन्धे मूर्ध्नि च बबन्ध। श्रीभूमिसहितस्य देवस्य श्रीनिवासस्य अलञ्चकार। एवं देवस्य कैङ्कर्यं कुर्वन् तस्थौ उदारधीः रङ्गदासः। महात्मनि रङ्गदासे पुष्पापचयं कुर्वाणे तस्यैव वर्तमानस्य समाप्ताः असप्ततेर्गताः।

**रङ्गदासस्य गन्धर्वक्रीडादर्शनेन भगवत्कैङ्कर्यविस्मृतिः १-७**

एकस्मिन् दिने आरामे सरसि स्नातुं कश्चित् गन्धर्वः आययौ। गन्धर्वराजः कन्याभिः तरुणीभिः समन्वितः विमानकं दिवि स्थाप्य, जलक्रीडां करोतिस्म। सुरूपाभिः सहितं क्रीडन्तं पश्यन् श्रीरङ्गदासोऽयं माल्यसञ्चयं व्यस्मरन्। जितेन्द्रियोऽपि तक्रीडां पश्यन् रेतः ससर्ज। पश्यतः तस्य सरसः समुत्तीर्य मनोहरः दिव्यवस्त्राणि चाच्छाद्य कान्ताभिः सह सस्मितं विमानमधिरूह्य धनदालयं ययौ। गते गन्धर्वराजे तु रङ्गदासः विमोहितः तानि माल्यानि त्यक्त्वा लज्जितः सरसि स्नात्वा पुष्पाणि पुनराहृत्य शनैः देवालयं ययौ। तं दृष्ट्वा वैखानसः पूजाकालमतीत्य आगतं किमिति प्राह । सखे ! अतिक्रम्यचागतः। मालिकाश्चापि न बद्धा त्वया आरामे किं कृतम् ? इत्थं पृष्ठः रङ्गदासः लज्जया नावदत्। ततः लज्जितं तं रङ्गदासं प्रति भगवान् प्रोवा च।

**स्वानुष्ठितानुसन्धानेन लज्जितं रङ्गनाथं प्रति श्रीनिवासवचनम् १-८**

**श्रीभगवानुवाच।**

हे रङ्गदास ! लज्जया किम् ? मया मम मायया त्वं मोहितोह्यसि। न तावत् जितकामस्त्वम्। महामते ! धीरो भव। महीतले गन्धर्वराजावत् राजा भवितासि। तत्र महाभोगान् भुक्त्वा, मयि सर्वदा भक्तिमान् तदा प्राकारञ्च विमानञ्च कारयिष्यसि। परमया प्रीत्या मुक्तिं

प्रदास्यामि। आशरीरमोक्षणात् त्वमत्रैव सेवां कुरु मद्भक्तानां सकामानाम्। एवं मुक्तिर्भविष्यति। इत्युक्त्वा भगवान् विष्णुः पुनर्नोवाच किञ्चन्। तत् शृत्वा रङ्गदासोऽपि आराममुत्तमं चकार।

**तोण्डमान्नामकनृपवृत्तान्तः १-९**

साग्रं शताब्दं सेवित्वा अमन्दधीः स्वर्गं गतः। तुङ्गी सोमकुले जातः तोण्डमानिति विश्रुतः। नन्दिनीगर्भसम्भवः सुवीरतनयो वीरः। सः पञ्चवर्षादुद्भूतविष्णुभक्तिः स्वयं सुधीः सौशील्यशौर्यवीर्यादि गुणानामाकरो महान् पाण्ड्यस्य तनयां पद्मां मनोहराम् उपयेमे। ततो राजा नानादेश्याः स्वयं वराः शतं कन्याः भूमौ देवेन्द्रवत् रेमे। नारायणपुरे वसन् पितृतः अनुज्ञां प्राप्य, पञ्चास्यविक्रमः पुत्रः वीरः मृगया मुद्दिश्य वेङ्कटाद्रेः समीपतः पादचारेण परिवारैः समन्वितः विचरन् मदधारां विमुञ्चन्तं गजयूधपं ददर्श। तं दृष्ट्वा विस्मितो भूत्वा, गृहीतुं तमनुद्रुतः सुवर्णमुखरीं तीर्त्वा, ब्रह्मर्षिं शुकमुत्तमं नमस्कृत्य, अभ्यनुज्ञातः ततः वनाद्वनमगच्छत्। वल्मीकाकारसंस्थितां रेणुकां देवीं ददर्श। इष्टभक्तानामिष्टदाम् दिव्यारामनिवासिनीं परिवारैस्सदोपेतां त्रिदशैरपि पूजितां तां नत्वा, तोण्डमानपि ततः पश्चान्मुखो ययौ।

**श्रीनिवाससमीपस्थं पञ्चवर्णशुकवृत्तान्तः १-१०**

तत्र पश्चिमदिशि पञ्चवर्णं शुकं दृष्ट्वा तं जिघृक्षुः अनुद्रुतः। सः श्रीनिवासेति वदन् गिरिं शीघ्रतरं ययौ। स राजापि अनुद्रवन् गिरिराजं समारुहत्। दरीश्च विविधाः पश्यन्, शिखराणि समन्वतः शुकमन्वेषमाणोऽसौ श्यामाकवनमेयिवान्। तत्र शुकवरं तमदृष्ट्वा, वनपालं ददर्श। सः तं राजानमायान्तं सत्वरः प्रत्युद्गच्छन् विनयोपेतः प्रणम्य कृताञ्जलिपुटः स्थितः। तोण्डमानपि तुं वनेचरं सम्पूज्य, कश्चित् पञ्चवर्णः शुकः अत्रागतः। त्वया दृष्टः ? वनेचर ! श्रीनिवासेति च वदन् क्वागतोऽसौ ? इति पृष्टः वनेचर उवाच।

हे राजेन्द्र ! स पञ्चवर्णः सदा श्रीनिवासप्रियः। सदा तस्य पार्श्ववर्ती श्रीभूमिभ्यां विवर्धितः। स्वामिपुष्करिणीतीरे देवसन्निधौ सदास्ते। स शुकः केनापि गृहीतुं न तु केनापि शक्यति श्रीमान्।

नित्यं स्वेच्छया विहृत्य, शुभेऽस्मिन् गिरिवरे दिनान्ते देवमासाद्य तत्समीपे वसत्ययम्। नृपात्मज ! तं देवमाराधयितुं गमिष्यामि। मम यावदागमनं तावत् विश्रम्यतां वृक्षमूले। यथासुखं पुत्रेणानेन सहितो विहरत्वम्। इति।

**राजा उवाच।**

देवं जनार्दनं द्रष्टुं त्वया सहागमिष्यामि। वेङ्कटाद्रिनिवासिनं देवेशं मे दर्शय त्वम् इति तस्य राज्ञः वचः श्रुत्वा श्यामाकं मधुमिश्रितं चूतपत्रपुटे क्षिप्त्वा, राज्ञा सह हरिं ययौ।

## तोण्डमान्नृपस्य निषादेन सह श्रीनिवाससेवागमनम् १-११

तौ तोण्डमान्नृपनिषादौ सुदूरं गत्वा शिलातलं पश्यन्तौ

मुहूर्तादेव शुभां स्वामिपुष्करिणीं सम्प्राप्तौ। राज्ञा सह निषादपः विधानेन तत्र स्नात्वा, महात्मनः तस्य राज्ञः देवेशं दर्शयामास। स्वामिपुष्करिणीतीरे श्रीवृक्षमूलके स्थितम् अतसीपुष्पसङ्काशम् अम्बुजायतलोचनं, चतुर्भुजम्, उदाराङ्गं, ईषात्स्मितमुखाम्बुजं, दिव्यपीताम्बरधरं कीरीटकडकोज्ज्वलम् पार्श्वस्थाभ्यां सुरूपाभ्यां श्रीभूमिभ्यां समन्वितं, परितः शङ्खचक्रासि गदाशाङ्र्गेषु सेवितम्, अन्यैः दिव्यायुधैश्चापि दिव्यमाल्यैः निषेवितं, स्कन्देनाराध्यमानं त्रिसन्ध्यं तं पुरुषोत्तमं वल्मीकगूडपादाब्जम्, आजानुपुरुषोत्तमं दृष्ट्वा ततो मुदा देवं प्रणीमतुः तदा उभौ राजा तु प्राञ्जलिर्भूत्वा, विस्मयोत्फुल्ललोचनः आनन्दलहरीं प्राप्य, न किञ्चनं प्राज्ञायत। निषादोपि मधुपश्रितं

श्यामाकं निवेद्यैमिव तदर्थं राज्ञे दत्वैव शिष्टार्थं स्वयं भुक्तवान्। तेन राज्ञा समन्वितः पुष्करिणीतोयं पीत्वा, पुनः श्यामाकवने पुण्यां पर्णकुटीरं ययौ। भूमिपः एकरात्रन्तु उषित्वा च प्रातरुत्थाय स्वसैन्येन समायुक्तः निवृत्तः स्वपुरं ययौ।

## तोण्डमान् नृपं प्रति रेणुकोक्तिः १-१२

तोण्डमान् नृपः पुनः देवीवनं गत्वा, हयादवततार। चैत्रशुद्धनवम्यां रेणुकां पूजयामास। हविष्यं परमान्नञ्च सोपस्करमनेकशः पशूपहारसहितं धूपदीपसमन्वितं सुराघटीशतं जातीकेसरवासितं दत्वा, एवं संपूजिता देवी प्रीता राज्ञे वरं ददौ। कश्चितंपुरुषः आविष्टः नृपसत्तममवदत्। हे राजन् ! तवैव नाम्नात्र राजधानी भविष्यति। महाराज ! मत्समीपे चिरं राज्यं करिष्यसि। हे अनघ! तव देवदेवप्रसादश्च भविष्यति। इति तस्मै वरं दत्वा आविष्टः प्रकृतिं ययौ। ततः लब्धवरो राजा दत्वा पुनः शुकमुनिं ययौ।

## शुकवर्णितपद्मसरोवरमाहात्म्यम् १-१३

शुकमहर्षिमभिवाद्य तेन पूजितः मुदितो अभवत्। हे मुने ! कमलाख्यस्य सरसः माहात्म्यं मे ब्रूहि इति।

**श्रीशउक उवाच !**

हे नृप ! पुरा दुर्वाससः शापात् पद्माक्षदयिता पद्मा विष्णुना सहिता सुरालयात् अवतीर्णा। काञ्चनपद्माढ्यं सरः इदं प्राप्य, महेश्वरी रमा दिव्यानां वरानामयुतं तपश्चकार। ततो देवाः श्रियं विष्णुसमन्वितां पुरन्दरेण संयुक्ताः अस्मिन् सरोवरे सुवर्णकमले स्थितां पुण्डरीकाक्षसंयुतां दृष्ट्वा प्रीतिसमायुक्ताः अम्बुजधारिणीं प्रणम्य, कृताञ्जलिपुटः सेन्द्राः लोकमातरं तुष्टुवुः।

## देवादिकृत श्रीलक्ष्मीस्तुतिः १-१४

**देवाः ऊचुः**

नमः श्रियै लोकधात्र्यै ब्रह्ममात्रे नमो नमः।
नमस्ते पद्मनेत्रायै पद्ममुख्यै नमो नमः।
प्रसन्नमुखपद्मायै पद्माकान्त्यै नमो नमः।
नमो बिल्ववनस्थायै विष्णुपत्न्यै नमो नमः।
विचित्रक्षाम धारिण्यै पृथुश्रोण्यै नमो नमः।
पक्वबिल्वफलापीनतुङ्गस्तन्यै नमो नमः।
सुरक्तपद्मपत्राभ करपादतले शुभे।
सुरत्नाङ्गदकेयूर काञ्चीनूपुर शोभिते।
यक्षकर्दमपं लिप्त सर्वाङ्गे कटकोज्ज्वले।
माङ्गल्याभरणैश्चित्रैः मुक्ताहारैर्विभूषिते।
ताटङ्कैरवतंसैश्च शोभमानमुखाम्बुजे।
पद्महस्ते नमस्तुभ्यं प्रसीद हरिवल्लभे।
ऋग्यजुः सामरूपायैः विद्यायै ते नमो नमः।

हे अब्दिजे ! तव कृपादृष्टिपातैः प्रसीदस्मानालोकय ! त्वया ये दृष्टाः ते ब्रह्मरुद्रेन्द्रत्वं समाप्नुयुः।

## इन्द्रादीन् प्रति स्तुतिप्रसन्नलक्ष्मीवचनम् १-१५

**श्रीशुक उवाच !**

इति देवैः स्तुता विष्णुवक्षः स्थलालया तदा विष्णुना सह सन्दृश्या रमा सुरान् प्रीतावदत्।

**श्री उवाच ।**

हे देवताः ! भवन्तः सुरारीन् सहसा हत्वा स्वपदानि गमिष्यथ । भुवि ये नराः स्वस्थानात् भ्रंशिताः, ये स्थानहीनाः ते मामनेन स्तोत्रेंण स्तुत्वा, स्थानमवाप्नुयुः। ये देवाः नराः युष्मत्कृतेन स्तोत्रेणानेन अखण्डैः बिल्वपत्रैः मामर्चयन्ति ते धर्मार्थकाममोक्षाणामाकराः भवन्ति ये केचन देवाः नराः भुवि इदं पद्मसरः प्राप्य, विष्णुवल्लभां मां स्तुत्वा, स्नानं करिष्यन्ति तेऽपि श्रियं, दीर्घमायुः, विद्यां, पुत्रान्, सुवर्चसः लब्ध्वा भोगान् भुक्त्वा अन्ते मोक्षमवाप्नुयुः। इत वरं दत्वा देवी देवेन विष्णुना सह गरुडेशानमारूह्य, वैकुण्ठस्थानमाययौ।

**तोण्डमान्नृपस्य स्वपितुः सकाशात् राज्यप्राप्तिः १-१६**

**श्रीशुक उवाच !**

इदं पद्मसरोवरो नाम सर्वपापप्रणाशनम्। कीर्तनात् स्मरणात् स्नानात् नृणां भुवि लक्ष्मीप्रदमिदम्। त्वमप्यस्मिन् स्नानं कृत्वा पितुरन्तिकं व्रजस्व।

एवच्छुकवचः श्रुत्वा पद्मसरोवरे स्नात्वा तं नत्वा, हयमारुह्य तोण्डमान् स्वपुरं ययौ। पिता तं युवराजानं कृत्वा, त्रीन् वत्सरान् नीत्वा, रञ्जुकत्वं, सामर्ध्य, शौर्यं, वीर्यं, सुशीलतां भक्तिं विप्रेषु पुत्रस्य वीक्ष्य, राजा स्वमन्त्रिभिः विधानतः स्वभिषिच्य, स्वपदे स्थापयामास। सुतमनुमीय राजा पत्न्या सार्थं वनं ययौ।

**वसोः वल्मीके श्रीवराहसन्दर्शनम् १-१७**

तोण्डमान् साम्राज्यं लब्ध्वा राज्यं चकार। निषादस्य वने देवः वाराहं रूपमास्थितः। श्यामाकपक्वं भक्षित्वा रात्रौ चचार। सः। दिव दिवा वराहस्य पदानि अन्वियेष। सः तं वराहमदृष्ट्वा रात्रौ जाग्रत् धनुर्धरः स्थितो चरन्तं तं चन्द्रकोटिसमप्रभम् अपश्यत्। सुभगाकारं वराहं श्यामाकवनमध्यतः दृष्ट्वा, धनुरादाय सिंहनादं चकार। वराहः तद्ध्वनिं श्रुत्वा सत्वरं वनात् निष्क्रम्य, सत्वरं ययौ। स निषादपश्चापि वराहं तमनुययौ। वने चन्द्रसमप्रभं रात्रिशेषमनुदृत्य स निषादपः वल्मीकं प्रविशन्तञ्च ददर्श। यधा अस्तं गिरिवरं पूर्णिमाचन्द्रं गच्छन्तं वल्मीकं स निषादपः विस्मितः कोपात् अखानयत्। धरावराहो ददृशे मूर्छितोऽयं वराह देवं तुष्टाव। येन प्रीतो भवेद्धरिः तस्य पितरमाविश्य प्रोवाच्य मधुसूदनः।

**श्रीभगवानुवाच।**

वराहदेवेशोऽहं नित्यमस्मिन् वसाम्यहम्। राज्ञे त्वमुक्त्वा, मामत्र प्रतिष्ठाप्यैव पूजय। कृष्णगोक्षीरैः क्षालयित्वा, तदुद्धिते शिलातले च वाराहमुद्धृत्य धरणीस्थितं विप्रैः वैखानसैश्च मां कारयित्वा प्रतिष्ठाप्य, तोण्डमान् राजसत्तमः विविधैः भोगैः पूजयेत् इत्युक्त्वा देवः तं जहौ। स च व्याधः स्वस्थो बभूव। सुखासीनन्तु पितरं नमस्कृत्य निषादजः देववचः सर्वं यथातथं पित्रे न्यवेदयत्। सः श्रुत्वा विस्मितो भूत्वा राज्ञः वक्तुं शीघ्रं ययौ।

**तोण्डमान्नृपाय वसुनिवेदित वराहोदन्तः १-१८**

कृत्स्नं पुत्रवचः शुभं श्रुत्वा, विस्मितो भूत्वा, राज्ञः वक्तुं शीघ्रं ययौ निषादः स्वानुगैः सह। निषादाधिपतिः वसुः राजद्वारमुपागतम्। नृपोत्तमः द्वारपालैःनिषादाधिपमाज्ञाय तं निषादेशमाहूय सभायां मन्त्रिभिः सह सपुत्रं सपरिच्छदं तं वसुं सत्कृत्य राजा प्रीतिमान् गोचरं तं वसुं पप्रच्छ हे वनगोचर ! ते आगमनकृत्यं किम् ? वद त्वम्। इति।

**वसुः उवाच।**

हे राजन् ! निशि श्यामाकमचरन् कश्चित् श्वेतवराहः मम वने दृष्टम्। तं वराहं धनुष्पाणिः
अन्वधावमहम्। अनुद्रुतो वायुवेगो गत्वा, वल्मीकमाविशत्। स्वामिपुष्करिणीतीरे क्रोधात् वल्मीकखननं कृत्वा मूर्छितो न्यपतं भवि। मत्पुत्रोऽयं समागत्य, मां दृष्ट्वा भुविमूर्छितं शुचिर्भूत्वा, देवदेवं मधुसूदनं तुष्टाव। ततः वराहः मयि समावेश्य, अवदत्। हे निषादप कृष्णगोक्षीरसेकेन वल्मीकं क्षालयेन्नृपः। वल्मीकस्था सुशोभना काचित् शिला दृश्यते। वराहवदनं स्थितं मां वामाङ्कस्थ भुवं च शिल्पिना कारयित्वा, मुनीश्वरैः प्रतिष्ठाप्य, वैखानसैः मुनिवरैः तोण्डमानपि अर्चयेत्। अथ गत्वा वल्मीकावृत्तपद्मयं श्रीनिवासं कपिलाकृष्णगोक्षी रसेचनैः शनैः क्षालयेत्। दिनेदिने आपादपीठपर्यन्तं क्षालयित्वा, उभयोः उत्तरे दक्षिणे पाकारं कुर्यात्। इत्युक्त्वा, देवः मामुञ्चत्। स्वस्थोऽभवम्। इदं ते वक्तुमायातः इति। विज्ञापनं कृतवान्।

**नृपस्य निषादवाक्यस्वप्नाभ्यां बिलमार्गेण शेषाचलगमनम् १-१९**

तोण्डमानपि तच्छ्रुत्वा सुप्रीतः विस्मितोऽभवत्। ततः पुष्करादिभिः मन्त्रिभिः कार्यं विनिश्चित्य, वेङ्कटाद्रिं जिगमिषुः सर्वशः गोपानाहूय कृष्णाश्च कपिला गावः याः काः सन्ति मामिकाः ताः सवत्साः वेङ्कटाद्रिसमीपतः आनयध्वम् इत्याज्ञप्य, नृपः गोपान् श्वः यात्रा इति च

मन्त्रिणः प्रकृतिः सर्वाः विसृज्य, विवेशान्तः पुरं वशी तां कथां पत्नीभ्यः उक्त्वा पार्थिवः निशि सुष्वाप तस्य स्वप्ने श्रीनिवासः बिलमार्गं हि अदर्शयत्। एवं स्वप्नं दृष्ट्वा नृपः प्रातः सत्वरः उत्थाय, मन्त्रिण सर्वान् आहूय, प्रकृतीः ब्राह्मणानपि आहूय, तथाविधं स्वप्नं चोक्त्वा, द्वारे पल्लवमपश्यत्। हयमारुह्य तोण्डमान् युक्ते मुहूर्ते प्रययौ। पल्लवान् गाश्च पश्यन् शनैः प्रीतः बलं ययौ। दृष्ट्वा विस्मयमापन्नः तत्र पत्तनं निर्ममे।

भगवदुक्त्या तोण्डमान्नृपकृतक्षीराभिषेकवप्रनिर्माणादिकम् १-२०

बिलमन्तः पुरे कृत्वा, प्राकारं चाप्यकारयत्। नृपेन्द्रः तत्र वसन् पृथीवीमिमां निर्जित्य, यथोक्तं देवदेवेन क्षीरप्रक्षालनादिकं कृत्वा प्राकारनिर्माणं कर्तुमुद्योगमाययौ। तदानीं देवदेवेन स्वयमाज्ञापितः तिन्त्रिणीं चम्पकं चोभौ पालयै तौ नगोत्तमौ। मम चास्थानकी चिञ्चा। लक्ष्म्याः स्थानञ्च चम्पकः। नृपैः तौ नमस्कार्यौ देव देवैश्च, नरैश्च सदा। हे नृपश्रेष्ठ ! तौ संस्थाप्य, अन्यान् भेदय !

द्वारगोपुरसंयुतं प्राकारमात्रं मे कुरु। विमानं तु भवद्वंश्यो नारायणो नाम्ना नृपः मद्भक्तः कारयिष्यति। स्वर्णेनालङ्करिष्यति। तोण्डमानम् एवमुक्त्वा श्रियः पतिः विरराम।

एवं देववचः श्रुत्वा, प्राकारमेव कृत्वा वैखानसकुलोद्भवैः मुनिभिः पूजयामास। नित्यं बिलेन चागत्य, देवं नत्वा नृपोत्तमः धर्मेण राज्यं चकार। भोगमुत्तमं भुञ्जानो एतस्मिन्नेव काले। दाक्षिणात्यो द्विजोत्तमः आगतः।

**गङ्गास्नानागत वीरशर्माख्यविप्रचरितम् १-२१**

भार्यया सह गङ्गास्नानाय पुरात् गच्छन् मार्गे गर्भिणी जाता बाह्मिणी। स च ब्राह्मणः तां गर्भवतीं दृष्ट्वा आत्मानमनुसृत्य स्नानायागन्तुं न क्षमा इति मत्वा, राजानं द्रष्टुकामोऽसौ राजद्वारमुपागमत्। द्वारपालकैः ज्ञापितो राजा द्विजोत्तमं तमाहूय विधिवत् पूजयित्वा, द्विजं कुशलं पप्रच्छ। किमागमनकृत्यं ते ? हे द्विज ! अहं किं करिष्यामि ? इति पृष्टः सः द्विजः उवाच।

हे राजन् ! वशिष्ठगोत्रीकोऽहं वीरशर्मा सामवेदी। गङ्गास्नानाय सदारः निर्गतः कौशिकी पुण्यशालिनी इयं मार्गे गर्भिणी च नाम्ना लक्ष्मीरिति ख्याता। सुशीला पतिव्रता च। एनां च तव गृहे स्थाप्य, व्रतं निर्वर्तयाम्यहम्। यावदागमं मम तावत् लक्ष्मीः रक्ष्यताम्। इति वीरशर्माख्यविप्रस्य वचः श्रुत्वा राजा तण्डुलानि धनान्यपि दत्वा, षण्मासपर्यन्तं गृहसन्तः पुरे ददौ। तां न्यस्य ब्राह्मणः

प्रीतः गङ्गास्नानाय निर्ययौ। गङ्गां भागीरथीं गत्वा, क्षेत्रोत्तमे प्रयागे स्नात्वा, ततो काशीं गत्वा, तत्र

दिनत्रयं षित्वा, गयां प्रप्य, ब्राह्मणोत्तमः
पित्रुश्राद्धमकरोत्। ततः अयोध्या, बदरी सालग्रामं च गत्वा स्वदेशं प्रति निर्ययौ। संवत्सरद्वये अतीते चैत्रे मासि शुभे दिने एकादश्यां शुक्लपक्षे निवृत्तोऽसौ द्विजश्रेष्ठः पुनः राजानमाययौ। राजा तु ब्राह्मिणीं विस्मृत्य तदा नास्मरन्। माननीं ब्राह्मिणीं गेहे शुष्का मृता बभूव। ततः वीरशर्मा विप्रः गङ्गातोयकरण्डके बन्धनं विमुच्य शुभमेकं गाङ्गं करकं राज्ञे प्रदाय पत्नी कुशलिनीति पप्रच्छ। अथ राजा स्मृत्वा, तं विप्रं स्थीयतामिति चाब्रवीत्। ततः अन्तः पुरं गत्वा, मृतां तां गृहे अपश्यत्। ब्रह्मणे तस्मै अनुक्त्वा, बिलोत्तमं प्रविश्य, श्रीनृसिंहं नमस्कृत्य, पुनः बिलोत्तमं प्राप्य, श्रीभूमिसहितं वरं श्रीनिवासं द्रष्टुं ययौ। आयान्तं तं दृष्ट्वा सहसा धरारये जुगूहते। हे नृप ! किमकाले आगतः ? इति प्रणमन्तं तमवोचत् श्रीनिवासः। प्रणम्य नृपः मृतां ब्राह्मिणीं वृत्तान्तम् अवदत्।

**अस्थिसरोवरमाहात्म्यम् १-२२**

ब्रह्मिण्याः वृत्तान्तं श्रुत्वा, देवदेवेऽपि माभि राजन् द्विजोत्तमात्। स्त्रीभिः स्वाभिः समन्वितां तामन्दोलिकामारोप्य, मदालयात् पूर्वभागे अपमृत्युनिवारणे अस्थिनाम्नि सरस्यस्मिन् प्राप्तजीना समस्त्रीभिः ब्राह्मणेन योक्ष्यते। शीघ्रं याहिनृपश्रेष्ठ ! यथोक्तं वचनं कुरु इति देववचः श्रुत्वा, नृपः स्वपुरं प्रययौ।

आन्दोलिकासु रम्यासु स्त्रियः तामपि आरोप्य, ब्राह्मणञ्च पुरस्कृत्य, श्रीनिवासं देवं द्रष्टुं ययौ। अस्थिकूटसरः प्राप्य, ताः स्त्रियः स्नापयामास। त्वगस्थिरूपा सा चापि ताभिः क्षिप्ता सरोवरे। यथापूर्वं प्राप्तजीवा सुन्यञ्जितशरीरजा सरसः स्नात्वा उत्थिता राज्ञीभिः सह मङ्गला। पुनरागतं भर्तारं ब्राह्मणं प्राप्ता प्रीता च। राजा हरिं पूजयित्वा ब्राह्मणाय धनं ददौ सहस्रनिष्कपर्यन्तम्। विविधानि वस्त्राणि च दत्वा स्वदेशगमनायैव सादरं विससर्ज। स्त्रियः वृत्तान्तं वेङ्कटेशितुः प्रभावं च श्रुत्वा, विप्रः राज्ञे आशीः प्रयुज्य, स्वदेशं प्रययौ।

गते विप्रे श्रीनिवासो पुनः राजानमब्रवीत्। दिने दिने च मध्याह्ने नैवेद्यानन्तरं यथेष्टं स्वर्णपङ्कजैः मामर्चयित्वा पुरीं गत्वा, स्वधर्मेण राज्यं कुरु। हे नृप ! यद्यादिष्टं तव तद्भाविष्यति।

न संशयः। कदाचन त्वया अकाले नागन्तव्यम्। एवं कालार्चनं कृत्वा त्वं सुपुरे गत्वा वस। इति राजा तथा करिष्ये देवेश ! मध्याह्ने चार्चयाम्यहम्। इति देवाज्ञया नित्यं स्वर्णपङ्कजैः अर्चयन्, तदूर्ध्वं मृण्मयं तुलसीपुष्पं तु राजापश्यत्।

**कुर्वग्रामस्थ कुलालवंशज भीमाख्यभक्तोदन्तः १-२३**

स्वर्णपङ्कजैः सह तदूर्ध्वं मृण्मयैः तुलसीपुष्पैः केनार्च्यसे ? इति विस्मितः राजा देवदेवेशमपृच्छत्। कुर्वग्रामे मद्भक्तः कश्चित्कुलालः वसति। असौ स्वगृहे अर्चयते। तदङ्गीक्रियते मया। इति देववचः श्रुत्वा, तं द्रष्टुं प्रययौ। कुर्वपुरं गत्वा तस्य कुलालस्य गृहं ययौ। आगतं राजानं दृष्ट्वा, प्रणम्यैवाग्रतः स्थितः। स्थितं तं भीमनामानं नृपसत्तमः पप्रच्छ ! हे भीम ! देवं कथं पूजयसे भवान् ? वद । इति पृष्टः कुलालोऽपि प्राह जातु न जाने चार्चनम्। कुलालो अर्चयतीति केनोक्तम् ? देवेन श्रीनिवासेन त्वदर्चनं ममोक्तम्। इति नृपवचः श्रुत्वा सः कुलालः भवतः पूजा यदा प्रकाशिता, यदा राजा तोण्डमान् समागतः, तेन सवादः तदा मोक्षं गमिष्यसि इति देवो वेङ्कटेश्वरः वरं दत्तवान् इति पुरा देववचः स्मृत्वा स्थितः।

**कुर्वग्रामस्थभीमाख्यसपत्न्या सह वैकुण्ठप्राप्तिः १-२४**

तदैवागतं विमानं, देवं जनार्दनं च दृष्ट्वा कुलालः पत्न्या सार्दं सदारो भक्तसत्तमः प्रणमन् प्राणान् प्रजहौ। राजराजस्य पश्यतः विमानमधिरुह्य, दिव्यरूपधरः देव्या सार्थं विष्णुपदं ययौ।

तत्राद्भुतं दृष्ट्वा राजा हर्षितः स्वपुरं प्राप्य, स्वपुत्रं श्रीनिवासाख्यं विधानतः अभिषिच्य, वसुन्धरां मानवान् च धर्मेण परिपालय ! इति सुतं ज्ञाप्य, धीमान् परमं तपः तताप। तस्य तप्तस्य देवोऽपि प्रत्यक्षमभवत् हरिः।

**श्रीनिवासकृपया तोण्डमान् नृपस्य सारूप्यप्राप्तिः १-२५**

रमाभूमिसमन्वितः देवः गरुडमारुह्य, एवमुवाच - किं करोमि नृपश्रेष्ठ ! तव तपसा तोषितः इत्युक्तः तोण्डमानपि राजाराट् प्रीतिमान् प्राञ्जलिर्भूत्वा, सगद्गदमुवाच। जरामरणवर्जिते त्वल्लोके वस्तुमिच्छामि। हे माधव ! तन्मे ईप्सितम्। इदमेव वरं देहि। इत्युक्त्वा साष्टाङ्गं देवसन्निधौ निपपात। तदा कलेवरं मुकत्वा, विमानं त्वारुरोह । मोहरहितं जरामरणवर्जितं पुनरावृत्तिरहितं तद्विष्णोः पदमाययौ।

**एतन्माहात्म्यश्रवणपठनफलश्रुतिः १-२६**

तोण्डमान् नृपस्य विष्णुपदप्राप्त्यादिकं श्रीवेङ्कटाचलमाहात्म्यमिदं यः श्रावयेत्, यः शृणुयात् सः विष्णुलोकं गच्छति इति देवदेवेन उक्तां सभविष्यां सहोत्तरां पुण्यां कथां पुरातनीं भक्त्या यः फठेत् शृणुयात् सः अखिलान् कामान् भुक्त्वा अन्ते विष्णुपदं व्रजेत्।

हरिः ओं तत्सत्।

**सारांशः १-२७**

प्रियपाठकाः ! अस्मिन् खण्डे श्रीवराहपुराणान्तर्गते श्रीवेङ्कटाचलमाहात्म्ये द्वितीयभागे चरमयोः द्वयोः नवमदशमयोः अध्याययोः विषयाः उक्ताः। तत्र वसुनामकनिषादवृत्तान्तः, सुतहननोद्युक्तं वसुं प्रति भगवदुक्तिः, रङ्गदासस्य श्रीनिवाससेवार्थं श्रीशेषाचलागमनं, श्रीनिवासार्थं रङ्गदासकृतदिव्योद्यानमण्डपनिर्माणानि, रङ्गदासस्य गन्धर्वक्रीडादर्शनेन भगवत्कैङ्कर्यविस्मृतिः, स्वानुष्ठितानुसन्धानेन लज्जितं रङ्गदासं प्रति श्रीनिवासवचनं, तोण्डमान्नामकनृपवृत्तान्तः तोण्डमान्नृपस्य मृगयार्थं श्रीशेषाचलागमनं, श्रीनिवाससमीपस्थं पञ्चवर्णशुकवृत्तान्तः, तोण्डमान्नृपस्य निषादेन सह श्रीनिवाससेवागमनं, तोण्डमान् नृपं प्रति रेणुकोक्तिः, शुकवर्णितपद्मसरोवरमाहात्म्यम्,

देवादिभिः कृता श्रीलक्ष्मीस्तुतिः, इन्द्रादीन् प्रति स्तुतिप्रसन्नं लक्ष्मीवचनम्, तोण्डमान्नृपस्य स्वपितुः सकाशात् राज्यप्राप्तिः, वसोर्वल्मीके श्रीवराहसन्दर्शनं, तोण्डमान्नृपाय वसुनिवेदित वराहोदन्तः, नृपस्य निषादवाक्यस्वप्नाभ्यां बिलमार्गेण शेषाचलागमनम्, भगवदाज्ञया तोण्डमान्नृपकृतक्षीराभिषेकप्राकारनिर्माणादिकं, गङ्गास्नानागतवीरशर्माख्यविप्रचरितम्, अस्थिसरोवरमाहात्म्यम्, कुर्वग्रामस्थ भीमाख्यभक्तसपत्न्यासह वैकुण्ठप्राप्तिः, श्रीनिवासकृपया तोण्डमान् नृपस्य सारूप्यप्राप्तिः, वेङ्कटाचलमाहात्म्यश्रवणपठनफलश्रुतिः इत्यादयः उक्ताः।

**आदर्शप्रश्नाः १-२९**

निबन्धात्मकप्रश्नाः ( प्रत्येकं २०/१५ अङ्काः)

१.वेङ्कटाद्रौ रङ्गदासस्य चरितं लिखत।

२.वेङ्कटाद्रौ वसुनामकनिषादवृत्तान्तं विशदयत।

३.वेङ्कटाद्रौ तोण्डमान्नृपस्य चरितं विशदयत।

४.वीरशर्माख्यविप्रचरितं विवृणुत।

**विश्लेषणात्मकप्रश्नाः (प्रत्येकं १२/ १० अङ्काः)**

१.श्रीनिवाससमीपस्थ पञ्चवर्णशुकवृत्तान्तं लिखत।

२. तोण्डमान् नृपस्य निषादेन सह श्रीनिवाससेवागमनं लिखत।

३. वसोः वल्मीके श्रीवराहसन्दर्शनं वर्णयत।

४. तोण्डमान्नृपाय वसुनिवेदितवराहोदन्तं स्पष्टयत।

५. नृपस्य निषादवाक्यस्वप्नाभ्यां बिलमार्गेण शेषाचलगमनं लिखत।

६. अस्थसरोवरमाहात्म्यं वर्णयत।

**लघुप्रश्नाः (प्रत्येकं ५ अङ्काः)**

१.सुतहननोद्युक्तं वसुं प्रति भगवदुक्तिं लिखत।

२. श्रीनिवासार्थं रङ्गदासकृत दिव्योद्यानमण्डपनिर्माणानि वर्णयत।

३. रङ्गदासस्य गन्धर्वक्रीडादर्शने भगवत्कैङ्कर्यविस्मृतिं स्पष्टयत।

४. लज्जितं रङ्गनाथं प्रति श्रीनिवासवचनं लिखत।

५. तोण्डमान् नृपस्य निषादेन सह श्रीनिवाससेवागमनं स्पष्टयत।

६. तोण्डमान् नृपं प्रति रेणुकोक्तिं स्पष्टयत।

७. देवादिकृतश्रीलक्ष्मीस्तुतिं विवृणुत।

८. इन्द्रादीन् प्रति लक्ष्मीप्रतिवचनं लिखत।

**एकाङ्कप्रश्नाः (प्रत्येकं १ अङ्कः)**

१.निषादस्य वसुनायकस्य पत्न्याः नाम किम् ?

२. निषादस्य वसोः पुत्रस्य नाम किम्?

३. बाल्यात्प्रभृतिविष्णुभक्तिसमन्वितः पाण्ड्यदेशात् शेषाचलमागतः कः ?

४. बलरामकृष्णौ कस्याः नद्याः तटे स्थितौ ?

५. कपिलतीर्थात् पुरः स्थितं तीर्थं किम् ?

६.रङ्गदासः कति वयसि वेङ्कटाद्रिमागतः ?

७. मया त्वं मोहितोह्यसि इति कं प्रति श्रीनिवासेनोक्तम् ?

८. तोण्डमान् राजस्य पितुः नाम किम् ?

९. तोण्डमान् राजस्य मातुः नाम किम् ?

१०.तोण्डमान् राजस्य पत्न्याः नाम किम् ?

११. तोण्डमान् नृपस्य पत्नी कस्य राजस्य पुत्री ?

१२. श्रीनिवासेति वदन् शीघ्रतरं गिरिं ययौ कः ?

१३. प्राकारनिर्माणं कर्तुं उद्योगमाययौ कः ?

१४.गङ्गास्नानाय गच्छन् सदारः तोण्डमान् नृपं समागमत् कः ?

१५. वीरशर्माणः पत्न्याः नाम किम् ?

१६. अस्थिनाम्नि सरस्यस्मिन् द्वादश्यां स्नापयेति केनोक्तम् ?

१७.कुर्वग्रामस्थः कुलालवंशजः भक्तः कः ?

१८. दिव्यरूपधरो देव्या सार्थं विष्णुपदं ययौ कः ?

**एकाङ्कप्रश्नानामुत्तराणि १-३०**

१.चित्रवती २. वीरः ३. रङ्गदासः ४. सुवर्णमुखरी ५. चक्रतीर्थम् ६. द्वादशवर्षवयसि ७. रङ्गदासं ८. सवीरः ९. नन्दिनी १०. पद्मा ११. पाण्ड्यस्य १२. पञ्चवर्णशुकः १३. तोण्डमान् नृपः १४. वीरशर्मा १५. लक्ष्मी १६. श्रीनिवासेन १७. भीमः १८. भीमो नाम भक्तः

**श्रीवराहपुराणान्तर्गतं वेङ्कटाचलमाहात्म्यं सम्पूर्णम्**